# shivalIlArNavaH by Nilakantha Dikshita

# શ્રીનીલકણ્ઠદીક્ષિતપ્રણીતઃ શિવલીલાર્ણવઃ

## Document Information

Text title : Shivalilarnava by Nilkanthadikshita

File name : shivalIlArNavanIlkaNThadIkShita.itx

Category : shiva, nIlakaNThadIkShita

Location : doc_shiva

Proofread by : Rajesh Thyagarajan

Latest update : May 20, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીનીલકણ્ઠદીક્ષિતપ્રણીતઃ શિવલીલાર્ણવઃ

॥ શ્રીઃ ॥

મહાકવિશ્રીનીલકણ્ઠદીક્ષિતપ્રણીતઃ શિવલીલાર્ણવઃ ।

## અથ પ્રથમઃ સર્ગઃ ।

પૂતં સ્વતઃ પૂતતરં તતો યદ્ ગાઙ્ગં પયઃ શઙ્કરમૌલિસઙ્ગાત્ ।
તત્ પાતુ માતુઃ પ્રણયાપરાધપાદાહતૈઃ પૂતતમં તતો નઃ ॥ ૧॥

અશક્યમઙ્ગાન્તરવદ્વિભક્તુમણુપ્રમાણં કરણં યદન્તઃ ।
સામાન્યભૂતં શિવયોસ્તદેકં સાનુગ્રહં સ્યાન્મયિ ગર્ભદાસે ॥ ૨॥

અન્વિષ્ય ખિન્નં નિગમાનશેષાનમી ન મીનં પ્રથમં સ્મરામઃ ।
અન્વિષ્યમાણં નિગમૈરશેષૈરમ્બ ! સ્તુમસ્તે વયમાક્ષિમીનમ્ ॥ ૩॥

સ્તન્યેન કશ્ચિત્ કવયામ્બભૂવ તામ્બૂલસારેણ પરો જનન્યાઃ ।
અહં તતોઽપ્યુન્નતિમાતુકામઃ સર્વે તતોઽપ્યુન્નતમક્ષિકોણમ્ ॥ ૪॥

અર્ધે તનોરદ્રિસુતામયોઽસ્મીત્યહંયુના કિં ફલમાદિયૂના ।
ગીર્વાણયોગીન્દ્રમુપાસ્મહે તં સર્વાત્મના શૈલસુતાત્મકો યઃ ॥ ૫॥

કાલેન શમ્ભુઃ કિલ તાવતાપિ કલાશ્ચતુષ્ષષ્ટિમિતાઃ પ્રણિન્યે ।
દ્વાસપ્તતિં પ્રાપ્ય સમાઃ પ્રબન્ધાઞ્છતં વ્યધાદપ્પયદીક્ષિતેન્દ્રઃ ॥ ૬॥

અનાહતોદ્ભૂતમપાસ્તભેદમાદ્યં શિવસ્યોપયિકં વિધાતુઃ ।
નાદાભિધં પારગમધ્વનાં તદનુત્તરં જ્યોતિરનુસ્મરામઃ ॥ ૭॥

સાહિત્યવિદ્યાજયઘણ્ટયૈવ સંવેદયન્તે કવયો યશાંસિ ।
યથા યથાસ્યાં ધ્વનિરુજ્જિહીતે તથા તથા સાર્હતિ મૂલ્યભેદાન્ ॥ ૮॥

યાવત્ કવેર્માર્દવમુક્તિબન્ધે યાવદ્ ધિયઃ શ્રોતરિ કોમલત્વમ્ ।
તાવદ્ધ્વનૌ તદ્યતિભેદમૂલે તારત્વમાલઙ્કૃતિકા વદન્તિ ॥ ૯॥

અસ્મિન્ મહત્યસ્તમિતાન્યવેદ્યે વિસૃત્વરે વીચિતરઙ્ગરીત્યા ।
કાવ્યધ્વનૌ જાગ્રતિ દેહભાજાં કર્ણં વિશેયુઃ કથમન્યશબ્દાઃ ॥ ૧૦॥

કીર્ણાનિ ઘણ્ટાપથ એવ હન્ત શબ્દાર્થરત્નાનિ ગિરાં સવિત્ર્યા ।
અત્યાદરાદામૃશતાં કવીનાં દૃગ્ગોચરં કસ્યચિદેવ યાન્તિ ॥ ૧૧॥

પ્રાયસ્તિરોભૂતમહાપ્રકાશાઃ પાષાણખણ્ડેષ્વિવ ચન્દ્રકાન્તાઃ ।
શબ્દેષુ શબ્દા મિલિતાશ્ચરન્તિ ભાગ્યોત્તરા એવ તુ જાનતે તાન્ ॥ ૧૨॥

યાનેવ શબ્દાન્ વયમાલપામો યાનેવ ચાર્થાન્વયમુલ્લિખામઃ ।
તૈરેવ વિન્યાસવિશેષભવ્યૈઃ સમ્મોહયન્તે કવયો જગન્તિ ॥ ૧૩॥

ગાયન્તિ વીણા અપિ વેણવોઽપિ જાનન્તિ બાલાઃ પશવોઽપિ ચેદમ્ ।
કાવ્યાનિ કર્તું ચ પરીક્ષિતું ચ દ્વિત્રા ભવેયુર્ન તુ વા ભવેયુઃ ॥ ૧૪॥

સવ્યં વપુઃ શબ્દમયં પુરારેરાત્મકં દક્ષિણમામનન્તિ ।
અઙ્ગં જગન્મઙ્ગલમૈશ્વરં તદર્હન્તિ કાવ્યં કથમલ્પપુણ્યાઃ ॥ ૧૫॥

સ્તોતું પ્રવૃત્તા શ્રુતિરીશ્વરં હિ ન શાબ્દિકં પ્રાહ ન તાર્કિકં વા ।
બ્રૂતે તુ તાવત્ કવિરિત્યભીક્ષ્ણં કાષ્ઠા પરા સા કવિતા તતો નઃ ॥ ૧૬॥

કર્ણં ગતં શુષ્યતિ કર્ણ એવ સઙ્ગીતકં સૈકતવારિરીત્યા ।
આનન્દયત્યન્તરનુપ્રવિશ્ય સૂક્તિઃ કવેરેવ સુધાસગન્ધા ॥ ૧૭॥

પશ્યેયમેકસ્ય કવેઃ કૃતિં ચેત્ સારસ્વતં કોશમવૈમિ રિક્તમ્ ।
અન્તઃ પ્રતિશ્યાયમવેક્ષિતશ્ચેત્ કોણે પ્રવિષ્ઠા કવિકોટિરેષા ॥ ૧૮॥

વક્રોક્તયો યત્ર વિભૂષણાનિ વાક્યાર્થબોધઃ પરમપ્રકર્ષઃ ।
અર્થેષુ બોધ્યેષ્વભિધૈવ દોષઃ સા કાચિદન્યા સરણિઃ કવીનામ્ ॥ ૧૯॥

સદર્થમાત્રગ્રહણાત્ પ્રતીતા સર્વજ્ઞતા સાપિ શશાઙ્કમૌલેઃ ।
પ્રાપ્તા વિકાસં પ્રતિભા કવીનાં વ્યાપ્નોતિ યદ્વેત્તિ ન તચ્છિવોઽપિ ॥ ૨૦॥

ઉલ્લઙ્ઘય તન્ત્રાન્તરસમ્પ્રદાયાનુત્પ્રેક્ષમાણા જગદન્યદન્યત્ ।
કસ્માદ્ બિભીમઃ કવયો ભવામઃ કાવ્યજ્ઞદણ્ડાદ્ બિભિમસ્તુ કામમ્ ॥ ૨૧॥

તન્ત્રાન્તરેષુ પ્રતિપાદ્યમાનાસ્તે તે પદાર્થા નનુ તે ત એવ ।
નિર્બેદભીશોકજુગુપ્સિતાન્યપ્યાયાન્તિ સાહિત્યપથે રસત્વમ્ ॥ ૨૨॥

અર્થાવબોધેઽપિ સમે રસજ્ઞૈરન્વિષ્યતે સત્કવિસૂક્તિરેવ ।
અપત્યલાભેઽપિ સમે વિદગ્ધા રૂપોત્તરામેવ હિ રોચયન્તે ॥ ૨૩॥

વ્યામોહયન્તી વિવિધૈર્વચોભિર્વ્યાવર્તયન્ત્યન્યકલાસુ દૃષ્ટિમ્ ।
કાલં મહાન્તં ક્ષણવન્નયન્તી કાન્તેવ દક્ષા કવિતા ધિનોતિ ॥ ૨૪॥

ચિન્તાસુ સંસર્ગવિશેષલાભે સન્દર્ભણે ચાથ પદૈઃ પદાનામ્ ।
અર્થાવબોધે ચ ભવન્ કવીનામાનન્દભૂમા વચસામસીમા ॥ ૨૫॥

અનાયતપ્રાણમસંયતાક્ષમબ્રહ્મચર્યાનશનાદિખેદમ્ ।
ચિત્તં મહેશે નિભૃતં વિધાતું સિદ્ધઃ કવીનાં કવિતૈવ યોગઃ ॥ ૨૬॥

તિર્યઙ્મનુષ્યવ્યતિરેકહેતુર્દેવ્યા ગિરામેવ કટાક્ષપાતઃ ।
પ્રજ્ઞાવિશેષાસ્તુ પરે જનાનાં પ્રાયો દિશન્તિ શ્વમૃગાલસામ્યમ્ ॥ ૨૭॥

ન કાલભેદાદ્રસવર્ણભેદો ન જામિતા વા ન ઋજીષભાવઃ ।
સારસ્વતં નામ ફલં તદેતત્ સદૈકરૂપં કૃતિનો લભન્તે ॥ ૨૮॥

બાલ્યં વિદુઃ પ્રાકૃતભાષિતાનિ શ્રુતિસ્મૃતી વૃદ્ધદશાં વદન્તિ ।
સાહિત્યમેકન્તુ ગિરાં સવિત્ર્યાસ્તારુણ્યમુદ્ગાઢમુશન્ત્યભિજ્ઞાઃ ॥ ૨૯॥

ક્વાર્થાઃ ક્વ શબ્દાઃ ક્વ રસાઃ ક્વ ભાવાઃ ક્વ વ્યઙ્ગયભેદાઃ ક્વ ચ વાક્યરીતિઃ ।
કિયત્સુ દૃષ્ટિઃ કવિના ન દેયા કિમસ્તિ રાજ્ઞામિયતીહ ચિન્તા ॥ ૩૦॥

આવર્ણશક્તિગ્રહમાપવર્ગં દુઃખૈકરૂપા વિરચય્ય વિદ્યાઃ ।
વિશ્રાન્તિહેતોઃ કવિતાં જનાનાં વેધાઃ સદાનન્દમયીં કિમાધાત્ ॥ ૩૧॥

સિદ્ધં પદં સિદ્ધતરસ્તદર્થઃ સાધ્યા પદાનાં પરમાનુપૂર્વી ।
તન્માત્રસારે કવિતાપદેઽસ્મિન્ કિયદ્વિધાત્રા કૃતમુચ્ચનીચમ્ ॥ ૩૨॥

તાન્યેવ શાસ્ત્રાણિ ત એવ શબ્દાસ્ત એવ ચાર્થા ગુરવસ્ત એવ ।
ઇયાન્ વિશેષઃ કવિતાપથેઽસ્મિન્ દેવ્યા ગિરાં દૃક્પરિવર્તભેદઃ ॥ ૩૩॥

પદાનિ ભવ્યાન્યપિ કાવ્યરીતિમસ્થાનદત્તાનિ ન શોભયન્તે ।
નાસાગ્રલગ્નેન ભવન્મુખશ્રીસ્તાટઙ્કબિમ્બેન કિમઙ્ગનાયાઃ ॥ ૩૪॥

સાહિત્યવિદ્યાં પદમેકમેવ સર્વાનવદ્યામપિ હન્તિ દુસ્સ્થમ્ ।
દન્તાવલિં મૌક્તિકદામરમ્યાં દંષ્ટ્રેવ વક્ત્રાદ્ બહિરુલ્લસન્તી ॥ ૩૫॥

અન્યોન્યસંસર્ગવિશેષરમ્યાપ્યલઙ્કૃતિઃ પ્રત્યુત શોચનીયા ।
નિર્વ્યઙ્ગ્યસારે કવિસૂક્તિબન્ધે નિષ્ક્રાન્તજીવે વપુષીવ દત્તા ॥ ૩૬॥

વિદ્વત્પ્રિયં વ્યઙ્ગ્યપથં વ્યતીત્ય શબ્દાર્થચિત્રેષુ કલેર્વિલાસાત્ ।

પ્રાપ્તોઽનુરાગો નિગમાનુપેક્ષ્ય ભાષાપ્રબન્ધેષ્વિવ પામરાણામ્ ॥ ૩૭॥

કૃતે યુગે વ્યઞ્જનયાવતીર્ણં ત્રેતાયુગે સૈવ ગુણીબભૂવ ।
આસીત્ તૃતીયે તુ યુગેઽર્થચિત્રં યુગે તુરીયે યમકપ્રપઞ્ચઃ ॥ ૩૮॥

દિષ્ટ્યાધિરૂઢાઃ કવિતાધિરાજ્યં ધીરા રમન્તે ન હિ શબ્દચિત્રે ।
સ્વર્ગેઽપિ ગત્વાપ્સરસાં નિવાસે કાણૈવ કિં કાપિ ગવેષણીયા ॥ ૩૯॥

મત્વા પદગ્રન્થનમેવ કાવ્યં મન્દાઃ સ્વયં તાવતિ ચેષ્ટમાનાઃ ।
મજ્જન્તિ બાલા ઇવ પાણિપાદપ્રસ્પન્દમાત્રં પ્લવનં વિદન્તઃ ॥ ૪૦॥

કાલાદ્ બહોઃ કાન્યપિ દુષ્પદાનિ લબ્ધાનિ મન્દઃ પરિતો વિકીર્ય ।
છિદ્રાણિ લોષ્ટૈરથ પાંસુભિશ્ચ સમ્પૂરયન્ વિસ્મયતે વિલજ્જઃ ॥ ૪૧॥

અદ્યૈકમેકં કુધિયઃ પરેદ્યુરન્યેદ્યુરેકં ચ પદં નિબધ્ય ।
શુક્તં ક્વચિત્ પર્યુષિતં ક્વચિચ્ચ કોષ્ણં ક્વચિચ્ચારચયન્તિ પદ્યમ્ ॥ ૪૨॥

આપૂર્ય વક્રં લશુનૈર્વિધાતા કિં નિમ્બસારૈઃ કુધિયામસિઞ્ચત્ ।
ન ચેત્ કથં વાચિ તતઃ ક્ષરન્ત્યાં સ પૂતિગન્ધઃ સ ચ તિક્તભાવઃ ॥ ૪૩॥

લભેય નિન્દામપિ સત્કવીનાં સવ્યઙ્ગ્યસૌરભ્યરસૈર્વચોભિઃ ।
ન તુ પ્રશંસામપિ દુષ્કવીનાં દુર્ગન્ધિભિર્વીતરસૈરમીભિઃ ॥ ૪૪॥

વિવક્ષિતાર્થપ્રતિપાદકં યે વિન્યાસભેદં ન વિદુઃ પદાનામ્ ।
દુઃખાવહોઽર્થઃ સ્ફુરિતોઽપિ તેષાં દૌર્ભાગ્યભાજામિવ પુત્રલાભઃ ॥ ૪૫॥

દુર્મેધસઃ શુષ્કતરાં કટોરાં દુર્ગન્ધસાન્દ્રાં ગિરમુદ્ગિરન્તઃ ।
કાલં ચિરં હન્ત કથં વ્યથન્તે શ્રોતુર્દશાતરસ કિયત્તમોઽશઃ ॥ ૪૬॥

શૃણ્વન્તુ તે દુષ્કવિતાં પરેષાં શ્રોત્રેષુ તપ્તં જતુ યૈર્નિષિક્તમ્ ।
શબ્દાર્થયોર્દુષ્કવિવક્રભાજોઃ કિં દુષ્કૃતં સ્યાદવધારયન્તુ ॥ ૪૭॥

શ્રામ્યન્તિ યાવત્ કવયઃ પરેઽપિ શ્રામ્યન્તિ તાવચ્ચ તતોઽધિકં ચ ।
ગર્ભોદ્ભવાદિઃ પ્રસવાવતાનઃ ક્લેશો હિ દુષ્પુત્રસુવાઞ્ચ તુલ્યઃ ॥ ૪૮॥

દાક્ષિણ્યહાનિર્જગતાં વિધાતુર્દૈવ્યા ગિરાં દુર્ભરણત્ય યોગઃ ।
પાપં જનાત્યેતિ ચ સર્વમેતત્ સમાહૃતં દુષ્કવિતાનિદાનમ્ ॥ ૪૯॥

આબ્રહ્મવાતાદઘશોધનાનિ સ્મરન્તિ યે તે પરમર્ષયોઽપિ ।
યાવત્તદાત્માન્વયિતાધિયૈવ ન સસ્મરુર્દુષ્કવિતાસુ શુદ્ધિમ્ ॥ ૫૦॥

સ્વોક્તિ મુષિત્વા પુરતઃ પઠન્તં સ્વસ્યૈવ પશ્યન્ કવિસાહસાઙ્કમ્ ।
પ્રાજ્ઞો જનઃ કિં પ્રતિપદ્યતાં તમાહન્તુ વા સ્વોદરમોહતાં વા ॥ ૫૧॥

નિન્દન્તુ વાચં મધુરાં કવીનાં નન્દન્તુ ચ સ્વાં ગિરમેવ મૂર્ખાઃ ।
નાદ્યાં સ્વરીત્યા રસયન્તુ જાતુ નાન્ત્યાં પઠન્તુ સ્વરતોઽપિ પાર્શ્વે ॥ ૫૨॥

હિંસા પશૂનાં ક્રતુમધ્યલગ્ના સ્વર્ગે યથાસ્તે ક્ષણદુઃખહેતુઃ । (યથાસ્તેઽક્ષ્ય)
કિઞ્ચિચ્છુમં પાતકમવ્યલગ્નં તથા મુદે સ્યાદપિ દુષ્કવીનામ્ ॥ ૫૩॥

પ્રાચેતસવ્યાસમુખાઃ કવીન્દ્રાઃ પ્રાગ્ચોઽપિ કિં દુષ્કવિભિર્વિરક્તાઃ ।
કાવ્યાનિ કર્તું શતશઃ ક્ષમાત્તે કથં ન ચેદાસત કાકવન્ધ્યાઃ ॥ ૫૪॥

સ્થૂલાભિરભ્યુલ્લિખિતાનિ ધીભિઃ સ્થૂલાનિ મન્યે કુકવેર્વચાંસિ ।
કથં ન ચેત્ કર્ણપુટં પ્રવેષ્ટુમેતાનિ યત્નાદપિ નોત્સહન્તે ॥ ૫૫॥

વાચં હતો યદ્યપિ તે તથાપિ ન મૂકતા દુષ્કવિતૈવ દોષઃ ।
આદ્યા યદેકત્ય વિવાદહેતુઃ પ્રાણોપરોધાય પરા બહૂનામ્ ॥ ૫૬॥

વાચં વિપઞ્ચીમિવ વાદયન્તિ કર્ણામૃતેન ધ્વનિના કવીન્દ્રાઃ ।
મૂર્ખાઃ સ્વમેધામુસલપ્રહારૈર્વિનાશયન્ત્યેવ વિચેષ્ટમાનાઃ ॥ ૫૭॥

શક્યં સુખં ગ્રન્થયિતું પ્રવન્ધાન શક્યસ્તુ ન શ્રોતૃજનાનુરોધઃ ।
શ્રાન્તે સતિ ક્વાપિ કવૌ યદેષ સર્વસ્વનાશાદિવ ખેદમેતિ ॥ ૫૮॥

અચુમ્બિતોલ્લેખપદપ્રવૃત્તાનસમ્પ્રદાયેન કવીન્ ક્ષિપતિ ।
પથા પ્રવૃત્તાન્ પ્રહતેન મૂર્ખાઃ પશ્યન્ત્યવજ્ઞામુકુળીકૃતાક્ષાઃ ॥ ૫૯॥

રસં રસજ્ઞાઃ કલયન્તિ વાચિ પરે પદાર્થાનપરે પદાનિ ।
વસ્ત્રં કુવિન્દા વણિજો વિભૂષાં રૂપં યુવાનશ્ચ યથા યુવત્યામ્ ॥ ૬૦॥

પાઠપ્રકારૈઃ પદયોજનાભિસ્તાત્પર્યદુર્નિશ્ચયતશ્ચ મન્દૈઃ ।
આયાસ્યમાનાં ગિરમાત્મનો યે કર્ણે ન કુર્વન્તિ ત એવ ધન્યાઃ ॥ ૬૧॥

એકો હિ દોષઃ પરકીયતૈવ પદ્યેષુ સર્વેષ્વપિ દુર્જનાનામ્ ।
તસ્મિન્ પુરસ્થેઽપિ કિયદ્યતન્તે વૃથૈવ તે દોષગવેષણાય ॥ ૬૨॥

આનન્દથુર્બ્રહ્મવિદાં યદેકસ્તે વ્યઙ્ગ્યલાભેષુ શતં કવીનામ્ ।
એતે સહસ્રં પુનરર્બુદં વા પરોક્તિદોષસ્ફુરણે ખલાનામ્ ॥ ૬૩॥

પ્રાચીનપદ્યભ્રમતઃ પ્રવૃત્તાઃ સ્તોતું ખલાઃ પ્રેક્ષ્ય કવિં પુરસ્તાત્ ।
યેનાન્યથાકર્તુમિદં ગતન્તે ક્લેશેન તેષાં હિ સ એવ દણ્ડઃ ॥ ૬૪॥

દોષઃ ક્વચિત્ કશ્ચિદિતિ પ્રતીતઃ પ્રાચામલઙ્કારવિદાં પ્રવાદઃ ।
સર્વપ્રબન્ધાનુગતસ્તુ મન્યે કર્તુઃ કવેર્જીવનમેવ દોષઃ ॥ ૬૫॥

મુધૈવ વાક્યેષુ પદેષ્વધીતં મુધૈવ દીર્ઘં કવિતાપથેઽપિ ।
આવશ્યકં યત્કિલ પામરાણામાવર્જનં તન્ન કિમપ્યધીતમ્ ॥ ૬૬॥

નિસર્ગતો નિર્ગુણમુક્તિગુમ્ફં સમર્થયન્તે સગુણં બલાદ્યે ।
તે કઞ્ચુળીસન્નહનોન્નતેન લમ્બસ્તનેનાપિ મુદં લભન્તે ॥ ૬૭॥

પાણ્ડિત્યલોભો યદિ પામરાણાં કામં વિહિંસન્તુ કલાસ્ત્રિષષ્ટિમ્ ।
કરતેઽપરાધઃ કવિતે! ગૃહીતઃ કિમસ્તિ તે કિઞ્ચન પૂર્વવૈરમ્ ॥ ૬૮॥

વાચં કવીનામુપલાળયન્ યાં ભુઙ્ક્તે રસજ્ઞો યુવતિં યુવેવ ।
તામેવ ભુઙ્ક્તે નનુ તાર્કિકોઽપિ પ્રાણાન્ હરન્ ભૂત ઇવ પ્રવિષ્ટઃ ॥ ૬૯॥

અર્થેષ્વલઙ્કારવિદઃ પ્રમાણં શબ્દેષુ નઃ શબ્દવિદો મુનીન્દ્રાઃ ।
કે તાન્ત્રિકાણાં કવયો ભવન્તિ કે વા કવીનામપિ તાન્ત્રિકાઃ સ્યુઃ ॥ ૭૦॥

ઘટ્ટોપવિષ્ટાનિવ વાગ્ભિરર્થૈઃ કાવ્યાગમજ્ઞાનુપસાન્ત્વયામઃ ।
આપ્લુત્ય ભલ્લૂકવદાપતન્તઃ કથં નુ જય્યા ઇહ ગૌતમીયાઃ ॥ ૭૧॥

અન્યન્તિકસ્થૈરવિભાવનીયઃ સૂક્ષ્મઃ પ્રકૃત્યા મૃદુસૂક્તિજન્મા ।
કુતર્કવિદ્યાવ્યવનોપજાતૈઃ કોલાહલૈર્ન ધ્વનિરેષ વેદ્યઃ ॥ ૭૨॥

ગુણાન્ ન ગૃહ્ણન્તુ ખલાસ્તતઃ કિં ગૃહ્ણન્તુ દોષાનપિ વા તતઃ કિમ્ ।
અપિ વ્યતિત્તામુભયં તતઃ કિં ગુણોઽપિ દોષો યદિ દુસ્સહં તત્ ॥ ૭૩॥

ક્વ બ્રહ્મલોકઃ ક્વ ગિરાં સાવિત્રી ક્વ ભૂમિભાગાઃ ક્વ વયં વરાકાઃ ।
દિષ્ટ્યોપલબ્ધામપિ દેવતાં તાં વિક્રીણતે વૃત્તિકૃતે વિમૂઢાઃ ॥ ૭૪॥

દુષ્પણ્ડિતારાધનદુઃખશીલાત્ કષ્ટાદમુષ્માત્ કવિતાધિકારાત્ ।
વરં જગત્યામિહ મૂકભાવો વરં ચ તિર્યક્તૃણગુલ્મભાવઃ ॥ ૭૫॥

પ્રાયો જડા મત્સરિણશ્ચ લોકા દોષોત્તરં મૃગ્યગુણં વચો નઃ ।
ગુણૈકલુબ્ધોઽપિ જનઃ ક્વચિત્ સ્યાદિત્યાશયૈવાયભિયાન્ પ્રયાસઃ ॥ ૭૬॥

‘વેદાહમેતં પુરુષં મહાન્ત” મિત્યામનન્તો નિગમાઃ સગર્વમ્ ।
શ્વાનઃ કૃતા યેન સ એવ દેવો વર્ણ્યઃ કથં વાઙ્મનસાતિવર્તી ॥ ૭૭॥

શબ્દેષુ ચાર્થેષુ પરં યતિષ્યે તથા તથા માં ગુરવો વિનિન્યુઃ ।

ચમત્કૃતિં તત્ર કથં વિધાસ્યે ન મત્કૃતિર્યત્ ક્રમતે તદંશે ॥ ૭૮॥

ક્વાહં ક્વ કાવ્યં કવિરાજસાધ્યં ક્વાહં ક્વ શમ્ભુર્નિગમૈરગમ્યઃ ।
નિશ્શઙ્કમેવાંવિદપિ પ્રવર્તે નિર્લજ્જતે દેવિ! તવ પ્રસાદાત્ ॥ ૭૯॥

દત્તે ત્વયા વાઙ્મયરત્નકોશે વિક્રીય ભુક્તં કિલ ભુક્તમેવ ।
શિષ્ટે ત્વદઙ્ઘ્રયોઃ પુનરર્પયેયં દયમ્વ મીનાક્ષિ ! પુરૈવ મહ્યમ્ ॥ ૮૦॥

શબ્દા યદ્વદનં પ્રપદ્ય મૃદુતામાશાસતેઽન્યાદૃશી-
　　મર્થા યદ્ધિષણાપ્રવાહપતનાદિચ્છન્તિ જિજ્ઞાસ્યતામ્ ।
યત્કીર્તિસ્પૃહયા શિવોઽપિ નિગમાન્ ગ્રન્થાતિ સર્ગાદિષુ
　　પ્રાચસ્તાન્ કવિતાપિતામહપદારૂઢાન્ કવીન્ પ્રસ્તુમઃ ॥ ૮૧॥

ઇતિ મહાકવિશ્રીનીલકણ્ઠદીક્ષિતપ્રણીતે શિવલીલાર્ણવે પ્રથમઃ સર્ગઃ ।

## અથ દ્વિતીયઃ સર્ગઃ ।

અસ્તિ ક્ષિતેરાભરણાયમાનઃ પારેસમુદ્રં સ હિ પાણ્ડ્યદેશઃ ।
આશામગસ્ત્યાધ્યુષિતાં ગતોઽપિ સર્વોત્તરો યો જગતિ પ્રતીતઃ ॥ ૧॥

આસ્થાય વૈરાગ્યમનુત્તમં યસ્ત્રૈલોક્યલક્ષ્મીં ન તૃણાય મેને ।
યદાધિપત્યસ્પૃહયા સ એવ દેવો દધે સુન્દરપાણ્ડ્યરૂપમ્ ॥ ૨॥

સુદુષ્કરં યત્પ્રતિસર્ગમેવ પશ્યન્ મુનિઃ પ્રાગ્ વિરરામ સર્ગાત્ ।
ન શુષ્કયા સાન્ત્વગિરા સુરાણાં કિં ગાધિસૂનોરપિ શાન્તિરસ્તિ ॥ ૩॥

મન્દાનિલોઽસૌ મલયાનિલોઽસૌ ગન્ધાનિલોઽસાવિતિ યં યુવાનઃ ।
સમ્ભાવયન્તે ચલિતૈઃ શિરોભિઃ સ કોઽપિ યત્કોણભવઃ સમીરઃ ॥ ૪॥

આકારિતા યત્ર મખેષુ વિપ્રૈરાલોકયન્તો વિબુધાઃ સમૃદ્ધિમ્ ।
યુષ્માન્ યજામો વયમર્પયધ્વે યુષ્મત્પદં ચેદિતિ સાન્ત્વયન્તે ॥ ૫॥

તપોવનેઽન્યત્ર તપશ્ચરન્તો દિવં ભજન્તે યદિ યુક્તમેતત્ ।
તતોઽધિકે યત્ર તપસ્યતાં હિ તત્રૈવ યુક્તઃ સુચિરં નિવાસઃ ॥ ૬॥

મૃત્પિણ્ડરૂપો જનકો યદીયઃ પિતામહો યત્ય કુલાલ એવ ।
સ કુમ્ભજન્માજનિ સૂત્રકારઃ કોણે વસન્ ક્વાપિ ચિરં યદીયે ॥ ૭॥

સૌભાગ્યલક્ષ્મીં નવચન્દનાનાં મન્દાનિલાનામપિ મૌક્તિકાનામ્ ।
અયાતયામામભિનિર્વિશન્તિ પ્રાયેગ કૌમારહરા યદીયાઃ ॥ ૮॥

યત્રોભયાનુચ્ચતરાન્ રસાલાનાલક્ષ્ય વિન્ધ્યસ્મયભઙ્ગદક્ષાન્ ।
તપસ્યતિ ન્યસ્તભરઃ સુખેન તેષ્વેવ મૈત્રાવરુણિર્મહર્ષિઃ ॥ ૯॥

ઉપત્યકામણ્ડલનિર્વિશેષે દેશે હિ યસ્મિન્ મલયાચલસ્ય ।
ઉદેતિ મન્દં વ્યજનાનિલોઽપિ ચમત્કૃતશ્ચન્દનસૌરભેણ ॥ ૧૦॥

પદેપદે ચન્દનકાનનસ્થૈઃ ફણાધરૈર્યત્ર નિપીયમાનઃ ।
જાતઃ પ્રભૂતોઽપિ બહિઃ પ્રસર્પન મન્દઃ કિલૈવં મલયાનિલોઽભૂત્ ॥ ૧૧॥

મન્દાનિલં મન્મથમૂલકન્દં યત્રોપયોક્તું મુનયસ્ત્રસન્તઃ ।
વૈયાઘ્રચર્મવ્યજનોપજાતૈર્વાતૈર્વ્રતં કેચન વર્તયન્તે ॥ ૧૨॥

અયત્નલભ્યાન્ચયમદ્ભુતાનિ શરાસકાણ્ડાનિ શરાનસઙ્ખ્યાન્ ।
યત્રૈવ પશ્યઞ્જગદેકવીરઃ સ્થિરં મનોજઃ શિબિરં ચકાર ॥ ૧૩॥

તામ્રાતરઙ્ગાનિલતાડિતાસુ માકન્દવાટીષુ મનોજવીરે ।
યત્રાવતીર્ણે મહતા બલેન તદ્બાહુગુમ્રાત્તરુણા રમન્તે ॥ ૧૪॥

વર્ષોપલા યત્ર હિ મૌક્તિકાનિ કાષ્ઠાનિ ગન્ધદ્રુમકાણ્ડખણ્ડાઃ ।
કસ્તેન વિસ્પર્ધિતુમુત્સહેત દેશઃ શિલાકણ્ટકપૂરિતોઽન્યઃ ॥ ૧૫॥

સ્વર્ગં નવં સ્રષ્ટુમના મુનિઃ પ્રાક્ સસર્જ યત્સમ્મુખદેશ એવ ।
તન્મારુતસ્પન્દનમાત્રતોઽપિ સ્વર્ભોગભાગ્યં સુલભં વિજાનન્ ॥ ૧૬॥

અન્યા વિશન્ત્યઃ સરિતઃ સમુદ્રમાપૂરયન્તે જલજન્તુભિઃ સ્વૈઃ ।
રત્નાપગા યત્ર તુ સમ્પતન્તી રત્નાકરત્વં રમણસ્ય દત્તે ॥ ૧૭॥

યત્સઙ્ગમાદેવ ભવન્તિ મુક્તાઃ સા જાહ્નવી સર્વજનીનમેતત્ ।
તતો વિદુર્દક્ષિણજાહ્નવીતિ તાદૃગ્વિધાં યત્ર હિ તામ્રપર્ણીમ્ ॥ ૧૮॥

દત્તે સુતાં સ્વામિવ યાં સમસ્તૈરલઙ્કૃતાં રત્નગણૈરગસ્ત્યઃ ।
સરસ્વતે ગોત્રૈમહત્તરાય યતો ગૃહીતા હરિણાપિ વેદાઃ ॥ ૧૯॥

અભ્યાપતન્તીમનુવાસરં યામગસ્ત્યગોત્રપ્રભવેતિ સિન્ધુઃ ।
વિકીર્ય પુષ્પૈરિવ મૌક્તિકૌવૈઃ પ્રત્યુદ્વ્રજન્ પ્રાપયતે કિમન્તઃ ॥ ૨૦॥

સ્રોતોમુખૈરમ્બુનિધિં પ્રવિષ્ટં સ્વિભાવતઃ સ્વાદુ યદીયમમ્ભઃ ।
નિર્મથ્ય લબ્ધં ત્રિદશૈઃ કદાચિદાત્વાદ્યતેઽદ્યાપિ સુધા સુધેતિ ॥ ૨૧॥

ક્ષારોદકાસ્વાદભવં વિપાકમપાકરિષ્યન્નિવ કુમ્ભજન્મા ।
જહાતિ શૈલં મલયં ન જાતુ પાતું પ્રકૃત્યા મધુરં યદમ્ભઃ ॥ ૨૨॥

યાં સર્વરત્નૈકખનિં વિહાય ગઙ્ગામધાત્ કેન ગુણેન શમ્ભુઃ ।
કા પ્રીતિરર્કે સતિ કૈતકેઽપિ ન હીશ્વરાઃ પર્યનુયોજ્યશીલાઃ ॥ ૨૩॥

વૈદૂર્યનીલોપલમૌક્તિકાનિ યદાદિમધ્યાન્તસમુદ્ભવાનિ ।
સા તામ્રપર્ણી સરિદેવ યત્ર સાધરણી કાચન સારણીવ ॥ ૨૪॥

તસ્મિન્ વિશાલે તરુણેન્દુમૌલેરાવાસભૂતં પદમદ્ભુતાનામ્ ।
વનં જગત્પાવનમસ્તિ કિઞ્ચિન્નીપદ્રુમાણાં નિકષા વૃષાદ્રિમ્ ॥ ૨૫॥

અજ્ઞાતતિગ્માંશુકરાવમર્શા છાયા યદીયા તમસાં વિહન્ત્રી ।
વાતેરિતં પુષ્પરજો યદીયં નિશ્શેષમુન્માર્ષ્ટિ રજઃ પ્રજાનામ્ ॥ ૨૬॥

અન્તર્નિલીનભ્રમરૈઃ પ્રસૂનૈરાભાતિ યદ્ બદ્ધરજોભિરીષત્ ।
સત્ત્વેન નિર્જિત્ય રજાસ્તમશ્ચ સમ્મૂર્છિતેનેવ સમન્તતોઽપિ ॥ ૨૭॥

યત્રાભિષિઞ્ચાન્તિ મધુ ક્ષરન્તો વૃક્ષા ભુવં મૂર્તિનિવાષ્ટમૂર્તેઃ ।
ઝઙ્કુર્વતે કર્ણરસાયનાનિ સામાનિ ગાયન્ત ઇવ દ્વિરેફાઃ ॥ ૨૮॥

વક્ત્રાણિ યસ્મિન્ મુનિપાદપાનામાભાતિ પુષ્પાણ્યતિનિર્મલાનિ ।
સમાહૃતા મુક્તિજુષાં પ્રદાતું શશાઙ્કખણ્ડા ઇવ શઙ્કરેણ ॥ ૨૯॥

સમ્પૂર્યમાણાત્ પ્રતિપૌર્ણમાસં શાખાગ્રસઙ્ઘટ્ટનતોઽવધૂતાત્ ।
મૃગાઙ્કબિમ્બાદ્ ગલિતા ઇવોર્ષ્યાં મૃગાઃ શતં યત્ર પરિભ્રમન્તિ ॥ ૩૦॥

પ્રત્યર્થિનો યત્ર મહેશ્વરસ્ય તત્તત્ક્ષણોદન્તવિચારણાય ।
ચારા નિયુક્તા ઇવ મન્મથેન ચરન્તિ ભૃઙ્ગાઃ સમમન્યપુષ્ટૈઃ ॥ ૩૧॥

પ્રાગમ્બયાથ પ્રમથાધિપેનાયધ્યાસિતે યત્ર કદમ્બમૂલે ।
માકન્દજમ્બૂવટપાદપાનાં મન્દાક્ષમન્દાનિ કુલાન્યભૂવન્ ॥ ૩૨॥

શાખાસુ શાખાસુ ફલાનિ યત્ર ભાન્તીવ નાના પરમાર્થતસ્તુ ।
સર્વાગમાનાં ફલમ્ભેકમેવ સન્દૃશ્યતે તચ્ચ કદમ્બમૂલે ॥ ૩૩॥

તૃણીકૃતે યત્ર વસદ્ભિરાર્યૈશ્ચરાચરેઽસ્મિન્ પશવશ્ચરન્તિ ।
વૈકુણ્ઠવાસોઽપિ તૃણીકૃતસ્તૈર્ન ચેત્ કુતોઽસૌ હરિણાદૃતઃ સ્યાત્ ॥ ૩૪॥

પુષ્પાય વૃક્ષાગ્રપદાવિરૂઢાન્ પુત્રાન્ મુનીનામુપલાલયન્તઃ ।
વ્યાજેન દેવાસ્તપસોઽભિસન્ધિં પૃચ્છન્તિ નિત્યં પરિશઙ્કમાનાઃ ॥ ૩૫॥

રોમાઞ્ચસાન્દ્રા ઇબ કુગ્મલૌઘૈરુદશ્રુપૂર્ણા ઇવ શીથુવૃષ્ટ્યા ।

ભસ્માનુલિપ્તા ઇવ પુષ્પધૂલ્યા દૃષ્ટ્વા મુનીન્ યત્ર ભવન્તિ નીપાઃ ॥ ૩૬॥

યસ્મિન્ મહેશાનકરાશ્રયેણ કેનાપિ કુલ્યેન કૃતાવલમ્બાઃ ।
મૃગા નિરાતઙ્કલવાશ્ચરન્તિ મૃગાદનૈઃ પ્રત્યુત સેવ્યમાનાઃ ॥ ૩૭॥

વ્યાહન્યમાના મૃગયાસુ યસ્મિન્ વ્યાઘ્રાઃ શિવત્વં પ્રતિપદ્ય સદ્યઃ ।
અસ્મત્કુલીનોઽસિ મહાનસીતિ હન્તૄન્કિરાતાનુપસાન્ત્વયન્તે ॥ ૩૮॥

દૃષ્ટેષ્વિવાનુશ્રવિકેષુ યસ્મિન્ધીરા વિતૃષ્ણા ઇતિ નાદ્ભુતાય ।
સ્વર્ગાધિકે ધામનિ સંવસન્તઃ સ્વર્ગ્યાણિ કર્માણિ કિમાદ્રિયેરન્ ॥ ૩૯ ॥

પાણૌ મૃગં પાર્શ્વતલે કિરાતીં પર્યઙ્કબન્ધે ચ ગજં મહાન્તમ્ ।
સમ્માનયન્નેવ ચરત્યરણ્યે પઞ્ચાનનઃ કોઽપ્યધુનાપિ યા મન્ ॥ ૪૦॥

યદ્ દ્વાદશાન્તૈકવિભાવનીયં ત્રય્યન્તદૃશ્યં કથમસ્તુ તન્નઃ ।
ઇત્યધ્યવસ્યૈવ તદાવસન્તિ બ્રમર્ષયઃ પાશુપતા મહાન્તઃ ॥ ૪૧॥

વલ્લ્યો યદીયાઃ કઠવલ્લિકાદ્યાઃ શાખાશ્ચ માધ્યન્દિનકાણ્વમુખ્યાઃ ।
સર્વાગમસ્તોમમયસ્ય તસ્ય શક્નોતિ કો વર્ણયિતું પ્રભાવમ્ ॥ ૪૨॥

તસ્મિન્ કદમ્બદ્રુમમૂલસીમ્નિ તપઃપરીપાકફલં જનાનામ્ ।
આસ્તે જગન્મઙ્ગલમઙ્ગજારેર્લિઙ્ગં દયાવિગ્રહવત્ત્વલિઙ્ગમ્ ॥ ૪૩॥

યદ્ ગૂહિતં વાગ્ભિરકૃત્રિમાભિર્યદ્ દ્રષ્ટુકામા મુનયો યતન્તે ।
નામ્ના ચ રૂપેણ ચ સુન્દરં તત્ પ્રત્યક્ષમાસ્તે પ્રિયકસ્ય મૂલે ॥ ૪૪॥

પાણ્ડ્યાર્પિતા ભાત્યધુનાપિ યસ્મિન્નૃજ્વાયતા વેત્રનિપાતરેખા ।
નાનારહસ્યાગમબોધનીયાં નાદાત્મતામસ્ય વિવૃણ્વતીવ ॥ ૪૫॥

સમસ્તદિવ્યાગમસમ્પ્રતીતે તારાત્મકે તત્ર મહેશલિઙ્ગે ।
અર્ધેન્દુરર્ધેન્દુતયૈવ દૃષ્ટો બિન્દુસ્તુ સિન્ધુઃ સ્તિમિતા જટાગ્રે ॥ ૪૬॥

મૂલઞ્ચ મૌલિઞ્ચ વિવેત્તુકામૌ યસ્યાક્રમેતાં વિધિરચ્યુતશ્ચ ।
તન્મૂલમેતત્તરુમૂલગમ્યં તન્મૌલિરેતત્તરુમૌલિવેદ્યઃ ॥ ૪૭॥

છન્નં પ્રસૂનૈઃ સ્નપિતં મરન્દૈરલઙ્કૃતં ભોગિભિરાપતદ્ભિઃ ।
ઇત્થં સ્વયં પૂજિતમસ્તિ નિત્યં સ્વાયમ્ભુવ સુન્દરનાથલિઙ્ગમ્ ॥ ૪૮॥

એક કિલ બ્રમ યદદ્વિતીયં વક્તું ચતસ્રઃ શ્રુતયોઽપિ નાલમ્ ।
તાદૃગ્વિધાન્યેવ ભજન્તિ તસ્ય બ્રાહ્માણિ પઞ્ચાવયવત્વમુદ્રામ્ ॥ ૪૯॥

તસ્મિન્નહમ્પૂર્વિકયા વિશદ્ભિરપાન્તબન્ધરધુનાપિ જીવૈઃ ।
સમ્બાધદુસ્થૈરજનિષ્ટ લિઙ્ગે સાર્વત્રિકી દન્તુરતેતિ શઙ્કે ॥ ૫૦॥

ચિદ્રૂપમાનન્દમયં ચ વેદાઃ શૈવં વપુઃ શાશ્વતમામનન્તિ ।
દયામયં તેઽપિ વિદુર્ન જાતુ દૃષ્ટં તદત્રૈવ કદમ્બમૂલે ॥ ૫૧॥

ગૂઢં ભવામીત્યભિમાનમાત્રં ગૂઢં પરં જ્યોતિરિદં કથં સ્યાત્ ।
યન્મૂર્ધનિ પ્રત્યુત ચન્દ્રરેખા તેનૈવ તત્ પ્રૈક્ષિ કદમ્બમૂલે ॥ ૫૨॥

ખ્યાતાઃ કલા યદ્યપિ તત્ર લિઙ્ગે પઞ્ચૈવ સિદ્ધાઃ શિવશાસનેષુ ।
તથાપિ તેનાધ્યુષિતે તુ દેશે કલાશ્ચતુઃષષ્ટિરપિ સ્ફુરન્તિ ॥ ૫૩॥

કૃષ્ણાર્જુનાભ્યાં પરિપૂજ્ય લિઙ્ગમાસાદિતાઃ સિદ્ધય ઇત્યવેત્ય ।
કસ્તૂરિકાભિર્ઘનસારકૈશ્ચ લિમ્પન્તિ લોકાઃ ખલુ લિઙ્ગમેતત્ ॥ ૫૪॥

યત્પીઠિકાધસ્પદમાત્રલગ્ના વાણી બહિર્ન ક્રમતે કથઞ્ચિત્ ।
તત્ કારણેશત્રિતયાતિવર્તિ લિઙ્ગં કયા વર્ણયિતવ્યમુક્ત્યા ॥ ૫૫॥

સદાભિષિક્તં વિબુધસ્રવન્ત્યા સદા સમભ્યર્ચિતમિન્દુના ચ ।
લિઙ્ગં તદૈશં વિજને વનેઽપિ લોકત્રયક્ષેમકરં બભૂવ ॥ ૫૬॥

કૂજત્સુ વન્યેષુ વિહઙ્ગમેષુ ગાયત્સુ ચાખણ્ડલગાયનેષુ ।
પ્રીતિં દધૌ તુલ્યવદેવ દેવઃ કસ્તદ્દૃશા તેષુ ભવેદ્ વિશેષઃ ॥ ૫૭॥

વિનોદ્યતે યઃ કિલ યોગિવૃન્દૈર્વિદ્યાધરૈરપ્સરસાં ગણૈશ્ચ ।
વ્યાધૈર્મૃગૈઃ પક્ષિભિરપ્યરંસ્ત સ દેવદેવાશ્ચિરમત્ર લિઙ્ગે ॥ ૫૮॥

અન્તર્હિતાવસ્થિતમત્ર લિઙ્ગે તમારરાધુસ્તરવઃ પ્રસૂનૈઃ ।
શ‍ૃઙ્ગારકણ્ડૂયનતઃ કુરઙ્ગા નિર્મોકપટ્ટાર્પણતો ભુજઙ્ગાઃ ॥ ૫૯॥

સન્ધ્યાસુ સન્ધ્યાસુ ગણૈરદૃશ્યૈરારાત્રિકં સાધિતમસ્ફુટં યત્ ।
ચક્રે જરજ્જમ્બુકવક્ત્રલગ્નૈર્વલાદ્ભરેતજ્જ્વલનૈઃ પ્રકાશમ્ ॥ ૬૦॥

વન્યદ્વિપેષ્વન્યતમો ગણેશો વ્યાધાર્ભકેષ્વેકતમઃ કુમારઃ ।
સાઽપ્યાદિશક્તિઃ શબરીષુ કાપિ ભૂત્વા વિજહ્રુઃ સવિધે પુરારેઃ ॥ ૬૧॥

ઇત્થં પરિભ્રામ્યતિ કાલચક્રે પ્રણશ્યતિ પ્રોદ્યતિ ચ પ્રપઞ્ચે ।
દેવેષુ યોગિષ્વપિ કેઽપિ કેઽપિ શનૈરબુધ્યન્ત રહસ્યમેતત્ ॥ ૬૨॥

પ્રત્યગ્દૃશા પ્રાક્તનપુણ્યયોગાદાપ્તોપદેશૈરનુમાનતશ્ચ ।
ક્રમાદ્ દ્યુલોકે બહલીબભૂવ કદમ્બકાન્તારકથાપ્રસઙ્ગઃ ॥ ૬૩॥

દૂરાત્ પ્રણેમુઃ કતિચિદ્ વનં તદારાત્ પરે નીપતરૂનપશ્યન્ ।
વિચિક્યુરેકે તદનુપ્રવિશ્ય ધન્યાઃ પરે તદ્ દદૃશુશ્ચ લિઙ્ગમ્ ॥ ૬૪॥

આનન્દજૈરશ્રુભિરભ્યાપેઞ્ચન્નાનર્ચુરપ્યક્ષિભિરેવ ફુલ્લૈઃ ।
ન્યવેદયન્તાપિ નિકામધૌતમાત્માનમાનન્દસુધાપ્લુતં તે ॥ ૬૫॥

ગૃહત્સુ યુષ્માસ્વપિ ગૂઢમેતદ્રહસ્યમદ્રાક્ષ્મ વયં કિલેતિ ।
અનુશ્રવાન્ કેચિદુપાલભન્ત કેચિદ્વિધિં કેઽપિ શિલાદસૂનુમ્ ॥ ૬૬॥

વાગીશ્વરા વાગ્ભિરપૂજયન્ત ધ્યાનાધ્વનીના હૃદિ દધ્યુરેનમ્ ।
બાહ્યાર્ચનામાત્રપરાયણાસ્તુ સામગ્ર્યલાભાદલભન્ત ખેદમ્ ॥ ૬૭॥

અભ્રાપગાવારિભિરભ્યષિઞ્ચન્ સુધાન્ધસઃ સુન્દરનાથલિઙ્ગમ્ ।
તત્રાસમર્થા મુનયો મહીસ્થાસ્તસ્તમ્ભિરે કેવલમશ્રુપૂર્ણાઃ ॥ ૬૮॥

આલક્ષ્ય પૂજાવ્યવસાયમેષામપામભાવાત્ પરમં ચ ખેદમ્ ।
દીનાનુકમ્પાનિધિરિન્દુમૌલિર્દિવ્યં સરસ્તત્ર વિધાતુમૈચ્છત્ ॥ ૬૯॥

સ દક્ષિણસ્યાં દિશિ બાણપાતે સરો વિધાત્યન્નમૃતાંશુમૌલિઃ ।
સકૃદ્વિલાસાદિવ નિર્બિભેદ તીક્ષ્ણેન ભૂમિ ત્રિશિખાઞ્ચલેન ॥ ૭૦॥

આવિધ્ય શૂલં ભુવિ સદ્ય એવ પાદાઙ્ગદં પશ્યતિ સુન્દરેશે ।
ભક્તસ્ય તે ન ક્ષતિરસ્તિ જાતુ શેષઃ સુખોત્યાહ સુતા હિમાદ્રેઃ ॥ ૭૧॥

આવિધ્યમાનાત્ ત્રિશિખાભિઘાતૈરધઃકપાલાજ્જગદણ્ડભિત્તેઃ ।
અમ્ભો યદણ્ડાવરણાયિતં તદુદ્બુદ્બુદં તત્ક્ષણમુદ્બભૂવ ॥ ૭૨॥

ત્રૈવિક્રમે કર્મણિ શાહિણાપિ પ્રવર્તિતં યત્ કિંલ પૂર્વમમ્ભઃ ।
અધોગતિં પ્રાપ તદેવ લેભે શિવાસ્ત્રયોગાદ્ ગતિમિત્થમૂર્ધ્વામ્ ॥ ૭૩॥

દિદૃક્ષમાણેન મહાદ્ભુતં તચ્છિવેન યાવન્નમિતો ન મૌલિઃ ।
તાવત્ સરસ્તકૃતમુત્તરઙ્ગં તતઃ સ્રવન્ત્યા વિબુધસ્રવત્યા ॥ ૭૪॥

સરસ્ત્રિશૂલપ્રભવં પુરારેસ્તથાત્યગાધં તદભૂત્ ક્ષણેન ।
યથાત્ર દેવોઽવતરન્ પ્લવેત ત્રિવિક્રમઃ ક્રાન્તજગત્ત્રયોઽપિ ॥ ૭૫॥

નૌર્વાન્ન રામાન્ન ચ કુમ્ભણેનેર્યસ્યાસ્તિ ભીતિસ્તદવેક્ષ્ય તીર્થમ્ ।
આશ્વાસમાજગ્મતુરર્ણવસ્થૌ શશ્વત્તમૌ તાવપિ કૂર્મમીનૌ ॥ ૭૬॥

આવિર્ભવન્તીઃ સલિલે સમન્તાદમ્ભોજિનીરુત્પલિનશ્ચિ તસ્મિન્ ।

દૃશૌ પિબન્ત્યૌ પરમસ્ય ધામ્નઃ પ્રીતિં પરાં પ્રાપતુરર્કચન્દ્રૌ ॥ ૭૭॥

ત્રૈગુણ્યરૂપં ત્રિશિખં હિ શમ્ભોર્ધીરા જગત્કારણમામનન્તિ ।
તત્સમ્પ્રસૂતેઽપિ સરસ્યમુષ્મિન્ કા હેતુચિન્તા કમલોત્પલાનામ્ ॥ ૭૮॥

શૈવાલનીલં બહિરમ્બુજાભમન્તર્ધટૈરુદ્ધ્રિયમાણમચ્છમ્ ।
ત્રૈગુણ્યરૂપં ત્રિશિખોદ્ભવં તદમ્ભો નિજાન્ હેતુગુણાન્ વ્યનક્તિ ॥ ૭૯॥

પ્રાચીનમબ્જં પરિહૃત્ય સદ્યો જગ્રાહ ભાનુર્જલજં તદીયમ્ ।
અત્રૈવ લક્ષ્મીઃ સ્થિતિમાબબન્ધ ચતુર્મુખોઽતશ્ચકમે પ્રસૂતિમ્ ॥ ૮૦॥

આચામત સ્વાત સરસ્યમુષ્મિન્નત્યામ્ભસા મામભિષિઞ્ચતેતિ ।
દેવાન્ મહર્ષીનપિ ચાન્વગૃહ્ણાદ્ વાચા ભગિન્યા વિભુરાગમાનામ્ ॥ ૮૧॥

ખાતં શૂલશિખાઞ્ચલેન સલિલૈઃ પૂતં જટાતીર્થજૈઃ
પ્રત્યક્ષેણ ચ શામ્ભવેન વિધિના પ્રાપ્તં પરાં ગ્રાહ્યતામ્ ।
તીર્થં તત્ પ્રતિપદ્ય તાપસગણા ભાગીરથી તત્યજુ-
ર્મન્દં ચાદરમાદધુઃ સુરગણા મન્દાકિનીસ્રોતસિ ॥ ૮૨॥

ઇતિ મહાકવિશ્રીનીલકણ્ઠદીક્ષિતપ્રણીતે શિવલીલાર્ગવે દ્વિતીયઃ સર્ગઃ ।

## અથ તૃતીયઃ સર્ગઃ ।

અથ જાતુ પુરન્દરઃ સુધર્મામધિતિષ્ઠન્ સહ સપ્તભિર્દિગીશૈઃ ।
અવિજેયમનુક્ષણોપચિત્યા વિમતં વૃત્રમમન્ત્રયદ્ વિજેતુમ્ ॥ ૧॥

ચતુરઙ્ગમિદં મહદ્ બલં નશ્ચતુરં ગન્તુમહો ન યત્સમીપમ્ ।
ન બલ ભુજયોઃ ક્રમેત તસ્મિન્નવશાદઞ્જલિબન્ધશિક્ષિતૌ યૌ ॥ ૨॥

અમૃતાશનજાતિમાત્રજેતર્યલમસ્ત્રાણિ ન તત્ર દૈવતાનિ ।
પરિવૃત્ત્ય પતેયુરાસુરાણિ પ્રબલં યૂથપતિં તમેત્ય સદ્યઃ ॥ ૩॥

નિકૃતિં શરણં વૃણીમહે ચેન્નિયમાદાપદિયં ક્ષમા તરીતુમ્ ।
નિરૃતિં પરિપૃચ્છતામુમર્થં સ હિ નઃ પુણ્યજનેતુ સમ્પ્રતીતઃ ॥ ૪॥

અસુરા હિ ભવેમ યુધ્યમાનાઃ કપટેનેતિ યદિ ત્થિતં મતં વઃ ।
અસુરત્વમપોક્ષિતં ચિરાન્નઃ સુરભાવાદતિગાર્હિતાદમુષ્માત્ ॥ ૫॥

સ હિ સમ્પ્રતિ સાગરાન્તરીપે ક્વચિદાલમ્બ્ય નિરાશ્રયં સમાધિમ્ ।
અવિશઙ્કિતમાસ્થિતસ્તપસ્યાં સુખજય્યો યદિ રોચતે ભવદ્ભ્યઃ ॥ ૬॥

ઇતિ વાદિનિ વલ્લભે સુરાણામનુજજ્ઞુર્હરિદીશ્વરાઃ સહર્ષમ્ ।
પ્રકૃતિર્હ્યપયે રુચિઃ પ્રજાનાં કિમુત સ્વામિનિ તાદૃશેપિ લબ્ધે ॥ ૭॥

સ હિ યત્ર તપશ્ચકાર વૃત્રસ્તદનુપ્રાપ્ય તપોવનં મહેન્દ્રઃ ।
પરમેણ સમાવિનોપવિષ્ટં પવિના તં વિનિપાતયામ્બભૂવ ॥ ૮॥

કૃતકૃત્યમમું નિવર્તમાનં કિયદપ્યપ્રતિસન્દધાનમેનઃ ।
વિકૃતા વપુષા વિકીર્ણકેશી સમમેવાનુસસાર વૃત્રહત્યા ॥ ૯॥

પુનરેત્ય યથાપુરં સુધર્માં પુરુહૂતઃ સ્તુવતો વિસૃજ્ય દેવાન્ ।
અવરોધમભીપ્સુરાલુલોકે વિશતીં સ્પેન સહૈવ વૃત્રહત્યામ્ ॥ ૧૦॥

અવકીર્ય પવિં વિકીર્ય કેશાનસમાલોચ્ય ચ કૃત્યમાપ્તવર્ગૈઃ ।
સ તયાનુગતઃ પલાયત દ્રાક્ સમરેષ્વપ્રતિમલ્લસાહસોઽપિ ॥ ૧૧॥

અપથં તદભીક્ષ્ણમાદૃતં યૈરપિ સાક્ષાદુપદિષ્ટમાદિતશ્ચ ।
જહસુઃ પ્રથમં ત એવ શક્રં પ્રકૃતીનાં પ્રભવત્સ્વયં સ્વભાવઃ ॥ ૧૨॥

વિપિનાદ્વિપિનં ગિરિં ગિરિભ્યો જલરાશેર્જલરાશિમન્તતશ્ચ ।
જગતો જગદપ્યયં પ્રધાવન્મુમુચે નૈવ તયા ધિયેવ જીવઃ ॥ ૧૩॥

નિપુણં સ પુરન્દરો વિલિલ્યે સરસિ ક્વાપિ સરોજનાળતન્તૌ ।
શતશઃ સમુપાત્તસપ્તતન્તોરવલમ્બાય બભૂવ કોઽપિ તન્તુઃ ॥ ૧૪॥

અવલોક્ય તદન્તરં ચિકીર્ષન્ નહુષો નામ નૃપોઽધિકારમૈન્દ્રમ્ ।
અનિયન્તૃકતાવિષાદમગ્નૈરનુમેને કથમપ્યમર્ત્યલોકૈઃ ॥ ૧૫॥

અયથાવદનુષ્ઠિતાશ્વમેધઃ કિયતા ચૈત્ર દિવં ગતઃ શુભેન ।
પ્રભુતામપિ વર્તયન્ સુરાગાં પ્રકૃતિં સ્વાં ન જહૌ તમઃપ્રધાનામ્ ॥ ૧૬॥

પૃથિવીમનુશાસતઃ પુરા યે રિપવસ્તત્ય મહીભુજો બભૂવુઃ ।
અધુના વિષયેષ્વસાવમીષામશિષદ્ વારિમુચો ન વર્ષતેતિ ॥ ૧૭॥

અહમસ્મ્યભિવર્ષુકઃ પ્રજાનાં યજનીયશ્ચ તતોઽહમેવ તાસામ્ ।
ક ઇમે હવિષો મખે નરાણામિતિ સર્વાનયમાક્ષિપત્ સુધાશાન્ ॥ ૧૮॥

સવનોપનતં હવિઃ સમસ્તં મયિ સંવેદય મદ્ગૃહીતશેષમ્ ।
પ્રતિપાદય તસ્ય તસ્ય પશ્ચાદિતિ મૂઢઃ પ્રશશાસ હવ્યવાહમ્ ॥ ૧૯॥

ઉદધેઃ સુરસિન્ધુતોયપૂર્ણાદુદપદ્યન્ત યદદ્ભુતાઃ પદાર્થાઃ ।
તદિયં નિપુણં વિશોધનીયેત્યખિલં ગાઙ્ગમવાકિરત્ સ તોયમ્ ॥ ૨૦॥

અવનેર્દિવમાગતાન્ સ્વયૂથ્યાનસકૃત્ તેષુ ચ શીલિતસ્વભાવાન્ ।
સ હિ મૂલબલં સમગ્રહીત્ સ્વં ન વિશશ્વાસ નિસર્ગદૈવતાનિ ॥ ૨૧॥

બહુભિત્તુરગૈર્ગજૈશ્ચ ભાવ્યં દ્યુતરૂન યાચત યદ્યમી ન દદ્યુઃ ।
વિનિપાતયતેતિ વીતશઙ્કં વનપાલાન્ પ્રશશાસ વૈધવેયઃ ॥ ૨૨॥

અવિતીર્ણફલા ઉપાસિતા અપ્યવનિસ્થેન પુરાત્મના સુરા યે ।
દ્વિગુણં ત્રિગુણં ચ નિર્દયૈસ્તાન્ દનુજૈરેવ સ દણ્ડયામ્બભૂવ ॥ ૨૩॥

અમરૈઃ પ્રતિમાસમદ્યમાનં કુલકૂટસ્થમવેક્ષ્ય ખેદિતોઽસૌ ।
અવનાય સમાદિદેશ ભૃત્યાન્ સિતપક્ષાત્યય એવ શીતભાનોઃ ॥ ૨૪॥

સ સ મિત્રમભૂદમુષ્ય યં યં પુરુહૂતો વિરુરોધ દાનવેષુ ।
કથયન્તિ કથામમુષ્ય યે યે કુપિતોઽયં જ્વલતિ સ્મ તેષુ તેષુ ॥ ૨૫॥

શયિતું પરિવર્તિતું ચ બિભ્યન્નયનૈર્નિર્નિમિષૈઃ સ સર્વગાત્રે ।
નયનાનિ વિભજ્ય નિર્જરા મે પ્રતિગૃહ્ણાન્ત્વિતિ સન્દિદેશ મૂર્ખઃ ॥ ૨૬॥

મૃગપક્ષિસરીસૃપા મનુષ્યાઃ પશવો યે નિહતાસ્ત્વયાશ્વમેધે ।
ત ઇમે વિચરન્તિ હન્તુકામા ઇતિ તં શશ્વદભીષયન્ત દેવાઃ ॥ ૨૭॥

ઇયમેવ શચીતિ દર્શયન્તો ગણિકાં કામપિ નિર્જરાઃ સુરાણામ્ ।
અતિસન્દધિરે સુખેન મૂઢં પ્રભુતા કા પ્રકૃતેરસમ્મતસ્ય ॥ ૨૮॥

શિબિકામધિરુહ્ય જાતુ ગચ્છન્ સ મહર્ષીન્ વિનિયુજ્ય તત્ર ધુર્યાન્ ।
અસકૃન્નિજગાદ સર્પ સર્પેત્યપિ તં કુમ્ભભવસ્તથા ભવેતિ ॥ ૨૯॥

અશનિર્ઝસમાપ્ત એવ ભોગે પતિતો મૂર્ધનિ તસ્ય શાપરૂપઃ ।
અત એવ પતન્નપિ ક્ષમાયાં નહુષો ન ત્યજતિ સ્મ ભોગિભાવમ્ ॥ ૩૦॥

ચિરલુપ્તકથે મઘોનિ તસ્મિન્નપિ તસ્ય પ્રતિરૂપકે પ્રનષ્ટે ।
અધિગન્તુમનાઃ પ્રવૃત્તિમૈન્દ્રીં યુયુજે યોગદૃશા ગુરુઃ સુરાણામ્ ॥ ૩૧॥

સરસીરુહનાળતન્તુલીનં સરસિ ક્વાપિ સમેત્ય યોગગૂઢઃ ।
પ્રતિબોધયતિ સ્મ દેશિકસ્તં કરણીયં કરુણાપ્લુતૈર્વચોભિઃ ॥ ૩૨॥

ચકિતઃ સમયં કિયન્તમસ્મિન્ સરસિ સ્થાસ્યસિ ખેદયન્નમર્ત્યાન્ ।
ન હિ સમ્યગનિષ્કૃતં તદેનઃ પ્રળયે પ્રાકૃતિકેઽપિ મુઞ્ચતિ ત્વામ્ ॥ ૩૩॥

સકલાઘનિબર્હણે સમાધૌ વસતસ્તસ્ય વધે તુ કઃ સમાધિઃ ।

ચરણં પરિહૃત્ય ચન્દ્રમૌલેઃ શરણં સંસરતાં યદાવિરિઞ્ચાત્ ॥ ૩૪॥

ચર પાશુપતવ્રતં ચરન્ સન્નવનાવાયતનાનિ શામ્ભવાનિ ।
અનુયાસ્યતિ કેવલં ન તુ ત્વામધિકુર્વીત શિવાજ્ઞયા તદેનઃ ॥ ૩૫॥

વિશતસ્તવ યત્ર સમ્પ્રસીદત્યમૃતેનેવ વિશોધિતોઽન્તરાત્મા ।
કરુણાવરુણાલયો મહેશઃ કલુષં તત્ર નિવારયિષ્યતીતિ ॥ ૩૬॥

સ તથેત્યભિનન્દ્ય શાસનં તત્ કલિતસ્વસ્ત્યયનશ્ચ દેશિકેન ।
અધિરુહ્ય સુરદ્વિપં પ્રતસ્થે વિવિધાન્યાયતનાનિ વિશ્વમૂર્તેઃ ॥ ૩૭॥

સ ગિરીન્ હિમશૈલકન્દરાદીન્ સરિતો જનુસુતાકલિન્દજાદ્યાઃ ।
વિપિનાનિ ચ નૈમિશાદિમાનિ વ્યચરત્ પાશુપતવ્રતી મહેન્દ્રઃ ॥ ૩૮॥

સ તપોવનદર્શમધ્યુવાસ પ્રયતઃ સન્નિમમજ્જ તીર્થદર્શમ્ ।
દ્વિજવેદમતર્પયદ્ ધનૌઘૈર્વ્રતવેદં નિયતઃ સમાચચાર ॥ ૩૯॥

ત્રિવિધાન્યપિ શામ્ભવાનિ લિઙ્ગાન્યયજદ્વસ્તુભિરાન્તરૈશ્ચ બાહ્યૈઃ ।
લભતે સ્મ ન શાન્તિમાત્મનોઽયં ક્વચિદપ્યેષુ કુતો હિ પાતકસ્ય ॥ ૪૦॥

સ તપાંસિ બહૂનિ તપ્યમાનઃ કલુષેણાનુયતાનુતપ્યમાનઃ ।
ભવબન્ધનિરાકારિષ્ણુશાખાપવનં નીપવનં સમાસસાદ ॥ ૪૧॥

ઉપહારમનુત્તમં પુરારેરવતંસોત્પલસૌરભં હરન્તઃ ।
અભિજગ્મુરિવાનિલાસ્તદીયા અતિથિં સ્વામિનમાગતં ચિરાય ॥ ૪૨॥

સ કદમ્બવનીપરાગલેશૈઃ શિવગઙ્ગોદકશીકરાનુવિદ્ધૈઃ ।
પવનોપહૃતૈઃ પતિઃ સુરાણાં પરમાં કામપિ નિર્વૃતિં જગાહે ॥ ૪૩॥

પ્રસસાદ મનઃ પ્રસેદુરક્ષીણ્યુપજજ્ઞે બલમુદ્બભૂવ શૌર્યમ્ ।
સ હિ સન્નિચકર્ષ યાવદિત્થં કલુષં વિપ્રચકર્ષ તાવદસ્ય ॥ ૪૪॥

અતિહૃષ્ટમનાઃ સ તૈર્નિમિત્તૈરનુસન્ધાય ગિરં પુરોધસસ્તામ્ ।
પરિનિશ્ચિનુતે સ્મ તત્ ત્રિલોક્યાં પરમં ધામ હરિઃ પરસ્ય ધામ્નઃ ॥ ૪૫॥

સકલાદ્ભુતધામ્નિ સીમ્નિ તસ્યાં સહસૈવાયમવાપ્લુતો ગજેન્દ્રાત્ ।
પ્રયતઃ પ્રવિવેશ કાનનં તત્ સહ સર્વૈશ્ચ વિના તદેકમેનઃ ॥ ૪૬॥

સ દદર્શ ફણાતપત્રગુપ્તાન્ નકુલાનાતપતાપિતાનહીનામ્ ।
અપિ દૃપ્તચરત્તરક્ષુદંષ્ટ્રામુખકણ્ડૂયિતલોચનાં કુરઙ્ગીમ્ ॥ ૪૭॥

સ લતાં કમપિ દ્રુમં પ્રપન્નાં સવિધસ્થાન્યતરૂપગૂહભીત્યા ।
પ્રતિસંહૃતપલ્લવામપશ્યત્ પરિકૃષ્ટામપિ કૌતુકાત્ કિરાતૈઃ ॥ ૪૮॥

ઉપહૃત્ય ચલદ્રુમપ્રવાલાન્ કદલીરિક્ષુલતા મૃણાલિનીશ્ચ ।
નમતઃ શતશો હરેઃ સમક્ષં ન વિષેહે વનકુઞ્જરાન્ સુરેભઃ ॥ ૪૯॥

પથિ વીક્ષિતવદ્ભિરાદરેણ પ્રમથૈઃ પાશુપતૈર્મહર્ષિભિશ્ચ ।
સવિધં તપસાતિનિર્મલોઽયં સમુપાનીયત સુન્દરેશ્વરસ્ય ॥ ૫૦॥

અવિચિન્ત્યમદૃષ્ટમશ્રુતં ચ ત્રિષુ લોકેષ્વપિ દિવ્યલિઙ્ગમેતત્ ।
વિકચૈર્નયનોત્પલૈર્બિડૌજા વિચકાર પ્રથમોપહારહેતોઃ ॥ ૫૧॥

પ્રમદાશ્રુપરિપ્લુતૈસ્તદાનીં નયનૈરાચરણાગ્રમાલલાટમ્ ।
દ્રવતાં પ્રતિપદ્ય ભક્તિયોગાદ્ દદૃશે વારિમયીવ તસ્ય મૂર્તિઃ ॥ ૫૨॥

અથ દણ્ડવદાનતસ્ય શમ્ભૌ દદૃશે દૃષ્ટિમયી તનુર્મઘોનઃ ।
ઉપહારકૃતે પુરો વિકીર્ણા વિકચેન્દીવરમાલિકેવ દિવ્યા ॥ ૫૩॥

સગણં સવૃષં સનન્દિકેશં સસુતં સામ્બમપિ પ્રભું તમાદ્યમ્ ।
પરિપૂજયિતું ચકાઙ્ક્ષ શક્રો મહતામેવ મનોરથોઽપિ તાવાન્ ॥ ૫૪॥

સ્મૃતસન્નિહિતોઽથ વિશ્વકર્મા સહ દિવ્યેન પુરોધસા તદાનીમ્ ।
શિરસા પ્રતિગૃહ્ય ભર્તુરાજ્ઞામયતિષ્ટાયતનાય ચન્દ્રમૌલેઃ ॥ ૫૫॥

વિધૃતં કરિભિર્વિમાનરૂપં વિપુલં પ્રાક્પ્રતિહારમેકભૂમમ્ ।
શિખરોલ્લિખિતામ્બરં સ શિલ્પી વિદધે ગર્ભગૃહં શુભે વિલગ્ને ॥ ૫૬॥

અતિસુન્દરમર્ધમણ્ડપં ચ પ્રતિહારત્રયભાવિતાન્તરેણ ।
મહતા મણિમણ્ડપેન સક્તં વિદધે વિશ્વશુભાય વિશ્વકર્મા ॥ ૫૭॥

પ્રતિમાઃ પરિવારદેવતાનાં વિવિધાન્યાયતનાનિ તત્ર તાસામ્ ।
પરિતઃ પરિતોઽપિ પઞ્ચ સાલાનકરોદુન્નતગોપુરોપગૂઢાન્ ॥ ૫૮॥

શુભવાસ્તુનિ શૂલપુષ્કરિણ્યા રુચિરે રોધસિ પશ્ચિમે સ શિલ્પી ।
ભવનં મણિચિત્રિતં ભવાન્યા ગણનાથસ્ય ચ કલ્પયામ્બભૂવ ॥ ૫૯॥

અપરાનપિ મણ્ડપપ્રભેદાનભિતશ્ચોત્સવવીથિકા વિશાલાઃ ।
અસૃજત્ સ મરુત્વતોઽનુરૂપાન્ પ્રભુતાભક્તિવિવેકપાટવાનામ્ ॥ ૬૦॥

પ્રહસદ્વદનં પ્રસન્નનેત્રં દ્વિભુજં દક્ષિણતો ધૃતોત્પલં ચ ।
કરકોપલવદ્ ઘનીભવન્ત્યા દયયેવાકૃત વિગ્રહં સ દેવ્યાઃ ॥ ૬૧॥

અધિકાનિ મમેત્યહર્નિશં યૈર્મઘવા શોચતિ લોચનૈઃ સમન્તાત્ ।
અવલોક્ય સ વિશ્વકર્મકર્માણ્યલમેતાનિ કિમિત્યશોચદેભિઃ ॥ ૬૨॥

દયિતસ્ય દિદૃક્ષતેઽપસવ્યં વપુરેષા કિલ વામભાગગેતિ ।
કૃતમિઙ્ગિતવેદિના મઘોના પદમસ્યાઃ કિમુ દક્ષિણેન શમ્ભુમ્ ॥ ૬૩॥

અતિચારુમશેષલક્ષણાઢ્યં લલિતં બિમ્બમિમં સ્વતો વિવિક્ષુમ્ ।
હરિરર્થયતે સ્મ શક્તિમાદ્યાં ગુરુરાવાહયદન્વમંસ્ત શમ્ભુઃ ॥ ૬૪॥

અખિલં જગદાત્મસમ્પ્રસૂતં પરિપુષ્ણાતિ દૃગેવ યત્ કિલાસ્યાઃ ।
અભિધામપિ મીનલોચનેતિ વ્યદધાદિન્દ્રપુરોહિતસ્તતોઽસ્યાઃ ॥ ૬૫॥

નિયતાં કનકારવિન્દપૂજાં દિવિજૈઃ કર્તુમના હરિઃ સરોજૈઃ ।
પવનં પ્રજિઘાય દેવદૂતં સ્વયમસ્નાદથ શૂલપુષ્કરિણ્યામ્ ॥ ૬૬॥

કૃતનિત્યવિધૌ વિલમ્બમાને શિવમભ્યર્ચયિતું ક્ષણં સુરેશે ।
કમલૈરુદભાવિ જાતરૂપૈઃ કમલિન્યામતિસૌરભૈરમુષ્યામ્ ॥ ૬૭॥

સ્વયમાહરદર્ચનાય શમ્ભોઃ સુરભીણ્યમ્બુરુહાણિ કાઞ્ચનાનિ ।
કનકામ્બુજિનીતિ નામ તસ્યાઃ કલયન્ વિસ્મિત એષ સસ્મિતશ્ચ ॥ ૬૮॥

ક્વ નુ કાઞ્ચનતા ક્વ સૌરભં તદ્ દિવિ સઙ્કલ્પભવેષુ પઙ્કજેષુ ।
પ્રભવત્યખિલં હિ નિર્જરાણાં ધ્રુવમાધ્યાસિકતત્તદર્થવન્નઃ ॥ ૬૯॥

સલિલૈરતિપાવનૈસ્તદીયૈઃ કમલૈરપ્યતિસૌરભૈર્મહેન્દ્રઃ ।
પરિપૂજ્ય શિવૌ ગુરુક્તરીત્યા પ્રણિપાતૈઃ પરિતોષયામ્બભૂવ ॥ ૭૦॥

અપિ ગદ્ગદયા પ્રમોદબાષ્પૈરપિ સારોજ્ઝિતયાતિસમ્ભ્રમેણ ।
પિતરૌ પ્રિયકપ્રિયૌ સુરેશઃ સ ગિરાનર્ચ વચઃપથવ્યતીતૌ ॥ ૭૧॥

ભુવિ સુન્દરમાસ્પદં તવૈતચ્છિવલિઙ્ગં તુ તતોઽપિ સુન્દરં તે ।
અપિ સુન્દરમેવ સુન્દરાણામભિધાનં વચનામૃતં ત્વદીયમ્ ॥ ૭૨॥

સમસેવિષિ મન્દરે હિમાદ્રૌ કલધૌતાચલકન્દરેઽપિ ચ ત્વામ્ ।
વિદિતન્તુ પરં ન વિશ્વપારં કિમુ તત્રૈવમસીતિ કાપિ શઙ્કા ॥ ૭૩॥

ન મખૈર્ન જપૈર્ન હોમદાનૈર્ન તપોભિર્વિવિધૈશ્ચ લભ્યતે યત્ ।
તદિદં તવ સન્નિધાનભાગ્યં તરુભિઃ કૈરપિ ભુજ્યતે નિરીહૈઃ ॥ ૭૪॥

નિહતા દનુજા જિતા ત્રિલોકી ત્રિદિવે ચાધિકૃતં તતઃ કિમાસીત્ ।

ઇહ યે મૃગપક્ષિણો ન હીમાનપિ નીરાજ્ય વિમોક્તુમર્હતા મે ॥ ૭૯॥

અપવૃજ્ય કિમીશ! સાધયેયં ભવદાનન્દમવાપ્નુયાં તદાહમ્ ।
કિમિતોઽપ્યધિકઃ સ યો મમાસાવુચિતઃ સ્વામ્યુપલમ્ભજઃ પ્રમોદઃ ॥ ૭૬॥

જડમેવ જગત્ તવ સ્વમાસીદજડાઃ કેચન માદૃશોઽપિ જીવાઃ ।
અતિવાઙ્મમનસં ભવન્તમેવ પ્રતિપન્નાસ્તુ વયં પ્રશાસિતારમ્ ॥ ૭૭॥

વચનાવસરો ન લભ્યતે નસ્ત્વયિ મીનાક્ષિ ! શિવાવિનાકૃતાયામ્ ।
ઇતિ દેવિ! પૃથક્ કૃતાસિ કિઞ્ચિત્ તમિમં મા કુરુ માનસેઽપરાધમ્ ॥ ૭૮॥

ગિરિરાજકુમારિકામપિ સ્વં વિપિનેષ્વદ્રિષુ ચાનુવર્તમાનામ્ ।
ભવતીં પ્રિયકપ્રિયેઽનુરોદ્ધું સ્વયમધ્યાસ્ત શિવઃ કદમ્બમૂલમ્ ॥ ૭૯॥

જગતો જગદીશ્વરસ્ય ચ શ્રીર્ભવતી યદ્યપિ સર્વતોઽસ્તિ પૂર્ણા ।
કરુણામયમુત્સહે ન હાતું તવ મીનાક્ષિ ! તથાપિ રૂપમેતત્ ॥ ૮૦॥

હરયસ્ત ઇમે મહાવનેઽસ્મિન્નયમિન્દ્રદ્રુરસાવપીન્દ્રવલ્લી ।
મમ નામજુષઃ સ્થિતા યદેતે મમ સેવેયમિતિ પ્રતીચ્છ માતઃ! ॥ ૮૧॥

કતિ સન્તુ ન વેધસઃ કતીન્દ્રાસ્તવ મીનાક્ષિ ! તરઙ્ગિતૈરપાઙ્ગૈઃ ।
કિમધશ્ચ્યવતે મયા વિના દ્યૌઃ કૃપણં માં ઘટયસ્વ કિઙ્કરેષુ ॥ ૮૨॥

વ્યગલદ્ દનુજેષુ મત્સરો મે વિરરામ ત્રિદિવોપભોગરાગઃ ।
સ્થગિતા બહિરેવ વૃત્રહત્યા ભવતોરદ્ય મયિ પ્રસાદલેશાત્ ॥ ૮૩॥

ઇતિ તં પ્રણિપત્ય સંસ્તુવન્તં પ્રથમં ભક્તિમતાં પતિં સુરાણામ્ ।
અનુગૃહ્ય દયોર્મિલૈરપાઙ્ગૈરગદિષ્ટામિદમાદિમૌ યુવાનૌ ॥ ૮૪॥

આદ્યસ્ત્વમેષામસિ પાર્ષદાનાં કુમારયોશ્ચામ્યનયોસ્તૃતીયઃ ।
જાનીવહે તે પરમાં ચ ભક્તિં વિદ્રાવિતા સા તવ વૃત્રહત્યા ॥ ૮૫॥

વાસન્તિકપ્રથમપર્વસુ વાસવ! ત્વમિત્થં સમેત્ય સકલૈરનુયાયિવર્ગૈઃ ।
આવિશ્વપારનગરાભિમુખાત્ પ્રયાણાદભ્યર્ચ નૌ કનકવારિરુહૈરમીભિઃ ॥ ૮૬॥

ઇત્યુક્તે સતિ જગદાદિદમ્પતિભ્યા-
    મિન્દ્રસ્તદ્ગુરુરિતરેઽનુયાયિનશ્ચ ।
પ્રસ્થાનપ્રણતિપરમ્પરાભિરેતા-
    વન્યોન્યાભ્યધિકદયામયૌ વિતેનુઃ ॥ ૮૭॥

આમન્ત્ર્ય દ્વિરદેન્દ્રવક્રમસકૃત્ સમ્પ્રાર્થ્ય નન્દીશ્વરં

સમ્માન્ય પ્રમથાન્ નિવેદ્ય સકલં ચણ્ડેશ્વરં શામ્ભવમ્ ।
આશીર્ભિઃ પ્રતિનન્દિતો મુનિગણૈરાપૃચ્છ્ય વાચસ્પતિં
દિવ્યેન દ્વિરદેન નિર્મલતરો દેવઃ પ્રતસ્થે પુરીમ્ ॥ ૮૮॥

ઇતિ મહાકવિશ્રીનીલકણ્ઠદીક્ષિતપ્રણીતે શિવલીલાર્ણવે તૃતીયઃ સર્ગઃ ।

## અથ ચતુર્થઃ સર્ગઃ ।

નિવૃત્તે વાસવે તસ્મિન્ નિવૃત્તં ચાન્તરે મનોઃ ।
ઇન્દ્રાઞ્ચકાર કોઽપ્યન્યો વૃન્દારકનિકેતને ॥ ૧॥

અભ્રમાતઙ્ગમારુહ્ય વિભ્રમાદમરેશ્વરઃ ।
સંવૃતઃ સકલૈર્દેવૈર્નિર્જગામ પુરાદ્ બહિઃ ॥ ૨॥

સર્વાસામપિ સિદ્ધીનાં દુર્વાસા નિધિરદ્ભુતઃ ।
સમગચ્છત તેનાભ્રે સ હિ ગચ્છન્ યદૃચ્છયા ॥ ૩॥

પરિપાલયિતું રૌદ્રીં પ્રતિસર્ગાધિકારિતામ્ ।
તસ્ય ન જ્વલતિ ક્રોધો યસ્યૈકા જગદાહુતિઃ ॥ ૪॥

અ ગ્ન્યગારગતે તસ્મિન્નનાહૂતાગતાઃ સ્વયમ્ ।
સન્દર્શયન્તિ સ્વાત્માનં દેવા આવાહનક્ષણે ॥ ૫॥

નાનુગચ્છતિ તસ્યાગ્નિર્ન વિષ્યન્દયતે હવિઃ ।
નાપક્ષયતિ સન્ત્રસ્તો ન નિર્મન્થે વિળમ્બતે ॥ ૬॥

અતપત્તપનાકારમજ્વલજ્જ્વલનોપમમ્ ।
દૃષ્ટ્વૈવ તં મુનિં દેવાસ્તત્રયુસ્તત્ર સુસ્થિતાઃ ॥ ૭॥

પાણિભ્યામપ્રમત્તોઽસૌ પ્રસાદં પદ્મમૈશ્વરમ્ ।
ગજસ્કન્ધગતાયાપિ દદૌ રાજેતિ વજ્રિણે ॥ ૮॥

અનાદૃત્ય સ તં મોહાન્નિદધે મૂર્ધ્નિ દન્તિનઃ ।
શુણ્ડયા સોઽપ્યુપાદાય નિષ્પિપેષ નિસર્ગતઃ ॥ ૯॥

આભુજ્ય સ ભ્રુવૌ કિઞ્ચિદાવર્ત્ય કપિલે દૃશૌ ।
પ્રજજ્વાલેવ કોપેન મુનિઃ પ્રસ્ફુરિતાધરઃ ॥ ૧૦॥

પસ્પન્દે ન સહસ્રાંશુસ્તસ્તમ્ભે મારુતસ્તદા ।
ચકમ્પે સાર્ણવા પૃથ્વી વિવ્યને કેવલં નભઃ ॥ ૧૧॥

સ હસ્તિહસ્તિપકયોઃ શાપં ઘોરમવાસૃજત્ ।
વજ્રં વજ્રિઆણ દુર્વારમઙ્કુશં ચ નિરઙ્કુશે ॥ ૧૨॥

મૌલિં ભેત્સ્યતિ પાણ્ડ્યોઽસ્ય મદાન્ધસ્ય દિવસ્પતેઃ ।
સઞ્ચરત્વવનાવેષ કુઞ્ચરઃ ક્ષુદ્રદન્તિવત્ ॥ ૧૩॥

દત્તશાપતયા કિઞ્ચિદ્ દગ્ધેન્ધનમિવાનલમ્ ।
પ્રશામ્યન્તમમું દેવાઃ પ્રણિપાતૈરસાન્ત્વયન્ ॥ ૧૪॥

સમ્ભ્રમોદ્વેગકાર્પણ્યસ્તમ્ભપ્રણતિસાન્ત્વનૈઃ ।
પ્રસાદાભિમુખસ્તેષાં પ્રાહ માહેશ્વરો મુનિઃ ॥ ૧૫॥

પાણ્ડ્યો ભિનત્તુ તર્હ્યસ્ય મૌલિં મકુટલક્ષણમ્ ।
સુન્દરેશાર્ચનાન્તશ્ચ શાપઃ સ્વર્દન્તિનોઽસ્ત્વિતિ ॥ ૧૬॥

મહેન્દ્રસવિધાવાસવાસનારસિકશ્ચિરાત્ ।
મહેન્દ્ર એવ શૈલેન્દ્રે જન્મ લેભે મુરાદ્વિપઃ ॥ ૧૭॥

આમૂલમગ્નદન્તઃ સ ખેલાસુ બિભિદે ભુવમ્ ।
ધર્તુકામ ઇવ સ્કન્ધે તામેવોદ્ધૃત્ય સાર્ણવામ્ ॥ ૧૮॥

મદગન્ધેન ધાવન્તિ યેષામન્યે મતઙ્ગજાઃ ।
કર્ણાનિલેન તે તસ્ય કલભસ્યાપિ દુદ્રુવુઃ ॥ ૧૯॥

સ સિંહાન્ શુણ્ડયાદાય ચિક્ષેપ તૃણપૂલવત્ ।
પાદૈરેવ મહાગ્રાહાન્ ભેકમર્દં મમર્દ ચ ॥ ૨૦॥

ગ્રાહા ગ્રસન્તે હર્યક્ષા ઘ્નન્તિ ગૃહ્ણન્તિ માનવાઃ ।
ઇત્યુચ્યમાનં કળભૈરાશ્ચર્યમિવ સોઽશૃણોત્ ॥ ૨૧॥

સરિત્સરાંસિ પીતાનિ સકૃદાકૃષ્ય શુણ્ડયા ।
મદધારાપદેશેન મન્યે તસ્ય પ્રસુસ્રુવુઃ ૨૨॥

સ મત્તઃ સઞ્ચરન્ પૃથ્વીં ચરણૈરપચસ્કરે ।
લઘૂકરિષ્યન્નિવ તાં દિગ્ગજાનુજિઘૃક્ષયા ॥ ૨૩॥

અજાનિવ ગજાનન્યાનાદાયાદાય ચિક્ષિપે ।
સ એવ પુઙ્ગજસ્તત્ર વશાસ્તસ્યાભવન્ પરે ॥ ૨૪॥

સ ખેલન્ સાગરસ્યામ્ભઃ ક્ષિપન્ મન્દાકિનીં પ્રતિ ।
દયયા ચિરવિશ્લિષ્ટૌ દમ્પતી તાવયોજયત્ ॥ ૨૫॥

પશ્યન્ મધ્યમલોકસ્ય રામણીયકમદ્ભુતમ્ ।
પાંસુભિઃ સ કરોદ્ધૂતૈશ્ચકારેવ દિવં ભુવમ્ ॥ ૨૬॥

વિદ્રવદ્ભિર્વને તસ્મિન્ વ્યાધવ્યાઘ્રમૃગાધિપૈઃ ।
મૃગાણાં રક્ષણાદાસીન્મૃગેન્દ્રઃ સોઽદ્ભુતઃ ક્ષિતૌ ॥ ૨૭॥

મહેન્દ્રાદેષ મલયં મલયાદપિ દર્દરમ્ ।
સઞ્ચરન્ જાતુચિત્ પ્રાપ કુઞ્જરો નીપકાનનમ્ ॥ ૨૮॥

મદગન્ધાશયા પ્રાપ્તૈર્મધુપૈર્વિપિનાત્ તતઃ ।
સમ્પ્રદર્શિતવર્ત્મેવ સ યયૌ હેમપદ્મિનીમ્ ॥ ૨૯॥

ગણેશમદનિષ્યન્દગન્ધસર્વસ્વવેદિનઃ ।
ઉપેક્ષાં ભ્રમરાશ્ચક્રુરુન્મદાસ્તન્મદામ્ભસિ ॥ ૩૦॥

સ પતન્નેવ સરસિ ક્ષીરોદ ઇવ મન્દરઃ ।
કલ્લોલૈઃ પ્લાવયામાસ કદમ્બવિપિનાન્તરમ્ ॥ ૩૧॥

મલિનો નિર્મમજ્જાસ્મિન્નુન્મમજ્જાથ નિર્મલઃ ।
પ્રાગભૂત્ કેવલો ભૌમઃ સાર્વભૌમોઽથ દન્તિનામ્ ॥ ૩૨॥

ઉત્તીર્ય બહિરન્તશ્ચ નીરજા નરિજાકરાત્ ।
અતીયાય સ તં શાપમધીયાય મુનેર્ગિરઃ ॥ ૩૩॥

ગાઙ્ગેયૈઃ શૈવગાઙ્ગેયૈઃ કમલૈઃ કમલાસ્પદૈઃ ।
એકદન્તં ચતુર્દન્તઃ સિન્ધુરં સિન્ધુરોઽર્ચયત્ ॥ ૩૪॥

પુષ્કરૈરભિષિચ્યેશૌ પુષ્કરોપહૃતૈરયમ્ ।
પુષ્કરૈરેવ ચાનર્ચ પુષ્કરં ગાહિતું પુનઃ ॥ ૩૫॥

સિતં હિ કાઞ્ચનં પુષ્પં શિવસ્યૈવાભવન્મુદે ।
પિશઙ્ગં તુ તદાનીતં પ્રીતયે શિવયોરભૂત્ ॥ ૩૬॥

મુક્તશાપો ગજઃ પૃથ્વીં મુદા યદપચક્રે ।
ગજતીર્થમિતિ ખ્યાતં તદ્ બભૂવ મહત્ સરઃ ॥ ૩૭॥

ઐરાવતેશ્વરં લિઙ્ગમૈરાવતવિનાયકમ્ ।
સ તીરે સરસસ્તસ્ય સ્થાપયિત્વાભ્યપૂજયત્ ॥ ૩૮॥

પુરન્દરેશ્વરં નામ પૂર્વતઃ સુન્દરેશિતુઃ ।

સ્વામિનામાઙ્કિતં લિઙ્ગં સ્થાપયામાસ ચાપરમ્ ॥ ૩૯॥

પ્રહિતઃ સુન્દરેશેન સ હિ તત્ર ચિરં વસન્ ।
પુનર્જગામ સ્વં ધામ પુરુહૂતેન ચાદૃતઃ ॥ ૪૦॥

કદમ્બવિપિનાત્ પ્રાચિ કલ્યાણનગરે તતઃ ।
કાલેન મહતા જજ્ઞે કશ્ચિદ્વૈશ્યો ધનઞ્જયઃ ॥ ૪૧॥

અસ્ત્રાય ગત્વા દેવેન કૃતયુદ્ધં ગતસ્પૃહઃ ।
કૌરવ્યમત્યશેતાયમૂરવ્યસ્તુ ધનઞ્જયઃ ॥ ૪૨॥

તસ્ય ભૂમિસ્પૃશો ભક્તિં તરુણેન્દુશિખામણૌ ।
ભક્તિરાગન્તુકાન્યેષાં કથં વાનુકરિષ્યતિ ॥ ૪૩॥

(દશૈકાદશિકાઃ! ) પ્રાયો વણિજશ્ચતુરા અપિ ।
એકં દત્વેહ સોઽમુત્ર તત્સહસ્રમુપાર્જયત્ ॥ ૪૪॥

પરક્ષેત્રપરામર્શપરિશઙ્કી ધનઞ્જયઃ ।
નોત્સસર્જ બહિર્જાતુ સ ગોષઙ્ગવમાત્મનઃ ॥ ૪૫॥

વૃત્તિઃ સા હિ વિશાં યત્તુ ભુવમુલ્લિખ્ય જીવનમ્ ।
સ તુ તત્ કર્મ તત્યાજ દિવમુલ્લિખ્ય કેવલામ્ ॥ ૪૬॥

અક્રીણીતૈવ પુણ્યાનિ વ્યક્રીણીત ન જાત્વપિ ।
સમયેષૂપયોગાય સર્વમેવ જુગોપ સઃ ॥ ૪૭॥

સ બહૂન્ વિષયાન્ ગત્વા વાણિજ્યાય ધનઞ્જયઃ ।
નિવૃત્તો નીપકાન્તારસમીપં સાયમાયયૌ ॥ ૪૮॥

અદૃશ્યત સહસ્રાંશુરસ્તભૂધરમસ્તકે ।
મન્દેહયુદ્ધલબ્ધાસૃક્પઙ્કદિગ્ધ ઇવારુણઃ ॥ ૪૯॥

અર્કમસ્તં ગમિષ્યન્તમુપેત્યાનુચરાઃ કરાઃ ।
અન્વગન્વગલમ્બન્ત દુદ્રુવુર્યે પુરઃ પુરઃ ॥ ૫૦॥

નિન્દન્તો રજનીં કોકા નન્દન્તસ્તાં ચકોરિકાઃ ।
ચઞ્ચૂચઞ્ચવિ સાયાહ્ને સર્વતઃ સમ્પ્રજહ્રિરે ॥ ૫૧॥

પ્રચુક્રુશુર્દ્વિજાઃ કેચિદપરે મૌનમાસ્થિતાઃ ।
અસઙ્ઘાતો દ્વિજાનામિત્યાસીત્ તથ્યં તદા વચઃ ॥ ૫૨॥

પ્રતીચ્યાં દદૃશે રાગઃ સ સ્થાસ્યતિ કિયચ્ચિરમ્ ।
પ્રાચ્યાં દૃષ્ટચરો હ્યેષ ભાસ્વતો ભ્રામ્યતઃ સદા ॥ ૫૩॥

પ્રનષ્ટે મહસાં રાશૌ પ્રાદુર્ભૂતં હિ તારકૈઃ ।
તમસાભ્યાવૃતે લોકે તાવદ્ભિરપિ કિં કૃતમ્ ॥ ૫૪॥

ત એવ ભાનવો ભાનોસ્તારકાવપુષા સ્થિતાઃ ।
તથાપ્યેકઃ સ નાસ્તીતિ તમાંસિ વિજજૃમ્ભિરે ॥ ૫૫॥

પ્રાયો જાત્યનુરોધાય પદ્મમાત્રે નિમીલતિ ।
ભાનુહસ્તગતેનાપિ પઙ્કજેન નિમીલિતમ્ ॥ ૫૬॥

તથા સાન્દ્રીભવન્તિ સ્મ તમાંસિ હરિતાં મુખે ।
વ્યાપ્નુવન્તિ હિ તાન્યેવ વિહન્યન્તે યથા મિથઃ ॥ ૫૭॥

શૈવલોત્પલભૃઙ્ગાણાં સરસીષુ નિશામુખે ।
સ્પર્શસૌરભકૂજાભિઃ સ્વં સ્વં રૂપમબુધ્યત ॥ ૫૮॥

નિષ્પપાતેવ ગગનં નિસ્સસારેવ સાગરઃ ।
આવવારેવ નિશ્શેષમવિદ્યા મહતી તદા ॥ ૫૯॥

અયશ્શૃઙ્ખલવત્ ક્રષ્ટુમાહર્તું તૃણપૂલવત્ ।
આશ્યાનપકવચ્છેત્તુમાસીચ્છક્યં તદા તમઃ ॥ ૬૦॥

અનિમ્તાર્યેણ મનસાપ્યનાવ્યેન ચ રંહસા ।
સ્રોતસેવાન્ધકારસ્ય સ નિન્યે નીપકાનનમ્ ॥ ૬૧॥

સોમવારોપવાસેન સોઽધ્વખેદેન તાવતા ।
વિપ્રયોગેણ સાર્થાઞ્ચ વિવ્યથે કેવલં તદા ॥ ૬૨॥

નોન્નતાનિ ન નિમ્નાનિ ન નમ્રા ન ચ પાદપાઃ ।
સર્વમેકમભાત્ તસ્ય સાન્નિધ્યાદિવ શામ્ભવાત્ ॥ ૬૩॥

અશ્રૌષીદશ્રુતચરમમૃતસ્યેવ નિર્ઝરમ્ ।
ગાનમાતોદ્યસમ્ભિન્નં ગન્ધર્વાણામદૂરતઃ ॥ ૬૪॥

સ તચ્છબ્દાનુસારેણ સમ્પ્રસર્પઞ્છનૈઃ શનૈઃ ।
દયયા દેવદેવસ્ય દિવ્યં ચક્ષુરધારયત્ ॥ ૬૫॥

સ દિવ્યલિઙ્ગમાભિતઃ સન્દદર્શ સુરાનૃષીન્ ।
ધ્યાયતો ગાયતઃ સામાન્યર્ચતશ્ચાભિષિઞ્ચતઃ ॥ ૬૬॥

નનૃતુઃ પ્રમથાઃ ક્વાપિ જગુઃ સામાનિ સામગાઃ ।
નનૃતુર્દેવસુદૃશો જગુરન્યત્ર કિન્નરાઃ ॥ ૬૭॥

કમલૈઃ કનકાબ્જિન્યા વિમલૈરુભયૈરપિ ।
સ સુરૈઃ સાર્ધમાનર્ચ શર્વાણીચન્દ્રશેખરૌ ॥ ૬૮॥

પ્રભાતાયાં ચ શર્વર્યાં પ્રવૃત્તે જનચઙ્ક્રમે ।
સ યત્રૈક્ષિષ્ટ દેવર્ષીસ્તત્રૈક્ષિષ્ટ તરૂન્ મૃગાન્ ॥ ૬૯॥

સ તુ તેનાદ્ભુતેનૈવ નિર્વૃત્તામૃતપારણઃ ।
વ્રતાઙ્ગં પારણાં કર્તું પ્રાપ નેદીયસીં પુરીમ્ ॥ ૭૦॥

દ્રમિડાન્વયમૂર્ધન્યો દ્વિતીય ઇવ વાસવઃ ।
પ્રશશાસ મહીં યત્ર પાર્થિવઃ કુલશેખરઃ ॥ ૭૧॥

સઙ્ગમ્ય બન્ધુભિઃ સાર્ધં વિશ્રમ્ય ચ યથાસુખમ્ ।
વૃત્તં વિજ્ઞાપયામાસ રાજ્ઞે સર્વં સ્વમદ્ભુતમ્ ॥ ૭૨॥

સ જાતુ પુરુષં કઞ્ચિચ્ચન્દ્રચૂડજટાધરમ્ ।
નિદ્રાણોઽન્તર્દૃશાદ્રાક્ષીન્નૃપતિઃ કુલશેખરઃ ॥ ૭૩॥

નન્વસ્તિ નગરાદસ્માત્ પશ્ચિમં નીપકાનનમ્ ।
વન્યૈર્મૃગગણૈઃ સાર્ધં વસામોઽત્ર ચિરં વયમ્ ॥ ૭૪॥

તદ્વનં નગરીકૃત્ય તદેવાધિવસન્ સ્વયમ્ ।
કુલમુદ્ધૃત્ય વત્સ! ત્વં કુરુ નામેદમર્થવત્ ॥ ૭૫॥

ઇત્યુક્ત્વાન્તર્હિતે તસ્મિન્નિન્દુચૂડે દયાનિધૌ ।
પ્રત્યબુધ્યત સંહૃષ્ટઃ પ્રત્યૂષે કુલશેખરઃ ॥ ૭૬॥

અદ્ભુતં સ્વપ્નવૃત્તાન્તમાપ્તેષુ ચ મહત્સુ ચ ।
આવેદયન્ નૃપઃ પ્રાતરભ્યનન્ધત તૈરપિ ॥ ૭૭॥

નિશ્ચિત્યાનુગ્રહં શમ્ભોર્નિર્મિત્સુર્વિપિનં પુરમ્ ।
સમ્પ્રતસ્થે મહીપાલઃ સાવરોધઃ સબાન્ધવઃ ॥ ૭૮॥

પ્રસ્થિતસ્યાગ્રતો વામં પ્રવૃત્તસ્તસ્ય ખઞ્જનઃ ।
કટાક્ષ ઇવ મીનાક્ષ્યાઃ કલયન્ ભાવિ મઙ્ગળમ્ ॥ ૭૯॥

સ કદમ્બવનં પ્રાપ્ય સન્દદર્શ મહાદ્ભુતમ્ ।

હૈમપ્રાકારસમ્બાધમૈન્દ્રં ધામ મહેશિતુઃ ॥ ૮૦॥

સ દૃષ્ટ્વા સામ્બમીશાનં સમ્પ્રાર્થ્ય ચ ગણાધિપમ્ ।
ન્યયુઙ્ક્ત શિલ્પિનો દક્ષાન્નિર્મિત્સુર્નગરં નૃપઃ ॥ ૮૧॥

સર્વે તે વિશ્વકર્માણઃ સર્વે કુશલતામયાઃ ।
સમેત્ય મન્ત્રયાઞ્ચક્રુઃ શિલ્પિનઃ પુરકર્મણિ ॥ ૮૨॥

સ્વસ્તિકં સર્વતોભદ્રં મણ્ડલં દીર્ઘવૃત્તકમ્ ।
નિર્મિત્સમાના નગરં તે વિપ્રાવાદિષુર્મિથઃ ॥ ૮૩॥

શિલ્પિષ્વેક ઇવાગત્ય સિદ્ધઃ સ્વપ્રેક્ષિતઃ પુરઃ ।
ઇતિકર્તવ્યતાં તેષામુપાદિક્ષત્ પ્રભોઃ પુરઃ ॥ ૮૪॥

સ્વપ્નદર્શનસંવાદિઃ તદ્રૂપં તસ્ય ચિન્તયન્ ।
યાવદ્ દદર્શ નૃપતિસ્તાવદન્તરધત્ત સઃ ॥ ૮૫॥

પશ્યન્નનુગ્રહં શમ્ભોઃ સ્વપ્નજાગરયોઃ સમમ્ ।
ઉત્સેહે સ તુ ભૂયોઽપિ પાર્થિવઃ પુરકર્મણિ ॥ ૮૬॥

અપિ તદ્વિપિનં સાન્દ્રમજ્ઞાતાલોકસઙ્કથમ્ ।
શાસનાત્ પાણ્ડ્યનૃપતેર્જાતં જાઙ્ગલવત્ ક્ષણાત્ ॥ ૮૭॥

તપનેન્દુકરાલીઢે તસ્મિન્ દિષ્ટ્યા વનોદરે ।
બ્રહ્મચર્યં જહુશ્ચક્રા દુર્ભિક્ષં ચ ચકોરિકાઃ ॥ ૮૮॥

ચરન્તો જન્તવો યત્ર જાતા વનચરાઃ પુરા ।
તદેવાસીદ્ વનચરં તત્ક્ષણં તસ્ય શાસનાત્ ॥ ૮૯॥

ષણ્ણામપ્યધ્વનામન્તે શાશ્વતં પદમૈશ્વરમ્ ।
ઇતિ શ્રુત્વૈવ સિદ્ધાન્તમધ્વાન્તં તદયં વ્યધાત્ ॥ ૯૦॥

અપ્યાન્તરતમો હિર્તુર્બાહ્યે તમસિ કા ક્ષમા ।
લાભોઽયં યચ્છિવાદારાદિયન્તં કાલમાસ્ત તત્ ॥ ૯૧॥

ઘાતઙ્ઘાતમિહ વ્યાઘ્રાન્ ગ્રાહઙ્ગ્રાહં શુભાસ્ત્વચઃ ।
અહરન્ વસ્ત્રદુર્ભિક્ષં કિઙ્કરાસ્તસ્ય શાઙ્કરમ્ ॥ ૯૨॥

સંવર્તે તત્ર સત્ત્વાનાં સમગૃહ્યન્ત કુઞ્જરાઃ ।
સર્વ એવ શુભઃ કાલઃ સ્વરૂપં યદિ સુન્દરમ્ ॥ ૯૩॥

સાલમભ્રઙ્કષં ચક્રુઃ સાલં છિત્વા સહસ્રશઃ ।
કિં સાધ્યં બહુભિઃ ક્ષુદ્રૈર્વરમેકો મહોચ્છ્રિતઃ ॥ ૯૪॥

વપ્રક્રિયાસુ નિર્મગ્નૈર્દન્તૈરમરદન્તિનામ્ ।
શૃઙ્ગેષુ તસ્ય સાલસ્ય ગવાક્ષા વિપ્રતેનિરે ॥ ૯૫॥

પરિખાં ખનતસ્તત્ર પ્રવિષ્ટાનારસાતલમ્ ।
કે યૂયં સગરાણામિત્યન્વયુઙ્જત પન્નગાઃ ॥ ૯૬॥

પરિખારન્ધ્રતસ્તત્ર પાતાળાજ્જાહ્નવીજલમ્ ।
જલયન્ત્રાદિવોત્તસ્થૈઃ ભૂમ્યન્તં ભૂતલાચ્ચ્યુતમ્ ॥ ૯૭॥

ભગિનીં ભાગનીશં ચ દ્રષ્ટું પ્રાકારકૈતવાત્ ।
ઉન્મમજ્જેવ મૈનાકઃ પરિખાસાગરાત્ તતઃ ॥ ૯૮॥

રાજસિંહૈર્નરવ્યાઘ્રૈઃ પૂરિતં ભટકુઞ્જરૈઃ ।
પુરં યથાપુરં જજ્ઞે કા તસ્યાન્યોપમા ભવેત્ ॥ ૯૯॥

છિન્દદ્ભિસ્તદ્વનં તત્ર શેષિતં યત્ ક્વચિત્ ક્વચિત્ ।
તાન્યેવ તસ્યોદ્યાનાનિ સર્વતઃ પ્રચકાશિરે ॥ ૧૦૦॥

વીથિકા ઉત્સવાર્થા યા વિહિતા વિશ્વકર્મણા ।
ચતુર્ણામપિ વર્ણાનાં તા એવાસન્ પૃથક્પૃથક્ ॥ ૧૦૧॥

પાણ્ડરૈર્ભવનૈઃ પૂર્ણે પ્રાકારે ધામ શામ્ભવમ્ ।
મધ્યેમૌક્તિકતાટઙ્કં રેજે રત્નમિવાર્પિતામ્ ॥ ૧૦૨॥

દિશિ ચોત્તરપૂર્વસ્યાં દેવદેવસ્ય મન્દિરાત્ ।
નિર્મલં ભવનં રાજ્ઞો નિર્મમુસ્તસ્ય શિલ્પિનઃ ॥ ૧૦૩॥

પ્રાસાદઃ શુશુભે તત્ર ભવને ધરણીપતેઃ ।
ભક્ત્યા મહશિતુર્વૃધ્ધઃ પ્રસાદ ઇવ નિર્મલઃ ॥ ૧૦૪॥

દિવ્યૈઃ સુધામયૈર્મેઘૈર્દેવો જીમૂતવાહનઃ ।
નગરં સેચયામાસ નવીનં ત્રીણ્યહાનિ સઃ ॥ ૧૦૫॥

મધુરોદકસંસિક્તી મધુરેયં મહાપુરી ।
ઇત્યશ્રૂયત તત્રત્યૈર્દિવ્યા વાગશરીરિણી ॥ ૧૦૬॥

દુર્ગાગણેશવટુકેશ્વરમાતૃવર્ગૈ-
  રધ્યાસિતાં સુવિહિતેષુ નિજાસ્પદેષુ ।

સદ્યઃ પ્રવર્તિતમહેશમહોત્સયાન્તે
    પાણ્ડ્યો વિવેશ નગરી મધુરાં પ્રહૃષ્ટઃ ॥ ૧૦૭॥

અર્થૈરર્થિજનાઞ્છ્રુતૈઃ શ્રુતવતઃ સમ્માનનૈર્બાન્ધવાન્
    સેવાભિર્મહતો નિસર્ગકરુણાવત્યા સ ભૃત્યાન્ દૃશા ।
આત્માનાત્મવિવેકતો ગિરિશમપ્યારાધયન્ મેદિનીં
    ભૂપાલઃ કુલશેખરોઽત્ર બુભુજે સપ્તાર્ણવીવેષ્ટિતામ્ ॥ ૧૦૮॥

ઇતિ મહાકવિશ્રીનીલકણ્ઠદીક્ષિતપ્રણીતે શિવલીલાર્ણવે ચતુર્થઃ સર્ગઃ ।

## અથ પઞ્ચમઃ સર્ગઃ ।

સ ઇત્થમારાધિતચન્દ્રશેખરપ્રસાદસમ્પત્પરિપાકસમ્ભૃતમ્ ।
કુલાવતંસં કુલશેખરો નૃપશ્ચિરાય લેભે મલયધ્વજં સુતમ્ ॥ ૧॥

સ પાંસુકેલીષ્વપિ શઙ્કરાલયાન્ પ્રકલ્પયન્ બ્રહ્મપુરીશ્ચ સર્વતઃ ।
પ્રપઞ્ચમાતામહતાપદોચિતં નરેન્દ્રસૂનુર્વ્યહરન્મ હાયશાઃ ॥ ૨॥

અથોપનીતોઽધિજગે નૃપાત્મજસ્ત્રયીં મુનેઃ કુમ્ભભવાત્ પુરોધસઃ ।
સમં મહાસ્ત્રૈર્ધનુરાગમં પિતુઃ સ્વતશ્ચ ભક્તિં શિવયોરચઞ્ચલામ્ ॥ ૩॥

અશેષવિદ્યાનિધિમાત્તયૌવનં કુમારમેનં કુલશેખરો નૃપઃ ।
યુયોજ દારક્રિયયા કુલાર્હયા શ્રિયેવ ધર્મં ક્ષમયેવ વિક્રમમ્ ॥ ૪॥

નૃપસ્ય કાઞ્ચીપુરનેતુરાત્મજા મહાશયા કાઞ્ચનમાલિકાભિધા ।
નરેન્દ્રસૂનોર્ગૃહિણીષુ વલ્લભા બભૂવ તારાસ્વિવ રોહણી વિધોઃ ॥ ૫॥

પુરા હિ વિશ્વાવસુનામશાલિનો બભૂવ ગન્ધર્વપતેરિયં સુતા ।
પ્રસાદ્ય ગૌરીં જગદેકમાતરં મમૈધિ કન્યેત્યવૃણીત યા વરમ્ ॥ ૬॥

સુશીલતાં સુન્દરતામિવોજ્જ્વલાં દયાર્દ્રતાં ભૃત્યજનેષુ તે ઇવ ।
દધે પુનસ્તા ઇવ ભક્તિમીશ્વરે મનસ્વિની કાઞ્ચનમાલિકા તદા ॥ ૭॥

સુતાનિવ સ્વાન્ પરિપુષ્ણતી જનાન્ સભાજયન્તી શ્વશુરૌ શિવાવિવ ।
પતિં તુ પૂર્વેદ્યુરિવાપરેદ્યુરપ્યુપાચરદ્ દૈવતજીવિતાધિકમ્ ॥ ૮॥

પતિવ્રતા ધર્મપથપ્રવર્તિકા સતી ચ ભર્તુર્વપુરર્ધમેવ સા ।
શરીરમાત્મા હૃદયં ચ જીવિતં દૃશૌ ચ જજ્ઞે દયિતસ્ય સા પુનઃ ॥ ૯॥

મહત્સુ કાર્યેષ્વમહત્સુ વા યયોઃ કદાપિ વૈમત્યકથાપિ નાભવત્ ।

અભૂત્ તયોરેવ મિથોઽનુરાગિણોરનઙ્ગમૂલઃ કલહઃ સ કેવલમ્ ॥ ૧૦॥

સ યુક્તદામ્પત્યમુનિર્વૃતં સુતં સ્વતો વિનીતં ગુરુભિશ્ચ સર્વતઃ ।
ત્રિલોકરક્ષાક્ષમબાહુવિક્રમં જનેશ્વરઃ પ્રેક્ષ્ય ચિરાય નિર્વવૌ ॥ ૧૧॥

ધૃતાં ચિરાય ત્રિજગદ્ધુરન્ધરે ધુરં ધરાયાસ્તનયેઽવરોપયન્ ।
સ્વતઃ સ્થિતં ધર્મપથેઽપિ તં પુનઃ શશાસ ધર્મં સુતવત્સલો નૃપઃ ॥ ૧૨॥

મહત્ કુલં નસ્ત્વમવૈષિ વિશ્રુતં મહેશચૂડામણિસમ્ભવં શુચિ ।
અનક્ષજિદ્ભિર્મનસાપિ દુર્ભરામવૈષિ વત્સ! ત્વમિમામપિ ક્ષમામ્ ॥ ૧૩॥

નવોઢયાપિ પ્રકૃતિપ્રગલ્ભયા શ્રિયૈવ તાવત્ પ્રથમં વિમોહિતાઃ ।
ન જાનતે કિઞ્ચિદસાધુ સાધુ વા નિસર્ગતસ્તાત ! નૃપાલસૂનવઃ ॥ ૧૪॥

પ્રસઞ્જયન્તિ પ્રથમં વિમાર્ગગાંસ્તતઃ ક્રમેણ સ્તુવતે ચ તાન્ પુનઃ ।
પ્રવર્તયન્ત્યપ્યપથે શનૈઃ પ્રભું ખલાઃ સ્વકાર્યૈકપરાઃ સમીપગાઃ ॥ ૧૫॥

ઉપક્ષિપન્તશ્ચકિતા ઇવાદિતો નિષિધ્યમાના ઇવ કૈશ્ચિદન્તરા ।
સુખેન દોષં દ્રઢયન્તિ સાધુષુ સ્તુવન્ત એવ સ્વગિરા દુરાશયાઃ ॥ ૧૬॥

પરં કૃતજ્ઞા ઇવ પણ્ડિતા ઇવ પ્રભોહિતૈકપ્રવણા ઇવ સ્વતઃ ।
જગત્તટસ્થા ઇવ રાશિ બાલિશે જનાઃ સ્વમર્થં ઘટયન્ત્યસાધવઃ ॥ ૧૭॥

સ્તુવન્ત્યમિત્રાન્ સુહૃદં પ્રતિક્ષિપન્ત્યવેક્ષિતું ભર્તુરગાધમાશયમ્ ।
બહૂન્ વિવાદાનિવ કુર્વતે મિથો ન જાતુ ભિન્દન્તિ રહસ્થિતિં ખલાઃ ॥ ૧૮॥

ઇદં હ્યુપાદેયમિદં તુ હેયમિત્યુભે વિવિઞ્ચન્ નિજયૈવ મેધયા ।
ખલાન્ નિગૃહ્ણીષ્વ તદુક્તિવાગુરાગૃહીતવન્મુગ્ધવદાચરન્ બહિઃ ॥ ૧૯॥

જના જિહાસન્તિ નૃપાલમૂષ્મલં તિરશ્ચિકીર્ષન્તિ મૃદુન્નિસર્ગતઃ ।
અતોઽપ્રમત્તસ્ત્વમનુષ્ણશીતલો ભવ પ્રજાનાં શરદીવ ભાસ્કરઃ ॥ ૨૦॥

અલોલુભાનાત્મવિદો જિતસ્મયાન્ પરીક્ષિતાંશ્ચ વ્યસનેષુ ભૂયસા ।
મહાકુલીનાન્ મહતો બહુશ્રુતાન્ ગૃહાણ મન્ત્રેષ્વખિલેષુ મન્ત્રિણઃ ॥ ૨૧॥

પ્રસાદકોપૈર્ભવતિ ક્ષમાપતેરતિપ્રવૃત્તૈરધરોત્તરં જગત્ ।
અતઃ પ્રવર્તસ્વ જનેષ્વતન્દ્રિતો વિચારધારાવિશદેન ચેતસા ॥ ૨૨॥

બહુશ્રુતો ન ત્વમિવાપરોઽધુના ન દીર્ઘદર્શી ન ચ મન્ત્રયોગવિત્ ।
પ્રશાસનીયસ્તદપિ સ્વયં ભવાન્ પ્રશાસિતારસ્તવ સન્તુ મન્ત્રિણઃ ॥ ૨૩॥

અજાતશત્રોરખિલાર્થવેદિનઃ પ્રજાનુરાગૈકપદસ્ય ધીમતઃ ।
તવ પ્રકૃત્યા ગુરુવૃદ્ધસેવિનો મયોપદેશ્ય કિમિવાત્ર વર્ત્તતે ॥ ૨૪॥

તથાપિ કિઞ્ચિદ્ દિગિયં પ્રદર્શિતા શ્રુતા બહુભ્યો બહુધાર્ચયા મયા ।
પરસ્તુ ભાવો મમ તાત! વર્તતે કુરુષ્વ તં ચેતસિ મા સ્મ વિસ્મરઃ ॥ ૨૫॥

નિજાવતંસપ્રસવોદ્ભવે કુલે ન્યધાયિ લક્ષ્મીરિયતીયમીદૃશી ।
મહેશ્વરેણેતિ વિદન્ન જાતુચિદ્ મમત્વમસ્યાં કુરુ રાજ્યસમ્પદિ ॥ ૨૬॥

યજામ દેવાન્ જુહવામ પાવકે દદામ વિપ્રેષ્વપિ વા કથં કથમ્ ।
શિવસ્વમાદાય ભુવીતિ ચિન્તયન્ શિવં સમારાધય સર્વકર્મભિઃ ॥ ૨૭॥

શિવં યજાગ્નૌ શિવમર્ચ ભાસ્કરે શિવં સ્મરાન્તઃ શિવમેવ કીર્તય ।
શિવં દ્વિજેષુ પ્રતિપૂજયાનિશં શિવૈકનિષ્ઠો ભવ તાત! સર્વથા ॥ ૨૮॥

શિવાત્ પરં નાસ્તિ યથા તથૈવ નઃ શિવોઽપિ નાન્યો મધુરેશ્વરાદિતિ ।
સુનિશ્ચિતાલમ્બિતસુન્દરેશ્વરઃ સુખં મહીં પાલય શાશ્વતીઃ સમાઃ ॥ ૨૯॥

ઇતિ ક્ષિતીશઃ પ્રતિબોધયન્ સુતં પ્રયુજ્ય ચાસ્મિન્ પ્રણતે જયાશિષઃ ।
સમાઃ સહસ્રાણિ ષડાત્મના ધૃતાં ધુરં સ ગુર્વીમવતાર્ય નિર્વવૌ ॥ ૩૦॥

તતઃ સ યોગેન તનું પ્રજેશ્વરો વિસૃજ્ય નાડ્યા કિલ મૂર્ધલગ્નયા ।
અતીત્ય માયાભુવનાનિ સર્વતો જગામ શુદ્ધેઽધ્વનિ ધામ શાશ્વતમ્ ॥ ૩૧॥

ઉદક્રમીદેષ યદા તદા પ્રભૃત્યુપેત્ય વિજ્ઞાનકલાગ્રગણ્યતામ્ ।
અભૂત્ સહાયઃ કરણીયપઞ્ચકેઽપ્યનન્તરુદ્રસ્ય ધિયા વિશુદ્ધયા ॥ ૩૨॥

વિદન્નનિત્યં જગદેવ જન્મવદ્ વિદન્નપિ શ્લાઘ્યતરાં ગતિં પિતુઃ ।
મનોઽભિતપ્તં મલયધ્વજો નૃપઃ શશાક ન સ્થાપયિતું વશે વશી ॥ ૩૩॥

કથઞ્ચિદાલમ્બ્ય નિજાં સ ધીરતાં ગુરોરશેષા નિરવર્તયન્ ક્રિયાઃ ।
તથાવિધાનાં તનયાશ્ચરન્તિ યત્ તદર્હણં કેવલમાત્મભૂતયે ॥ ૩૪॥

પુરોધસા સિન્ધુપિબેન યોગિના સ મન્ત્રિવૃદ્ધૈઃ સખિભિશ્ચ બન્ધુભિઃ ।
શુભે મુહૂર્તે ધુરિ સુન્દરેશિતુઃ સિતેન ફાલે ભાસતેન લાઞ્છિતઃ ॥ ૩૫॥

સ્વતશ્ચ્યુતં લિઙ્ગશિરસ્પદાત્ સુમં પુરઃ સ્ફુલિઙ્ગાનપિ દીપનિસ્સૃતાન્ ।
પ્રશસ્યમાનં શકુનં મહર્ષિભિઃ પ્રણમ્ય મૂર્ધ્ના જગૃહે મહીપતિઃ ॥ ૩૬॥

પ્રદક્ષિણીકૃત્ય પુરં પુરન્ધ્રિભિઃ પ્રવર્તિતારાત્રિકમઙ્ગલો નૃપઃ ।
પ્રવિશ્ય રાજ્ઞો ભવનં પરિષ્કૃતં દ્વિજાન્ પ્રભૂતૈર્દ્રવિણૈરતોષયત્ ॥ ૩૭॥

સુભદ્રપીઠે સચિવૈર્નિવેશિતઃ સભાજયામાસ નૃપોઽનુજીવિનઃ ।
યથોચિતં વાહનભૂષણામ્બરૈઃ કટાક્ષમન્દસ્મિતભાષિતૈરપિ ॥ ૩૮॥

ભુવં ભુજે ભૂતદયાં હૃદન્તરે કથાં પુરારેરપિ કર્ણયોર્દ્વયોઃ ।
અધત્ત ભૂષામનપાયિનીમસૌ પરાસ્તુ સોઽવત્ત પુનર્ન્યધત્ત ચ ॥ ૩૯॥

યશઃપ્રતાપૈર્હરિતોઽસ્ય ભૂષિતાઃ કુલં ત્વનેનૈવ વિભૂષિતં વિભોઃ ।
અયં તુ ધૃત્યા દયયા ચ ભૂષિતઃ શિવે તુ ભક્ત્યા સકલં વિભૂષિતમ્ ॥ ૪૦॥

યશોભિરસ્યાવદદુર્વિસૃત્વરૈરપિ દ્વિરેફદ્વિપકાકકોકિલાઃ ।
સ્વતોઽવદાતાનિ તુ પૂર્વભૂભૃતાં યશાંસિ સદ્યો મલિનાનિ જજ્ઞિરે ॥ ૪૧॥

તદીયવિશ્રાણનપોષિતદ્વિજપ્રવર્ત્યમાનાધ્વરહવ્યભોજિભિઃ ।
સુધાશવર્ગૈઃ પરિપોષિતાઃ કથં સુરદ્રુમા બિભ્રતિ તેન તુલ્યતામ્ ॥ ૪૨॥

તદીયદાનોદકપૂરિતોઽર્ણવસ્તતો નિપીયામ્બુ દિશન્તિ વારિદાઃ ।
તદમ્બુપુષ્ટૌષધિવલ્લભઃ શશીત્યદઃપ્રસાદાદખિલસ્ય દાતૃતા ॥ ૪૩॥

સમૃદ્ધિમદ્ભિર્વરયા સમૃદ્ધ્યા દ્વિજાતિભિસ્તદ્વિષયે નિવાસિભિઃ ।
ધૃતા કથઞ્ચિત્ તદનુગ્રહેચ્છયા તદીયદાનેષ્વપિ સમ્પ્રદાનતા ॥ ૪૪॥

ન કોઽપિ તસ્યાતિચચાર રાષ્ટ્રગઃ સ યત્ર દણ્ડં વિનિપાતયેન્નૃપઃ ।
નચાપિ દણ્ડ્યઃ સ્વયમાત્મનોઽભવાન્નિવૃત્તિશીલૈઃ કરણૈર્નિસર્ગતઃ ॥ ૪૫॥

વિનેતરિ સ્વામિનિ વીતકલ્મષે વિનિન્યિરે તદ્વિષયે પ્રજાઃ સ્વતઃ ।
તપોધને દ્વન્દ્વજયિન્યવસ્થિતે તદાશ્રમસ્થા ઇવ હિંસ્રજન્તવઃ ॥ ૪૬॥

વિચક્ષણેઽસ્મિન્ વ્યસનાન્યપોહિતું તટસ્થવૃત્તૌ સરલે હિતૈષિણિ ।
અપિ પ્રજાઃ સ્વાન્ કલહાન્ ગૃહેગૃહે નિચિક્ષિપુર્ન્યાસમિવાવિશઙ્કિતાઃ ॥ ૪૭॥

અકૃષ્ટપચ્યૈઃ કલમૈરલઙ્કૃતા ન વૃષ્ટિમપ્યસ્ય ચકાઙ્ક્ષ મેદિની ।
સ્મરન્ હવિઃ સ્વીક્રિયમાણમધ્વરે વવર્ષ કાલેષુ તથાપિ વાસવઃ ॥ ૪૮॥

અનિચ્છતાન્તઃકરણેન નિર્ગમં વિના શિવારાધનમન્યકર્મસુ ।
સ્વરાજ્યતન્ત્રં સકલં ચ કેવલૈશ્ચકાર બાહ્યૈઃ કરણૈર્મહીપતિઃ ॥ ૪૯॥

ધરા સમસ્તા દ્વિજદેવસાત્કૃતા દિવં દ્વિષદ્ભ્યોઽપિ દદૌ સહસ્રશઃ ।
અપિ સ્વમાત્માનમદત્ત શમ્ભવે કિમપ્યદેયં દદૃશેઽસ્ય ન પ્રભોઃ ॥ ૫૦॥

અનુસ્મરન્નક્ષરમક્ષરં ગુરોઃ સ પાર્થિવેન્દ્રશ્ચરમૌપદેશિકમ્ ।

અવાલલમ્બે ભૃશમમ્બિકાપતેઃ પદં સમસ્તામરસમ્પદાં પદમ્ ॥ ૫૧॥

તપાંસિ તેપે યુયુજે મનો દૃઢં દદાવિયાજાધિજગે જુહાવ ચ ।
નૃપો નિશશ્વાસ મિમેષ ચાન્તતઃ શિવં યજામીતિ ધિયૈવ નાન્યથા ॥ ૫૨॥

પ્રપઞ્ચસર્ગસ્થિતિભઙ્ગહેતુતાપરમ્પરાવિશ્રમભૂમિમાદિમામ્ ।
હરીન્દ્રવેધોહરમાતરં શિવાં વિશિષ્ય વવ્રે શરણં જનેશ્વરઃ ॥ ૫૩॥

મૃગાઙ્કચૂડામણિમીનલોચનં દયામયં દર્શિતમુન્દરસ્મિતમ્ ।
ઉદારભૂષાશતમુત્પલાઙ્કિતં વપુસ્તદેવાસ્ય મનસ્યવર્ત્તત ॥ ૫૪॥

જગત્ સમસ્તં સ જડાજડાત્મકં દદર્શ દેવો નિમિષન્મિષન્નપિ ।
ઉપાત્તનીલોત્પલમુન્નતસ્તનં હસન્મુખં હારકિરીટભૂષિતમ્ ॥ ૫૫॥

નિમેષનિશ્વાસવદપ્રયત્નતઃ સ રાજ્યતન્ત્રં સકલં ચ વર્તયન્ ।
બભૂવ વાચા મનસાપિ કર્મણા શિવૈકસંસ્થો મલયધ્વજો નૃપઃ ॥ ૫૬॥

અદૃશ્યમશ્રાવ્યમચિન્ત્યમદ્ભુતં નિરઞ્જનં નિત્યમનુશ્રવાશ્રવમ્ ।
અહઙ્ગ્રહેણાન્તરચિન્તયન્નૃપઃ પરાકૃતદ્વૈતકથં પરં મહઃ ॥ ૫૭॥

પરસ્પરેણાનુપમર્દિતં ભજન્ ત્રિવર્ગમિત્થં સમયં વિભજ્ય સઃ ।
કદાચિદન્તઃપુરમાસ્થિતો નૃપઃ પ્રચક્રમે કાઞ્ચનમાલયા કથામ્ ॥ ૫૮॥

કુલં કિલૈતદ્ વિપુલં મુધાનિધેઃ પ્રસક્તવિચ્છેદમિવાન્તરા મયા ।
અતઃ કથં સ્યાચ્છિવદાસસન્તતેરભઙ્ગ ઇત્યસ્તિ સચિન્તતા મમ ॥ ૫૯॥

ન નઃ કુલેઽસ્મિન્ શિવદીક્ષયામલે સુતાન્નિવાપઃ પિતૃભિર્જિધૃક્ષિતઃ ।
મહન્મહેશાનુચરાર્પણવ્રતં તથાપિ મા લોપિ મયેતિ ચિન્ત્યતે ॥ ૬૦॥

ઇદં હિ મર્ત્યામૃતમિત્યુદીરિતં પ્રજાયતે યન્મનુજઃ પ્રજામનુ ।
અતઃ પ્રસાધ્યૈવ કિલાપરામૃતં પરામૃતાયોપનમેદિતિ શ્રુતિઃ ॥ ૬૧॥

શિવાર્પિતાશેષભરા નિરાશિષઃ શિવાર્ચનામાત્રપરાધિકારિણઃ ।
કથં નુ યાચેમહિ લોકમાતરં કથં ન યાચેમહિ વા કુલક્ષયે ॥ ૬૨॥

ઇતિ સ્વતોઽનધ્યવસાયમુદ્રિતં પતિં વિષીદન્તમિયં પતિવ્રતા ।
જગાદ વાક્યૈર્હૃદયાનુરઞ્જિભિર્જગત્તપસ્યાપરિપાકજન્મભિઃ ॥ ૬૩॥

ભવાન્ પ્રમાણં વિશયે વિપશ્ચિતાં ભવન્તમસ્મિન્નનુશાસ્તુ કોઽપરઃ ।
વિવેક્તુમત્રાર્હતિ મીનલોચના તથાવિધઃ કોઽપ્યથ વા તદાશ્રિતઃ ॥ ૬૪॥

અનાવૃતજ્યોતિષિ તેજસાં નિધાવનાગતાતીતભવદ્વિવેચિનિ ।
તદત્ર તિષ્ઠેમહિ કુમ્ભસમ્ભવે સ ખલ્વિહામુત્ર ચ નઃ પ્રશાસિતા ॥ ૬૫॥

ઇતિ પ્રિયાયા હૃદયઙ્ગમં વચો નિપીય દેવો નિભૃતેન ચેતસા ।
જગામ સદ્યઃ શરણં પુરોધસં સ ચ સ્મૃતઃ સન્નિદધે તપોધનઃ ॥ ૬૬॥

તમર્ઘ્યપાદ્યાદિકયા સપર્યયા સભાજયન્તૌ પ્રણિપત્ય તાવુભૌ ।
નિવેશ્ય પીઠે નવરત્નનિર્મિતે નિષેદતુસ્તત્સવિધે તદાજ્ઞયા ॥ ૬૭॥

કૃતાઞ્જલિં પાર્થિવમગ્રતસ્થિતં તથાવિધાં કાઞ્ચનમાલિકામપિ ।
દૃશાનુગૃહ્ણન્ કરુણાર્દ્રયા મુનિર્ગિરં પ્રભાવાનુગુણામુદાહરત્ ॥ ૬૮॥

મહત્ કિલેદં શિવયોગિનાં કુલં ન યત્ર શક્યં જનિતું પૃથગ્જનૈઃ ।
તદત્ર મીમાંસિતમદ્ભુતં ત્વયા શ્રુતમ્ય શીલસ્ય કુલસ્ય ચોચિતમ્ ॥ ૬૯॥

પ્રવૃત્તિધર્મં કતિચિત્ ક્વચિદ્વિદુર્નિવૃત્તિધર્મઃ સુતરામગોચરઃ ।
અમું કિલાર્થં વિમૃશન્ત આસતે મહર્ષયો બ્રહ્મસદસ્યહર્નિશમ્ ॥ ૭૦॥

ન નિત્યનૈમિત્તિકકર્મશીલતા કદાપિ નૈષ્કર્મ્યવિરોધમર્હતિ ।
પતેદિમાં પ્રત્યુત સન્ત્યજન્નિતિ સ્મરન્તિ શિષ્ટાઃ સ્વયમાચરન્તિ ચ ॥ ૭૧॥

ઋણાર્થવાદૈરધિગત્ય નિત્યતામપત્યવેદાધ્યનાગ્નિકર્મસુ ।
સમં પ્રવૃત્તા ગૃહિણમ્તપોધના નિવૃત્તિનિષ્ઠા અપિ ગૌતમાદયઃ ॥ ૭૨॥

રહસ્યમપ્યત્ર ચિરાય ગોપિતં તવોપદેશ્યં હૃદિ તાત! વર્તતે ।
સમાધિનિર્ધૂતમલેન ચેતસા ગૃહાણ કાલોઽયમુપસ્થિતઃ શુભઃ ॥ ૭૩॥

ઇયં હિ પત્ની ભવતઃ પુરા ચિરાદુપાન્ત દેવીમિહ મીનલોચનામ્ ।
જગજ્જનન્યા જનની ભવેયમિત્યપિ પ્રપેદે વરમન્યદુર્લભમ્ ॥ ૭૪॥

પતિસ્ત્વમસ્યૈ શિવયૈવ કલ્પિતઃ સમુલ્લિખન્ત્યાવતરં નિજં ક્ષિતૌ ।
ઇદં તુ ચિન્ત્યં નિપુણં કથં પુનઃ પરાત્પરં વસ્તુ તદાવિરસ્ત્વિતિ ॥ ૭૫॥

ક્રિયાવતામગ્નિમુપાશ્રિતા સતી દદાતિ યા નૈકવિધાન્ મનોરથાન્ ।
અતોઽદ્ય વૈતાનિકહવ્યવાહનાદુદેતુ સેતિ પ્રતિભાતિ ભૂયસા ॥ ૭૬॥

ઇતીરિતે તેન વિનેદુરુચ્ચકૈરનાહતા દુન્દુભયો દિવૌકસામ્ ।
નૃપસ્ય દેવ્યા અપિ દક્ષિણેતરે વિલોચને પ્રાસ્ફુરતાં ચ તત્ક્ષણમ્ ॥ ૭૭॥

પ્રદક્ષિણીકૃત્ય સ વિન્ધ્યમર્દનં પતિઃ ક્ષિતેઃ કાઞ્ચનમાલયા સમમ્ ।
પ્રણમ્ય રોમાઞ્ચિતવિગ્રહોઽભવત્ પ્રમોદબાષ્પસ્થગિતાભિરુક્તિભિઃ ॥ ૭૮॥

ક્વ સા ચિદાનન્દમયી જગત્પ્રસૂઃ ક્વ કિમ્પચા નૌ ભગવન્નિમૌ જનૌ ।
અહો ભવત્પાદરજઃપ્રમાર્જનપ્રભાવસમ્પત્પરિપાક ઈદૃશઃ ॥ ૭૯॥

તવાસ્મિ સૂનુસ્તવ તાત! કિઙ્કરસ્તવ સ્વભૂતોઽસ્મિ સહાનુબન્ધિભિઃ ।
યથાનુગૃહ્ણાસિ તથાચરેયમિત્યસાવિયાનેવ મનોરથો મમ ॥ ૮૦॥

ઇતિ પ્રપન્નં મલયધ્વજં નૃપં શતાશ્વમેધાવભૃતાપ્લુતં મુનિઃ ।
સ ભાવિકર્મણ્યધિકારસિદ્ધયે શશાસ ભૂયો હયમેધકર્મણિ ॥ ૮૧॥

ઇત્થં પ્રસાદવિહિતાશિષિ કુમ્ભયોનૌ
યાતે તપોવનપદં પુનરેતુકામે ।
આરાધયત્ ક્ષિતિપતિઃ શિવમશ્વમેધ-
સમ્ભારસમ્ભરણસમ્ભ્રમતોઽપિ તાવત્ ॥ ૮૨॥

ઇતિ શ્રીમહાકવિનીલકણ્ઠદીક્ષિતપ્રણીતે શિવલીલાર્ણવે પઞ્ચમઃ સર્ગઃ ।

## અથ ષષ્ઠઃ સર્ગઃ ।

આહર્તું યયુમભિતો યયુર્નિયુક્તા મર્ત્યા યે કિલ મલયધ્વજેન રાજ્ઞા ।
લબ્ધ્વા તે ક્વચિદથ સોમપાત્મજં દ્રાગાજહ્રુઃ સ્વયમપિ સોમપં તુરઙ્ગમ્ ॥ ૧॥

વિસ્તીર્ણામથ તપનીયપઙ્ક્તિજિન્યા વ્યાતેનુસ્તટભુવિ તસ્ય યજ્ઞશાલામ્ ।
આરાદપ્યવનિભુજાં મહોપકાર્યા નિસઙ્ખ્યાનુટજગણાંશ્ચ તાપસાનામ્ ॥ ૨॥

આનીતે તુરગવરે સમાહૃતાયાં સામગ્ર્યામતિથિસભાજનોચિતાયામ્ ।
આગચ્છત્ સહ મુનિભિઃ પરાવરજ્ઞૈર્બ્રહ્મર્ષિશ્ચુલુકિતસાગરઃ સશિષ્યૈઃ ॥ ૩॥

આરાધ્ય પ્રમથપતિં મહોપહારૈર્મીનાક્ષીમપિ મલયધ્વજઃ સદારઃ ।
આરેભે સવનમનુજ્ઞયા મુનીનામાગસ્ત્યં ચરણયુગં પ્રણમ્ય સદ્યઃ ॥ ૪॥

સ્વાયત્તામપિ દુરતિક્રમાત્ પ્રતાપાત્ સઙ્ગૃહ્ણન્ ભુવિ જનતાં સ સાઙ્ગ્રહણ્યા ।
મુક્તાશ્વો ધૃતનિયમઃ પદેઽસ્ય હોમં કુર્વાણઃ સમવસદગ્ન્યગાર એવ ॥ ૫॥

સ્વચ્છન્દં હયમભિતોઽપિ સઞ્ચરન્તં સઙ્ગુપ્તં નૃપપુરુષૈઃ શનૈશ્ચતુર્ભિઃ ।
રોદ્ધું યદ્યપિ ન શશાક રાજલોકઃ શક્તોઽભૂત્ પુનરખિલોઽનુરોદ્ધુમેનમ્ ॥ ૬॥

કીર્ત્યાવિષ્કૃતસરણિં પ્રતાપગુપ્તં પશ્યન્તસ્તુરગમિતસ્તતશ્ચરન્તમ્ ।
તદ્ધવ્યગ્રહણરસાર્દ્રતાલુમૂલા વર્ષાન્તં વિવુધગણાઃ પ્રતીક્ષ્ય તસ્થુઃ ॥ ૭॥

સર્વૈરપ્યધિગતવાજિમેધકાણ્ડૈઃ સમ્પૂર્ણે કિલ વિષયેऽસ્ય વાજિરક્ષાઃ ।
વૃત્ત્યર્થં ક્વચન કિમપ્યનાદદાનાઃ સ્વૈઃ સ્વૈઃ સ્વૈઃ કથમપિ વર્તયામ્બભૂવુઃ ॥ ૮॥

અશ્વત્થે ક્ષણમવબદ્ધ્ય તં તુરઙ્ગં સમ્પૂર્ણે શશિનિ સમેત્ય તિષ્યયોગમ્ ।
આવૃત્તં નગરમભિ પ્રચોદયન્તો નિન્યુસ્તં નૃપપુરુષા હિમાવસાને ॥ ૯॥

આયાતા ધરણિભુજો યદાસમુદ્રાદાયાતાઃ સકલકલાવિદશ્ચ લોકાઃ ।
આયાસ્યન્ત્યમરગણાશ્ચ હવ્યહેતોસ્તેનાયાન્ સ્વયમપિ કૌતુકી વસન્તઃ ॥ ૧૦॥

નિશ્શેષોપરતરસાલપલ્લવાશાનિર્વિણ્ણૈર્વનભુવિ કોકિલૈસ્તદાનીમ્ ।
આસેદે શિશિરદિનાન્તસુપ્તબુદ્ધરાકાશાચ્ચ્યુત ઇવ પઞ્ચમો નિનાદઃ ॥ ૧૧॥

પ્રમાના ધરણિરુહઃ સ્વતઃ પ્રસેદુર્નિષ્ક્રાન્તો મલયગિરેબહિઃ સમીરઃ ।
વીરશ્રીર્વિષમશરસ્ય બાહુકાણ્ડે વિશ્રાન્તિં સ્વયમભિરોચયામ્બભૂવ ॥ ૧૨॥

માલિન્યં દધતિ મષીવિલેપનેન પ્રાવણ્યં યુવતિષુ ઘોષયન્તિ યૂનામ્ ।
ઝઙ્કુર્વદ્ભ્રમરનિભેન મીનકેતોઃ સઞ્ચેરુર્બહિરિવ શાસનાક્ષરાણિ ॥ ૧૩॥

કૂજન્તો મદનપુરોહિતા દ્વિરેફાઃ પુષ્પાણિ ધ્રુવમભિમન્ત્રયામ્બભૂવુઃ ।
સ્વસ્થાનસ્થિતિમપરિત્યજન્ત એતે વિધ્યેયુઃ કિમિતરથા શરાઃ શરવ્યમ્ ॥ ૧૪॥

આનઙ્ગં નિગમમજસ્રમુદ્ગિરન્તો ભૈક્ષેણ પ્રતિતરુવીથિ વર્તયન્તઃ ।
નિર્નિદ્રાસ્ત્વહનિ નિરન્તરં દ્વિરેફા આચાર્યે વટવ ઇવાવસન્ વસન્તે ॥ ૧૫॥

અધ્વર્યું મલયસમીરમન્યપુષ્ટં હોતારં વનભુવિ સામગં દ્વિરેફમ્ ।
બ્રહ્માણં મધુમપિ સાદરં વૃણાના આજહ્રુર્મદનમહાધ્વરં યુવાનઃ ॥ ૧૬॥

મોહાન્ધે જગતિ વિપશ્ચિતો યતઃ કેऽપ્યગ્રીનાદધુરયજન્ત ચાસ્તશઙ્કાઃ ।
તન્મૂલં ધ્રુવમયશો દિશો દશાપિ પ્રાવારીદસમશરસ્ય ભૃઙ્ગદમ્ભાત્ ॥ ૧૭॥

આમૂલાદવિરળમાચિતે પ્રવાળૈશ્ચૂતેऽપિ પ્રયયુરતોષમન્યપુષ્ટાઃ ।
સર્વાણિ ગ્રસિતુમિમાનિ યન્ન શેકુઃ સ્થાતું વા યદપિ ન શાખિકામપશ્યન્ ॥ ૧૮॥

કે ભૃઙ્ગાઃ ક ઇવ પિકાઃ સમીરણઃ કશ્ચન્દ્રઃ કઃ ક ઇવ મધુર્મનોભવઃ કઃ ।
દૌર્ભાગ્યાદ્વિરહિજનસ્ય દુર્વિભેદં હન્તાસીત્ કથમિદમૈકમત્યમેષામ્ ॥ ૧૯॥

આચૂડં કુસુમમયા મધોઃ પ્રસાદાદ્ વાસન્તીવિચકિલચૂતચમ્પકાદ્યાઃ ।
ધુસ્તૂરેષ્વપિ ચ નિરીક્ષ્ય તાં સમૃદ્ધિં મન્દાક્ષાદિવ નતમૌલયો બભૂવુઃ ॥ ૨૦॥

ઉન્મીલન્મધુમદતુન્દિલા દ્વિરેફા ઉદ્દામસ્તબકપરિષ્કૃતા લતાશ્ચ ।
અન્યોન્યં યદિહ ન કિઞ્ચિદભ્યજાનન્ સા સમ્પત્સુરભિકટાક્ષવીક્ષણાનામ્ ॥ ૨૧॥

આક્રમ્ય ક્ષિતિતલમાવૃતં તુષારૈસ્તદ્વાર્તામપિ ન મધુર્યદા વિષેહે ।
શીતાંશૌ હિમવતિ ચ દ્વયોસ્તદાનીં લબ્ધં તૈરભયમિતો હતાવશિષ્ટૈઃ ॥ ૨૨॥

આ દ્વન્દ્વાદપરિગૃહીતદેહભેદાદા કીટભ્રમરપિપીલિકોદ્ભિજેભ્યઃ ।
ન ક્વાપિ પ્રતિહતિરૈક્ષિ શુશ્રુવે વા તત્કાલં કુમુમશરાસશાસનસ્ય ॥ ૨૩॥

આસ્તાં તદ્રતિપરિણેતુરાધિપત્યં મન્દેઽસ્મિન્નપિ ખલુ મારુતે પ્રવૃત્તે ।
કત્યન્વક્ કતિ પુરતશ્ચ સમ્પ્રચેલુર્માધન્તઃ શુકપિકશારિકાદ્વિરેફાઃ ॥ ૨૪॥

આરામે કિસલયમક્ષિણ શીથુરાગઃ કાન્તાનાં કમલવનેષુ કેસરાણિ ।
ઇત્યોભિઃ પ્રકટિતવિશ્વરૂપ એવ પ્રાયેણ વ્યજયત માન્મથઃ પ્રતાપઃ ॥ ૨૫॥

સઙ્ગોપ્ય ભ્રમરશશાઙ્કકોકિલેભ્યઃ સમ્પ્રાપ્તે તમસિ મહત્યધિજ્યધન્વા ।
એકાકી રતિપતિરિત્વરીરનૈષીત્ સઙ્કેતં ભુવનભયઙ્કરે નિશીથે ॥ ૨૬॥

કાન્તાનાં નખલિખનૈર્દૃઢોપગૂહાન્ સીત્કારાન્ દશનપદૈશ્ચ સાધયન્તઃ ।
પ્રેયાંસઃ પુનરુભયાનિમાનતીતાનસ્માર્ષુર્હિમસમયેષ્વયત્નલભ્યાન્ ॥ ૨૭॥

દુર્દાન્તં મદનમવેક્ષ્ય નિર્મમે કિં વર્મૈકં યુવસુ વધૂમયં વિધાતા ।
યદ્યોગે મદનશરાઃ પ્રસૂનમાત્રં યત્ત્યાગે કુલિશદશામમી વહન્તિ ॥ ૨૮॥

સમ્પશ્યન્ ગિરિશતપોવિલોપકોપવ્યાપન્નં સુહૃદમનન્યજં વસન્તઃ ।
શુશ્રૂષામકૃત શિવાર્ચને મુનીનાં પ્રત્યગ્રૈર્દળકુસુમૈર્વનદ્રુમાણામ્ ॥ ૨૯॥

આશીતાચલમભિગમ્ય સન્નિવૃત્તે ધન્યેઽસ્મિન્ ધરણિભુજસ્તુરઙ્ગવર્યે ।
ઉત્કણ્ઠાભરભરિતા ઇવોત્તરાશામાસેદુઃ સ્વયમહિમત્વિષસ્તુરઙ્ગાઃ ॥ ૩૦॥

સમ્પૂર્ણે નિયમભરેણ વત્સરેઽસ્મિન્ સમ્પ્રામે સ હિ સહ વાજિના વસન્તે ।
આદિષ્ટઃ સ મુનિભિરશ્વમેધકર્મણ્યારાદ્ધું ગિરિશમદીક્ષિત ક્ષિતીશઃ ॥ ૩૧॥

અધ્વર્યુઃ સમજનિ તત્ર કુમ્ભજન્મા હોતૃત્વં પ્રતિગતમાશ્વલાયનેન ।
ઔદ્ગાત્રં સમધૃત જૈમિનિર્મુનીન્દ્રો બ્રહ્માસીદ્ બહુવિદરુન્ધતીસહાયઃ ॥ ૩૨॥

પ્રાગન્તઃકરણમમુષ્ય કેવલં યે પ્રાજાનન્ ભુવિ નવનીતનિર્મિતં તે ।
અભ્યક્તં નવનવનીતચર્ચિકાભિસ્તં વિજ્ઞા બહિરપિ તન્મયં વિજજ્ઞુઃ ॥ ૩૩॥

આબાલ્યાદાતીથિષુ મુક્તહસ્ત એષઃ ક્ષમાપાલઃ કિલ મલયધ્વજઃ પ્રકૃત્યા ।
તજ્જાનન્નપિ નિખિલં નિબદ્ધ્ય મુષ્ટિં દીક્ષામુ ક્ષણમપિ નાસિતું શશાક ॥ ૩૪॥

અધ્વર્યૌ ભગવતિ તત્ર કુમ્ભજન્મન્યાયજ્ઞાં ધરણિપતિત્વમશ્રુવાને ।

દુર્ભિક્ષં શિથિલમજાયત દ્વિજાનામાષાઢાજિનતૃણમુષ્ટિવિષ્ટરેષુ ॥ ૩૫॥

નીવારાન્ વપત કુશાન્ પ્રવર્ધયધ્વં સિઞ્ચધ્વ ખદિરપલાશબિલ્વપોતાન્ ।
સદ્યઃ સઞ્ચિનુત મૃદૂનિ વલ્કલાનીત્યાદિક્ષન્ નૃપપુરુષાનગસ્ત્યશિષ્યાઃ ॥ ૩૬॥

તસ્મિન્નપ્યદદતિ પાર્થિવે નિષેધાદ્ યદ્ ભુક્તં વસિતમુપાર્જિતં ચ વિપ્રૈઃ ।
દાતારઃ સ્મ ઇતિ કૃતાગ્રહાઃ સમસ્તાઃ શક્તાઃ કિં શતતમમંશમત્ર દાતુમ્ ॥ ૩૭॥

ભુઞ્જાનાનપરિમિતાન્ બહૂન્ પદાર્થાન્ ભૂદેવાનધિસવનં નિરીક્ષ્ય દેવાઃ ।
ભાગં નઃ ક્રતુષુ વિધાય વિપ્રલેભે પાપીયાન્ વિધિરિતિ મન્ત્રયામ્બભૂવુઃ ॥ ૩૮॥

તસ્યાગ્રે ધરણિભુજઃ ક્રિયાન્તરાળેષ્વાતેનુઃ સ્વયમૃષયો બહૂન્ વિવાદાન્ ।
ન્યાયાનુશ્રવપદસાઙ્ખ્યયોગતન્ત્રપ્રસ્થાનપ્રવચનદેશિકા મહાન્તઃ ॥ ૩૯॥

યદ્યાત્યન્તિકસુખદુઃખહાનિરૂપં કૈવલ્યં કથમશપદ્ ભવાનહલ્યામ્ ।
તાદૃક્ષામુપલદશાં શ્રયેતિ કોપાદિત્યૂચુઃ કતિચન ગૌતમં મુનીન્દ્રાઃ ॥ ૪૦॥

કં દોષં કથયત સમ્પ્રસક્તદુઃખવ્યાવૃત્તિં ફલમુપગચ્છતાં પુરો નઃ ।
અજ્ઞાનક્ષતિરુપલે તવાપિ કિં નેત્યાચખ્યુઃ પ્રતિપદમક્ષપાદશિષ્યાઃ ॥ ૪૧॥

અજ્ઞાનાદ્યદિ પરિકલ્પિતં જગત્ સ્યાદજ્ઞાનાં પ્રથમગણેય ઈશ્વરઃ સ્યાત્ ।
નિસ્સીમા તવ હિ મતેઽસ્ય મૂઢતેતિ વ્યાસં પ્રત્યકૃષત કેઽપિ પૂર્વપક્ષમ્ ॥ ૪૨॥

અજ્ઞાનં પ્રકૃતિમપેક્ષ્ય વિશ્વમેતત્ સર્વજ્ઞો સૃજતિ ભવેઽપિ યત્ ત્વયોક્તમ્ ।
અજ્ઞાનં તદિદમનઙ્કુશં તવૈવેત્યાચખ્યુઃ સદાસિ તુ બાદરાયણીયાઃ ॥ ૪૩॥

જાતિશ્ચેદ્ ભવતિ પદેષુ સાધુભાવો ભાષાયાં શ્રુતિષુ ચ સ દ્વિધા કથં સ્યાત્ ।
ગેહે ગૌર્વનભુવિ ગર્દભઃ કિમુ સ્યાદિત્યુચ્ચૈરપજહસુઃ પરે પદજ્ઞાન્ ॥ ૪૪॥

અન્યેઽન્યે શ્રુતિષુ જગત્સુ ચાપિ શબ્દાસ્તદ્ભેદં નિપુણમજાનતાં કૃતે વઃ ।
અસ્માભિઃ સ્ફુટમનુશિષ્ટમાત્તમૌના વર્તધ્વં પદપદવી દવીયસી વઃ ॥ ૪૫॥

અસ્મદ્વ્યાકરણગૃહીતશક્તિયોગાનસ્માસુ પ્રથમમિમાન્ પ્રયુજ્ય શબ્દાન્ ।
યુક્તાદીયત ગુરુદક્ષિણા કિલેતિ પ્રત્યૂચુઃ પ્રથમવિપશ્ચિતો વિપક્ષાન્ ॥ ૪૬॥

હિંસાતો યદિ દુરિતં ઋતુષ્વપિ સ્યાત્ પુણ્યં કિં ન ભવતિ પારદારિકાણામ્ ।
ઉત્સન્નં કિલ કુલમુદ્ધરન્ત્યમીતિ વ્યાજહ્રુઃ કપિલમતે કળઙ્કમેકે ॥ ૪૭॥

શાસ્ત્રં ચેત્ કિમપિ તથાસ્તિ સાધયામો દુષ્કૃત્યૈરપિ સુકૃતાનિ કાત્ર ભીતિઃ ।
યૂયં દેવરવરણે યથા ગૃણીતેત્યાહુઃ સ્મ પ્રતિવચનાનિ તત્ત્વનિષ્ઠાઃ ॥ ૪૮॥

યોગાખ્યં વદસિ યમઙ્ગિનં સમાધિં તં બ્રૂષે નનુ કથમઙ્ગમષ્ટમં ચ ।
અઙ્ગાઙ્ગિવ્યતિકરદુસ્સ્થિતં મતં તે કો ગૃહ્ણાત્વિતિ જગદુઃ પરે ફણીન્દ્રમ્ ॥ ૪૯॥

સામાન્યં કિમિહ ક ઇષ્યતે વિશેષઃ કો યોગઃ ક ઇવ સમાધિરિત્યબુદ્ધ્વા ।
અર્વાચાં વ્યવહરતામયં પ્રલાપઃ સાધીયાનિતિ જહસુઃ પતઞ્જલીયાઃ ॥ ૫૦॥

આયાસ્યન્ત્યનુપદમત્ર હવ્યહેતોર્નન્વસ્મિન્ મહતિ મખે સુરાઃ સમસ્તાઃ ।
તાન્ સર્વાનપલપિતાસ્યહો કથં વેત્યાચખ્યુઃ કતિચન જૈમિનિં મુનીન્દ્રાઃ ॥ ૫૧॥

યે હ્યુચ્ચાવચમવજાનતે પ્રપઞ્ચં મિથ્યેતિ ત્રિભુવનદેશિકા મહાન્તઃ ।
તચ્છિષ્યા વયમપિ શક્તિતો વદામેત્યાહુસ્તાન્ પ્રતિ ચતુરાસ્તુ પૂર્વતન્ત્રે ॥ ૫૨॥

તત્રેત્થં દ્વિજસદસિ પ્રવૃત્તજલ્પે સ્થેયત્વં સ્વયમવલમ્બ્ય ભાષમાણઃ ।
દીક્ષાહાનુપસદહાનપિ વ્યતીતઃ સૌત્યેઽહન્યવતરતિ સ્મ પાર્થિવેન્દ્રઃ ॥ ૫૩॥

યે ષટ્ ત્રિઃ ખદિરપલાશવિલ્વરૂપા યો ચોદુમ્બરતરુજૌ સરાજ્જુદાલૌ ।
તે યૂપા અવતરતા દિવઃ સુરાણાં નિશ્રેણ્યો ભુવિ નિહિતા ઇવ વ્યરાજન્ ॥ ૫૪॥

અગ્નિષ્ઠે સમુપનિબદ્ધ્ય રાજ્જુદાલે સન્નદ્ધં કુશરશનાગુણેન ગાઢમ્ ।
સમ્પ્રોક્ષન્ હયમભિતો મહર્ત્વિજસ્તં સિદ્ધાર્થૈરપિ વિધિગૌરવેણ મન્ત્રૈઃ ॥ ૫૫॥

આલબ્ધે શમિતૃભિરાશ્વમેધિકેઽશ્વે ચન્દ્રાખ્યં કલશભવઃ પ્રગૃહ્ય મેદઃ ।
શાખાયાં ક્ષણમુપસાદ્ય વેતસસ્ય સ્ત્રૌવાગ્રાદખિલમવદ્યતિ સ્મ હોતુમ્ ॥ ૫૬॥

આશ્રાવ્ય સ્વયમૃષિરાશ્વલાયિનીયે યાજ્યાન્તે હવિરજુહોત્ સ્રુચો મુખેન ।
યજ્ઞેશે ભગવતિ ભાવનાપ્રકર્ષાદ્ ભૂપાલો જગદજુહોત્ સ તન્મુખેન ॥ ૫૭॥

અપ્યન્તસ્તિમિરહરં શરીરભાજામપ્રાપ્યં જનુષિ પુરાતપોવિહીનૈઃ ।
સૌરભ્યં હવિષિ હુતે સમુજ્જિહાનં વ્યાજિઘ્રન્ સદસિ વિપશ્ચિતો મહાન્તઃ ॥ ૫૮॥

બિભ્યત્સુ શ્રુતિમતિલઙ્ઘય સમ્પ્રદાતું હવ્યં તત્તદભિમતં દ્વિજર્ષભેષુ ।
પૌરોડાશિકચરુપાશુકાદિભાગાન્ સ્વીચક્રુઃ સ્વયમપમિત્ય દેવવર્ગાઃ ॥ ૫૯॥

ચન્દ્રે તુ જ્વલનહુતે હયસ્ય તસ્મિન્નાસન્ યે સલિલમુચસ્તદગ્નિધૂમાત્ ।
વર્ષન્તિ સ્વયમધુનાપિ મૌક્તિકાનાં વ્યાજાત્ તે તમિવ કણીકૃતં વમન્તઃ ॥ ૬૦॥

આગાતા કિલ યજમાનકામનાનામુદ્ગીથાવયવસમષ્ટ્યુપાસનજ્ઞઃ ।
ઉદ્ગાનં વ્યતનુત જૈમિનિસ્તદાનીમાકાઙ્ક્ષન્નવતરણં જગજ્જનન્યાઃ ॥ ૬૧॥

પ્રત્યક્ષં વિબુધગણેષ્વદલ્લુ હવ્યં સાકૂતસ્મિતમવલોકિતઃ સદસ્યૈઃ ।
સિદ્ધાન્તં સ દિવિષદામવિગ્રહત્વં વ્યાચખ્યોઃ કલહવિપર્યયં મહર્ષિઃ ॥ ૬૨॥

દેયા ભૂરિહ ખલુ દક્ષિણેતિ શાસ્ત્રં સર્વા ભૂરપિ ચતુરર્ણવીપરીતા ।
દત્તા નઃ ક્ષિતિરમણ ! ત્વયેતિ હૃષ્ટા આશીર્ભિઃ સદસિ તમૃત્વિજોઽભ્યનન્દન્ ॥ ૬૩ ॥

નિષ્ક્રીય દ્વિગુણધનૈઃ પુનર્ધરિત્રીં રક્ષાયામનધિકૃતેર્દ્વિજૈર્વિતીર્ણામ્ ।
ભૂયોઽપિ દ્વિજકુલસાચ્ચકાર સર્વાં ર્વાં લક્ષ્મીમપિ મલયધ્વજો નૃપાલઃ ॥ ૬૪ ॥

રાજર્ષેરવભૃથકર્મ વાજિમેધે મ્હાતારઃ સહમુનયો વસિષ્ટમુખ્યાઃ ।
તીર્થં તુ ત્રિશિખભવા સરોજિની સેત્યકૈકં ત્રિભુવનપાવનં તદાસીત્ ॥ ૬૫ ॥

તૌ મિત્રાવરુણમુતૌ મિથો વિમૃશ્ય બ્રહ્મર્ષી વિદિતસમસ્તવેદિતવ્યૌ ।
અમ્બાયા અવતરણાય કાઞ્ચિદિષ્ટિં પુત્રીયાં ત્વરિતમથોપચક્રમાતે ॥ ૬૬ ॥

સઙ્કલ્પં વ્યધિત નૃપઃ સ યાવદિષ્ટૌ તાવદ્ ભુવ્યવતરિતું શિવાપિ ચક્રે ।
વૈતાનાદુદયમુપેહિ પાવકાદિત્યાદિષ્ટા સ્વયમમૃતાંશુશેખરેણ ॥ ૬૭ ॥

સમ્પ્રાપ્તું ત્રિભુવનમાતરં કુમારીં સન્નદ્ધો નનુ યજમાન એવ પત્ન્યા ।
ઇત્યગ્નીદેવદદુપાંશુ શાસિતારં પત્નીસન્નહનવિધૌ પ્રચોદ્યમાનઃ ॥ ૬૮ ॥

પ્રાસીદજ્જગદખિલં પ્રદક્ષિણાર્ચિઃ સ્વીચક્રે હવિરનલઃ સુવર્ણવર્ણઃ ।
ઉત્તસ્થૌ નવલવલીવિપાકપાણ્ડુર્ધૂમોઽપિ સ્ફુરદરવિન્દગન્ધસાન્દ્રઃ ॥ ૬૯ ॥

તદ્ દિવ્યં ત્રિભુવનધામ ધામ શૈવં હોતવ્યે હવિષિ વિભાવયન્ મહર્ષિઃ ।
ઉદ્બોધ્ય ક્ષિતિપમુદઙ્મુખઃ સ તિષ્ઠન્ વૈતાને જ્વલતિ જુહાવ હવ્યવાહે ॥ ૭૦ ॥

આજ્યાહુત્યભિપતનપ્રવર્ધમાનાદગ્નેસ્તત્ક્ષણમુદિયાય કાપિ કન્યા ।
ઉન્મીલત્કુવલયદામકોમલશ્રીર્લાવણ્યામૃતલહરીવિવર્ત્તમૂર્તિઃ ॥ ૭૧ ॥

ચૂડાસઙ્ઘટિતસુવર્ણપદ્મદામવ્યામિશ્રગ્રથિતવિલમ્બિમાક્તિકૌઘા ।
પ્રાલમ્બાલકનિકરાન્તરાલલક્ષ્યવ્યાવલ્ગચ્છફરવિલોલલોચનશ્રીઃ ॥ ૭૨ ॥

કર્ણાભ્યાં મદનકરાઙ્ગુલીયકામં તાટઙ્કં મણિખચિતં વિભૂષયન્તી ।
અવ્યાજસ્મિતભણિતાન્તરાલદૃશ્યપ્રત્યગ્રપ્રસૃમરદન્તકુન્દપઙ્ક્તિઃ ॥ ૭૩ ॥

વક્રેન્દુવ્યતિષજદેણભીતિહેતોર્વૈયાઘ્રં નખમાધિકન્ધરં દધાના ।
ત્રાતું ત્રીનિવ તનયાન્ વિધીશવિષ્ણૂસ્ત્રીન્ વક્ષોરુહવલયાન્ સમુદ્વહન્તી ॥ ૭૪ ॥

અભ્યગ્રોન્મિષદમરદ્રુપલ્લવાભે કુર્વાણા કુવલયકન્દુકં કરાગ્રે ।
સૌવર્ણામ્બરવિલસન્નિતમ્બબિમ્બવ્યાલમ્બિસ્ફુટમણિમેખલાકલાપા ॥ ૭૫ ॥

અમ્બામ્બેત્યમૃત રસં ગિરા કિરન્તી મઞ્જીરક્વણિતમનોહરં ચરન્તી ।

સા બાલા સ્વયમભજન્નૃપાલપત્ન્યાઃ પર્યઙ્કં શ્રુતિશિખરૈઃ કૃતાભ્યસૂયમ્ ॥ ૭૬॥

આલિઙ્ગન્ત્યસકૃદનુક્ષણં સ્પૃશન્તી ચુમ્બન્તી મુખકમલં મુહુર્મુહુશ્ચ ।
પશ્યન્તી વિકસિતપક્ષ્મભિઃ કટાક્ષૈસ્તાં બાલામભજત નિર્વૃતિં ન માતા ॥ ૭૭॥

આનન્દત્રુટિતવિશીર્ણકઞ્ચુકાન્તાદ્ વક્ષોજાદથ મલયધ્વજપ્રિયાયાઃ ।
અન્વસ્યન્દત મધુરં પયઃ પ્રભૂતં બિભ્રત્યાસ્ત્રિભુવનમાતરં કુમારીમ્ ॥ ૭૮॥

પ્રેયસ્યા સવિધમુપેત્ય દીયમાનામુત્પ્લુત્ય સ્વયમુપગૂહિતું પતન્તીમ્ ।
કન્યાં તામમૃતમયીમિવાદદાનઃ કૈવલ્યં ધરણિપતિસ્તૃણાય મેને ॥ ૭૯॥

માર્જન્તાવસકૃદુપર્યુપર્યુદઞ્ચદ્બાષ્પામ્ભઃપ્રકરતરઙ્ગિતાનપાઙ્ગાન્ ।
અવ્યાજસ્મિતમધુરાક્ષરં કુમાર્યા દ્રષ્ટું તન્મુખકમલં ન શેકતુસ્તૌ ॥ ૮૦॥

ન સ્મર્તું પ્રમથપતિં ન કર્મશેષં નિર્વોઢું ન ચ મહતો મુનીન્ પ્રણન્તુમ્ ।
નાન્યોન્યં વદનમવેક્ષ્ય નન્દિતું વા દમ્પત્યોશ્ચતુરતયા તયોર્બભૂવે ॥ ૮૧॥

પશ્યન્તાવુરસિ કુચાઙ્કુરત્રયં તૌ બાલાયાઃ કિમપિ સમાકુલૌ યદાસ્તામ્ ।
પર્જન્યસ્તનિતગભીરમન્દ્રઘોષા વાગેકા નભસિ તદા સમુજ્જજૃમ્ભે ॥ ૮૨॥

તટાતકાં નામ તવાત્મજામિમાં પતિર્ભવિષ્યન્નવલોકતે યદા ।
તદા તૃતીયં કુચમણ્ડલં વિદં નિમગ્નમન્તર્નિયતં ભવેદિતિ ॥ ૮૩॥

શ્રુત્વા સુધારસકિરં ગિરમભૃતાં તાં
નિર્વર્ત્ય સર્વધનદક્ષિણમધ્વરં ચ ।
પાણૌ દિશન્ કુલગુરોઃ પરદેવતાં તાં
તત્પાદયુગ્મમુપસઞ્જગૃહે સદારઃ ॥ ૮૪॥

હસ્તે ગૃહીતાં કલશોદ્ભવસ્તામધ્યાત્મવિદ્યાં મુનિમણ્ડલાય ।
આનન્દવાષ્પૈઃ પુલકાઙ્કુરૈરપ્યનક્ષરં કેવલમાચચક્ષે ॥ ૮૫॥

પ્રશિથિલકલુષં પ્રશાન્તમોહં પ્રમદતરઙ્ગપરમ્પરાધિરૂઢમ્ ।
જગદખિલમભૂદભૂતપૂર્વં મનુજકુલાવતરે જગજ્જનન્યાઃ ॥ ૮૬॥

ઇતિ મહાકવિશ્રીનીલકણ્ઠદીક્ષિતપ્રણીતે શિવલીલાર્ણવે ષષ્ઠઃ સર્ગઃ ।

## અથ સપ્તમઃ સર્ગઃ ।

અથ કલશભવઃ શિવસ્ય મેધાવિભવવિવર્ત્તમયીમિમાં કુમારીમ્ ।
મધુ મધુરમપાયયત્ સ મેધાસમુપજનાય સકાઞ્ચનં સગવ્યમ્ ॥ ૧॥

ઉચિતમુપનિવેશિતાઙ્કદેશે સુકૃતિનિ કાઞ્ચનમાલયા સુતા સ્મ ।
અપરિચિતચરીં પ્રવૃત્તિમાદ્યામલભત માતૃકુચામૃતોપયોગે ॥ ૨॥

સમજનિ સુખિતા કુમારિકા સા સકૃદુપધાય મુખં સ્તને જનન્યાઃ ।
વદનસરસિજં દૃશા પિબન્તી ન તુ દુહિતુર્જનની જગામ તૃપ્તિમ્ ॥ ૩॥

અકૃતકવચસા નભોવિભાગાત્ મ્વયમુદિતેન કૃતં તટાતકેતિ ।
ક્ષિતિપતિરતનિષ્ટ નામ તમ્યાસ્ત્રિભુવનકર્ણરસાયનાક્ષરં તત્ ॥ ૪॥

કનકરજતશૃઙ્ખલાવબદ્ધે મણિશયનીયતલે મહાર્હતલ્પે ।
મૃદુનિ સમુપવેશ્ય તામગાયન્નવનિપતેરવરોધગાસ્તરુણ્યઃ ॥ ૫॥

પ્રચલતિ યમપેક્ષ્ય ભારતેઽસ્મિન્ સકલમિદં શુભકર્મ ભૂવિભાગે ।
અજનિ મહિભૃતસ્તતઃ કિલેયં પરમહિમાલયતો યશોવદાતાત્ ॥ ૬॥

ઇયમમૃતમયી શરીરભાજાં બહિરબહિર્ભવતાપતાપિતાનામ્ ।
કલમધુરવિરાવિણી ચ વાણી કરકમલોપગૃહીતવલ્લકીયમ્ ॥ ૭॥

વિહરસિ યદિ દેવિ! જાગ્રતીત્થં જગદખિલં કુશલં પ્રકાશતે નઃ ।
નિમિષસિ યદિ નિષ્ક્રિયા ભવામઃ પ્રલય ઇવૈષ નિમજ્જતિ પ્રપઞ્ચઃ ॥ ૮॥

ઇતિ શિશુજનલાલિતાનિ ગીતાન્યવનિપતેરવરોધસુન્દરીણામ્ ।
અનુજગદુરિવામરા નિગૂઢાઃ પ્રતિનિનદૈઃ પરમાત્મભાવદૃષ્ટ્યા ॥ ૯॥

સમધૃત વલયાનિ સા કુઇમારગ્રહપરિહારકૃતે મહીમયાનિ ।
પરિચયમિવ કુર્વતી ભુજેન ક્ષિતિવલયં સકલં સુખેન વોઢુમ્ ॥ ૧૦॥

વિહૃતિષુ પિતરૌ સપાત્રહસ્તાપ્યતનુત સા ભુજિના વિનૈવ તૃપ્તૌ ।
કથમિવ ભવતિ ક્ષુધા તૃષા વા સકૃદનુસન્દધતાં તથાવિધાં તામ્ ॥ ૧૧॥

વિયતિ વિધુકલાં પ્રદર્શ્યમાનાં નિભૃતમવેક્ષ્ય નિતાન્તકૌતુકેન ।
શિરસિ કુસુમમેતદર્પયેતિ પ્રતિમુહુરાલપતિ સ્મ બાલિકા સા ॥ ૧૨॥

વ્યજયત પદકિઙ્કિણીરવોઽસ્યા મણિભવનેષુ તતસ્તતશ્ચરન્ત્યાઃ ।
પદમિદમભિતો વિચિન્વતીનામુપનિષદામિવ હર્ષજઃ પ્રણાદઃ ॥ ૧૩॥

અવદદિયમનન્વિતા ઇવાર્થૈરનુપહિતા ઇવ યાઃ કથાઃ સખીભિઃ ।
કથમપિ પરમોપદેશદૃષ્ટ્યા જગૃહુરિમાં મુનયઃ સુરાશ્ચ ગૂઢાઃ ॥ ૧૪॥

કતિ કતિ કૃતિનઃ કુરઙ્ગપોતા વિહરણસાધનતામવાપુરસ્યાઃ ।
તરુષુ પશુષુ વા ધ્રુવં જનિષ્યે તદહમહો સમયઃ પુનર્વ્યતીતઃ ॥ ૧૫॥

ક્રતુરવનિપતેરયં સ તસ્યા યદુપજહાર વિહારસાધનાનિ ।
સ ચ પરમજપો યદન્વવાદીત્ કલમધુરાણિ મુહુસ્તદીરિતાનિ ॥ ૧૬॥

ભવનવિનિહિતેષુ ભક્ષ્યભોજ્યેષ્વહરત સા કપટેન યત્ કુમારી ।
નવનવમપરિક્ષયં ચ ભૂત્વા પ્રકટમજાયત સૂક્ષ્મદર્શિનાં તત્ ॥ ૧૭॥

કતિચન કિલ કન્તુકા મહાન્તો ગુણસમુદાયમયા નિસર્ગશુદ્ધાઃ ।
અજનિષત કુતૂહલાય દેવ્યા નિગમપથે ચરતાં નિદર્શનાય ॥ ૧૮॥

શ્રુતિષુ નિહિતદૃષ્ટયોઽન્યવિદ્યા ભગવતિ શૂલિનિ તાઃ સ ચાદિશક્તૌ ।
ક્વચિદપિ કિલ કન્તુકે તુ સાપીત્યજનિ મનાગપિ યોગિનામસૂયા ॥ ૧૯॥

કતિપયદિવસૈઃ કથાસુ ગીતેષ્વજનિ પટુર્ઘુટિકામુ કન્તુકેષુ ।
ઇતિ રહસિ કથા બભૂવ પિત્રોર્દુહિતરિ વિશ્વવિધાનમાતૃકાયામ્ ॥ ૨૦॥

વિહૃતિષુ નયને પિધાય તસ્યાઃ સ્વયમભિતશ્ચરિતું કૃતોદ્યમાનામ્ ।
ત્રિજગતિ તિમિરાવૃતે સખીનામપિ ચલિતું સ્વપદાન્ન શક્તિરાસીત્ ॥ ૨૧॥

અથ કુલગુરુમાદિદેશ મિત્રાવરુણસુતં મલયધ્વજો નૃપાલઃ ।
દુહિતુરખિલલોકમાતૃકાયા વિરચયિતું કિલ માતૃકોપદેશમ્ ॥ ૨૨॥

નિખિલજનિમતાં સદા લિખન્તી નિટિલતલેષુ શુભાશુભાક્ષરાણિ ।
અલિખદપરિજાનતીવ વાલા કથમપિ સા ભુવિ વર્ણમેકમેકમ્ ॥ ૨૩॥

અથ ભુવિ વિલિખન્ત્યયં તુરીયં કલશભવસ્ય મુનેઃ પુરઃ કુમારી ।
સદયમુપદિદેશ ભક્તિયોગાત્ પ્રણમતિ કામકલારહસ્યમસ્મિન્ ॥ ૨૪॥

નિરવધિપરમાત્મચિન્મયી સા કિમપિ યદા નિદધે કલામુ દૃષ્ટિમ્ ।
અહમહમિકયા તદા પરીયુઃ સકલકલાશ્ચ સખીજના ઇવૈનામ્ ॥ ૨૫॥

વિદિતમવિદિતં ચ યત્ કિલાસીત્ પ્રથમમજાતમુખાત્ ગૃહીતમૈશાત્ ।
તદખિલમવધારયન્નમુષ્યાઃ કલશભવો ગુરુદાક્ષણાં પ્રપેદે ॥ ૨૬॥

અસિકુલિશગદાશરાસશક્તિભ્રમરકતોમરભિણ્ડિપાલશૂલૈઃ ।
પ્રકટિતરણકૌશલાઃ ખુરલ્યાં સમમિવ સા વિજહાર વીરલક્ષ્મ્યા ॥ ૨૭॥

ઉપનિષદુદિતા મતઙ્ગજા સા પ્રિયદુહિતા મલયધ્વજસ્ય રાજ્ઞઃ ।
મદભરભરિતાન્ મતઙ્ગજેન્દ્રાન્ સહજતયા વશમાનિનાય સદ્યઃ ॥ ૨૮॥

હયવરમધિરુહ્ય સઞ્ચરન્તી ખુરદળિતક્ષિતિધૂળિધૂસરાભ્રમ્ ।

અવતરણમનક્ષરં જગૌ સા નિજમિવ ભૂમિભરાવરોપણાર્થમ્ ॥ ૨૯॥

કવચિતમવધૂતખડ્ગરેખં નિયમિતવેણિનિબદ્ધતૂણમન્વક્ ।
કતિચન કૃતિનઃ સિષેવિરેઽસ્યાસ્તુરગરજોમસૃણાળકં વપુસ્તત્ ॥ ૩૦॥

અથ શિથિલકુમારિકા દશાન્તપ્રવિરળકન્દળદદ્ભુતાભિરૂપ્યમ્ ।
અલમકુરુત યૌવનં તદાનીં ત્રિભુવનમઙ્ગલમઙ્ગમઙ્ગમસ્યાઃ ॥ ૩૧॥

હૃદિ કિલ નિમમજ્જ યાવદન્તઃ પ્રસવશરો મલયધ્વજાત્મજાયાઃ ।
પિશુન ઇવ સ તાવદુન્મમજ્જ સ્તનકલશસ્તુ હૃદો બહિસ્તદીયઃ ॥ ૩૨॥

શિથિલમનુસસાર બાલલીલાં વિરળમપિ પ્રકટીચકાર લજ્જામ્ ।
અનયદિયમહાનિ પઞ્ચષાણિ પ્રતિનવયૌવનમારુતાવધૂતા ॥ ૩૩॥

વચસિ વિહસિતે ગતેઽવલોકે વપુષિ ચ કાપિ દશા ક્ષણે ક્ષણેઽસ્યાઃ ।
સમજનિ મદનકદર્શનીયા મદનજિદેકમનોવિભાવનીયા ॥ ૩૪॥

પરિવિગલતિ શૈશવે પ્રવૃત્તે તરુણિમનિ પ્રતિપન્નસર્વતત્ત્વા ।
અજનિ પિતુરમાત્યતાધુરીણા પરમગુરુશ્ચ પરાત્મચિન્તને સા ॥ ૩૫॥

દુહિતરિ નૃપતિસ્તટાતકાયાં ધુરમુભયોરપિ લોકયોર્નિવેશ્ય ।
ભવમમરગણાદિવાપવર્ગાદપિ પરમં ગણયન્નહાન્યનૈપીત્ ॥ ૩૬॥

સુમતિમભિધયાર્થતોઽપિ દેવઃ કુલસચિવં નિકટે નિવેશ્ય જાતુ ।
હૃદયગતમિદં સમાચચક્ષે સવિધજુષોઃ સહધર્મિણીકુમાર્યોઃ ॥ ૩૭॥

સ્મરસિ ન સુમતે ! યથા ગુરુર્મામશિષદિમાં શ્રિયમર્પયન્ મયિ પ્રાક્ ।
અપહતવિમતાં ભુવં સમાનામયુતમિમામનુપાલયેતિ હૃષ્ટઃ ॥ ૩૮॥

ઇદમવિતથયાશિષા ગુરૂણાં તવ ચ ધિયા ધૃતમિત્થમાધિપત્યમ્ ।
અયુતમપિ સમાઃ સમાપ્તિમીયુઃ કુલમપિ કુમ્ભભુવેદમુદ્ધૃતં નઃ ॥ ૩૯॥

વસતિ ચ શિશુતામતીત્ય વત્સા વયસિ મહીવલયાનુપાલનાર્હે ।
અયમપરિણતો મનોરથો યત્ કલિતકરગ્રહમઙ્ગળા તુ નેયમ્ ॥ ૪૦॥

દિવિ ભુવિ ધરણીતલેઽપિ વાસ્યાઃ પતિરુચિતો ન હિ કોઽપિ ભાસતે નઃ ।
તમિમમપિ મનોરથં મદીયં સફલયિતા ન ચિરેણ ચન્દ્રમૌલિઃ ॥ ૪૧॥

અહમિવ હિતચિન્તને ત્વમસ્યા ભવસિ ચ રાજ્યવિધૌ પરઃ સહાયઃ ।
ભવતિ ચ જનની તટાતકાયાઃ પરિણયકર્મણિ ભાવિનિ સ્વતન્ત્રા ॥ ૪૨॥

અધિગતમાધગમ્યમીશ્વરાણાં કુલમપિ વીક્ષિતમુદ્ધૃતં કુમાર્યા ।
મમ તુ ખલુ મનોરથોઽયમેકો યદુત લભેય પદં જગજ્જનન્યાઃ ॥ ૪૩॥

ઇતિ વદતિ મહીપતૌ મહિષ્યાં તદનુગમાધ્યવસાયવિજ્વરાયામ્ ।
અગણિતગુરુશોકસમ્પ્રમૂઢાવથ સુમતિશ્ચ તટાનકાપ્યભૂતામ્ ॥ ૪૪॥

કથમપિ શિશિરોપચારભેદૈરલભત સંવિદમમ્બિકા ન યાવત્ ।
ચુલુકિત ચતુરર્ણવો મહર્ષિઃ સ્વયમભિગમ્ય સ તાવદિત્થમૂચે ॥ ૪૫॥

જય જનનિ ! જય ત્રિલોકવન્દ્યે ! જય ગલિતાવરણાત્મચિત્સ્વરૂપે! ।
કિમિહ મનુજતાભિનીતિમાત્રાદ્ ભવતિ તમોભિભવઃ પરસ્ય ધામ્નઃ ॥ ૪૬॥

અભિનયમવધૂય માનુષીણામવસિતકલ્પમલં પ્રપન્નમેનમ્ ।
ત્વરિતમનુગૃહાણ તીવ્રપાતૈર્મલિનિમભઙ્ગનિરઙ્કુશૈરપાઙ્ગૈઃ ॥ ૪૭॥

નિયમય જનનીં દુરૂહરૂક્ષાં પરિણયકર્મણિ તે પ્રદાનહેતોઃ ।
સ્વમૃણમિયમપાકરોતુ ગૌરીવિતરણપુણ્યસમુચ્ચયેન ભર્તુઃ ॥ ૪૮॥

ઇતિ કલશભવેન બોધિતા સા જગદરણિર્જનકં ચિરાત્ પ્રપન્નમ્ ।
અમનુત પરમે પદે નિધાતું મુલભમિયચ્છ્રિતરક્ષણં હિ તસ્યાઃ ॥ ૪૯॥

પ્રપદનપદવીજુષાં જનાનામનુપરતેઽપ્યપવર્ગદાનસત્રે ।
કિમિવ હિ જનકે કૃતં મયાસીદિતિ હૃદિ સા કિલ જિહ્રયામ્બભૂવ ॥ ૫૦॥

પ્રવસસિ યદિ તાત! હા હતાહં ન ગણય વત્સ! ભયં કુતશ્ચનેતિ ।
વ્યતિકરિતપરાવરાત્મભાવા વ્યવહરતિ સ્મ પરાપિ દેવતા સા ॥ ૫૧॥

ભુવમથ ભુજયોઃ શ્રિયં દૃગન્તે ચરણયુગે હૃદયં ચ જીવિતં ચ ।
વિનિદધદયમાત્મદેવતાયા વિગતભયો મલયધ્વજોઽવતસ્થે ॥ ૫૨॥

અથ દુહિતુરનુગ્રહેણ તસ્મિન્ પ્રવિશતિ ગર્ભગૃહં શશાઙ્કમોલેઃ ।
નિભૃતમવલુલોકિરે સમસ્તાસ્તદનુ ચ તત્ર મહેશલિઙ્ગમાત્રમ્ ॥ ૫૩॥

ચિરપરિચિતભર્તૃવિપ્રયોગવ્યસનપરાહતિમૂર્ચ્છિતાં સવિત્રીમ્ ।
સ્વયમપિ પરિરભ્ય ખિદ્યમાનાં કલશભવઃ પુનરમ્બિકાં બભાષે ॥ ૫૪॥

કિમિદમનુચિતં પુનઃ પ્રવૃત્તં કિયદિયતા ભવિતા ન દુઃખમસ્યાઃ ।
અપનય તમસા કૃતં જનન્યામલમભિનીય મનુષ્યભૂમિકાં સ્વામ્ ॥ ૫૫॥

યદિ ભવસિ શિવે! જગચ્છરણ્યા યદિ ચ ભવદ્વચનાનિ વેદવાદાઃ ।
ત્વયિ કૃતમનસિ ત્વયિ પ્રલીને પિતરિ ચ તે કિમુ સન્તિ શોચિતારઃ ॥ ૫૬॥

ઇતિ વિદિતપરાવરેણ દેવી કલશભવેન મહર્ષિણાનુનીતા ।
અખિલકલુષભઞ્જનૈરપાઙ્ગૈરનુજગૃહે સુમતિં ચ માતરં ચ ॥ ૫૭॥

તદનુ ભુવનમઙ્ગલે મુહૂર્તે પ્રકૃતિભિરાપ્તજનૈઃ પુરોધસા ચ ।
સવિધમુપગમય્ય ચન્દ્રમૌલેર્મણિખાચિતે નિદધે વરાસને સા ॥ ૫૮॥

પશુપતિરથ પાણ્ડ્યકન્યકાયૈ વિચકિલપુષ્પમયી વિતીર્ય માલામ્ ।
પુનરપિ સ તયા સમર્પ્યમાણાં હૃદિ ચકમે નિભૃતં મધૂકમાલાન્ ॥ ૫૯॥

કિયદપિ સમવાપ્ય યત્કટાક્ષં ક્ષિતિપતયો ભુબને પરાક્રમન્તે ।
ન્યવિશત યદિ સૈવ વીરલક્ષ્મીર્નૃપતિપદે ન કથં નમન્તુ ભૂપાઃ ॥ ૬॥

અવનિરફલદદ્ભુતાનિ સસ્યાન્યદદુરપાં નિધયો મણીન્ મહાન્ ।
ઉપદદુરુચિતાન્ ગજાન્ વનાન્તા ભુવિ સમયે સમયે વવર્ષ ચ દ્યૌઃ ॥ ૬૧॥

ન યદતિચરિતં જનેષુ કેનાપ્યપરિમિતં નનુ ભાગ્યમેતદસ્યાઃ ।
ત્રિભુવનજનની કૃતાપરાધં કમિવ નિયચ્છતુ સા કથં દયાર્દ્રા ॥ ૬૨॥

અવનિતલમવન્ ગુરુઃ કિલાસ્યાઃ પ્રશમયતિ સ્મ નૃણાં પરં વિવાદમ્ ।
ત્રિભુવનજનતાવિવાદશાન્તિઃ પરિણમતિ સ્મ સદૈવ હન્ત તસ્યામ્ ॥ ૬૩॥

નૃપકરમખિલં વિતીર્ય શિષ્ટં યદિહ શિવાય નિરુપ્તમસ્તિ કિઞ્ચિત્ ।
તદપિ નનુ હરન્તિ તાવકીના ઇતિ વચનેષુ જહાસ સા જનાનામ્ ॥ ૬૪॥

અહમહમિકયા દિશોઽધિગન્તું પરિચલતાં યશસાં મિથો વિમર્દાત્ ।
પથિ પથિ નિભૃતાનિ કાનિચિત્ કિં રજતહિમાદ્રિમિષાદ્યશાંસિ તસ્યાઃ ॥ ૬૫॥

કર ઇતિ હિ જહાર ષષ્ઠમંશં પરમખિલં તુ શિવાર્પણૈકબુદ્ધ્યા ।
સ્વયમુપદદિરે ત એવ ચેત્ તત્ કથમિવ કોશસમૃદ્ધિરસ્તુ નાસ્યાઃ ॥ ૬૬॥

શ્રિયમખિલધનાકરેષુ વાણીં વિશયપદેષુ મહાનસેઽન્નપૂર્ણામ્ ।
કરિતુરગપદેષુ વીરલક્ષ્મીં ન્યધિત સખીરધિકારિણીસ્તદા સા ॥ ૬૭॥

ધનકનકમતઙ્ગજાદિલક્ષ્મ્યો ધૃતવપુષઃ સકલાઃ કલાશ્ચ તસ્યામ્ ।
અદધત પરિચારિકાધિકારં ત્રિભુવનમાત રાજ્યપાલિકાયામ્ ॥ ૬૮॥

અનુસમયમશેત યદ્યપીયં તદપિ સદૈવ તુ જાગરામ્બભૂવ ।
પરિહૃતનિમિષેણ પાણ્ડ્યકન્યા તપનશશાઙ્કમયેન દૃગ્દ્વયેન ॥ ૬૯॥

અથ નૃપતિસુતાં કૃતાભિષેકાં વિમતજયવ્યવસાયિનીં વિધાતુમ્ ।

શરદુપનિપપાત શોષયન્તી પથિ પથિ પઙ્કકળઙ્કિતાન્ પ્રદેશાન્ ॥ ૭૦॥

તરુગિરિમરુસાગરાવિશેષં જગદખિલં જલરૂપતાં નયન્તઃ ।
સમુપચિતયશોભરા ઇવાસન્ સલિલમુચો વિમલાઃ સમન્તતોઽપિ ॥ ૭૧॥

પરિમિતપયસઃ પ્રશાન્તઘોષાઃ પરિગણનીયતટિન્નટીવિલાસાઃ ।
યદિ સલિલમુચોઽપિ તે બભૂવુઃ કિમિવ હિ વિશ્વસિમઃ સ્થિરં જગત્યામ્ ॥ ૭૨॥

અજનિષત હિ યેઽભિનન્દનીયાઃ સ્તનિતતટિજ્જલમેઘમારુતાદ્યાઃ ।
શરદિ તનુમતાં ત એવ નિન્દ્યા નનુ સમયાનુગુણા ગુણાઃ પ્રજાનામ્ ॥ ૭૩॥

શિશિરિતમવનીતલં સમૃદ્ધં વિપિનમપૂરિષતાશયા જલાનામ્ ।
વિરમતિ જલદેઽપિ કસ્ય હાનિઃ પરમિહ કેચન ચાતકાઃ પ્રનષ્ટાઃ ॥ ૭૪॥

ક્ષિતિતલમભિપૂર્ય વારિપૂરૈઃ કિસલયિતા વિરચય્ય વૃક્ષજાતીઃ ।
કિમપિ ફલમનાપ્ય નષ્ટમભ્રૈઃ ફલભુગયં પુનરાવિરાસ કાલઃ ॥ ૭૫॥

ઘનતિમિરમુખાદનેન મુક્તાવવતરતૈવ યદર્કશીતભાનૂ ।
તત ઇવ શરકોરકાપદેશાદ્ દિશિ દિશિ કીર્તિરનેહસો જજૃમ્ભે ॥ ૭૬॥

કથમપિ પરિભૂય મેઘબન્ધં કિયદિવ કન્દલિતે સુધામયૂખે ।
અલિકલભમુખેન હર્ષવાર્તા વ્યચલદિવોત્પલિનીકુમુદ્વતીનામ્ ॥ ૭૭॥

અતિષિતતમવર્તતામ્વુસત્રં સલિલમુચાં શરદા નિવારિતં તત્ ।
ઉદભવદિયમેવ કીર્તિરસ્યાઃ કિમિવ યશોઽન્યદતિપ્રસઙ્ગભઙ્ગાત્ ॥ ૭૮॥

વિરમતિ સતિ દુર્દિનેઽર્કચન્દ્રાવનુભવતામભવન્મુદસ્તદાસ્તામ્ ।
ગગનમપિ નિરીક્ષ્ય નિષ્કલઙ્કં કિયદિવ હન્ત શરીરિણોઽભ્યનન્દન્ ॥ ૭૯॥

મધુરવિમલવારિ મત્તભૃઙ્ગં પરિણતશાલિ પરાસ્તપઙ્કલેશમ્ ।
કિસલયિતવનં સમોષ્ણશીતં ક્ષિતિતલમેવ દિવોઽપિ ભોગ્યમાસીત્ ॥ ૮૦॥

કણિશકબલનોપજાતગર્વાઃ કલનિનદોપહૃતામૃતાઃ શુકૌઘાઃ ।
સમજનિપત સઙ્ઘતશ્ચરન્તો મદનવિસારિતવાગુરા ઇવાભ્રે ॥ ૮૧॥

પ્રભવતિ નલિની પ્રસેદુરાપો વિમલતરા વિલલાસ ચન્દ્રિકેતિ ।
જહૃષુરતિતરાં જના યદેષા વિરહિજનસ્ય વિપત્પરમ્પરાસીત્ ॥ ૮૨॥

સવિધગતપચેળિમેક્ષુપર્વપ્રસૃમરમૌક્તિકપાતકાન્દિશીકાઃ ।
દિશિ દિશિ શુકશારિકા અધાવન્ પરિ પૈરિશાલિયવાપ્રિયઙ્ગુદેશાન્ ॥ ૮૩॥

કમલવનમુપાશ્રિતા જરન્તઃ કરિકટભિત્તિમુપસ્થિતા યુવાનઃ ।
ઇતિ મધુપગણા દ્વિધા વિભિન્ના અપિ ખલુ કર્મકરાઃ સમં સ્મરસ્ય ॥ ૮૪॥

ચિરપરિમુષિતપ્રદેશચિહ્નાઃ સમુપગતાઃ સરસીઃ પુનશ્ચ હંસાઃ ।
કથમપિ રસવર્ણગન્ધભેદૈર્નિજાનિજમમ્બુજકોશમભ્યજાનન્ ॥ ૮૫॥

અતિવિમલમયત્નશીતમમ્ભઃ સ્ફુરદરવિન્દમુગન્ધયઃ સમીરાઃ ।
નિરુપધિકરુણામયી ચ રાજ્ઞીત્યજનિ જનેષુ પરમ્પરા શુભાનામ્ ॥ ૮૬॥

તત્તન્નૃપાલપરિપાલનસમ્પ્રસૂત-
  માલિન્યમાર્જનસમુજ્જ્વલિતાં ધરિત્રીમ્ ।
ભૂયઃ સ્વયં વિમલયન્ સમયઃ પ્રસાદં
  મન્યે ચકાઙ્ક્ષ મલયધ્વજકન્યકાયાઃ ॥ ૮૭॥

ઇતિ મહાકવિશ્રીનીલકણ્ઠદીક્ષિતપ્રણીતે શિવલીલાર્ણવે સપ્તમઃ સર્ગઃ ।

## અથાષ્ટમઃ સર્ગઃ ।

જાતુચિત્ તદનુ પાણ્ડ્યકુમારી ચિત્રિતે સદસિ રત્નગણેન ।
દર્શનૈરપિ ચ ષડ્ભિરલભ્યં દર્શનં નિજમદાત્ પ્રકૃતીનામ્ ॥ ૧॥

તાપસા દ્વિજવરા ધરણીશા બન્ધવઃ પરિજના ભટમુખ્યાઃ ।
પૌરજાનપદવન્દિગણાશ્ચ પ્રાવિશન્ સદસિ તત્ર વિચિત્રે ॥ ૨॥

તાન્ યથાયથમથોપચરન્તી સા પ્રણામવચનસ્મિતહાગ્ભિઃ ।
અક્ષમામજનયત્ ત્રિદશાનાં માનવેષુ મઘવત્પ્રભૃતીનામ્ ॥ ૩॥

વીજ્યમાનમભિતો યુવતિભ્યાં ચામરદ્વયમદૃશ્યત તસ્યાઃ ।
યત્પરત્વમથ યત્સુલભત્વં તદ્યશોયુગમિવાતિવિશુદ્ધમ્ ॥ ૪॥

છત્રમેકતરમુચ્છ્રિતમસ્યા મૂર્ધ્નિ તેન શિશિરં જગદાસીત્ ।
એતદત્ર હિ નિદર્શનમેષા યત્ પ્રપઞ્ચવપુષા પરિણેમે ॥ ૫॥

અસ્તુવન્ ક્વચન વન્દિગણાસ્તામસ્તુવન્નપરતઃ શ્રુતિસઙ્ઘાઃ ।
આદ્યમત્ર જગૃહુર્ગુણવત્ત્વાત્ સર્વ એવ ન પરં તદભાવાત્ ॥ ૬॥

સા વિસૃજ્ય સકલાનપિ લોકાનાનિનાય પરમાપ્તસખીભિઃ ।
માતરં રહસિ કાઞ્ચનમાલાં મન્ત્રણાય સુમતિં સચિવં ચ ॥ ૭॥

સન્નિવેશ્ય જનનીં નિજપીઠે સા ચ તચ્ચરણપીઠનિષણ્ણા ।

મન્ત્રિણા સુમતિના જયહેતોર્મન્ત્રમિત્થમમમન્ત્રત બાલા ॥ ૮॥

યઃ કિલાનુશરદં વિજયાર્થી પાર્થિવં ત્વરયસે ગમનાય ।
સ પ્રવર્તયસિ માં ન કથં ત્વં બાલિકેયમિતિ કિં વિશયાનઃ ॥ ૯॥

બાલિકાસ્મ્યનવગાઢરણાસ્મિ પ્રત્યુતોપનિહિતાસ્મ્યવરોધે ।
આશિષા તદપિ તાવદમુષ્યાસ્ત્વદ્ધિયા ચ વિજયાય યતિષ્યે ॥ ૧૦॥

મૈવમાલપ કદાચન વત્સે ! મન્ત્રિણા સુમતિના વિજયો નઃ ।
સ ત્વવૈતિ સમયોચિતમર્થં સર્વમિત્યભિદધે જનની તામ્ ॥ ૧૧॥

સ સ્મ તાં સુમતિરાહ કુમારીં સાસ્મતાં મૃદુતયા જનયિત્ર્યાઃ ।
સંસ્મરન્ ગુરુમતીતમમુષ્યા બાષ્પગદ્ગદપદં વિનયેન ॥ ૧૨॥

દેવિ! મે નિગદતઃ શ ૃણુ વત્સે ! યત્ ત્વમાત્થ મયિ સાનુજિઘૃક્ષા ।
તત્ તથૈવ પરથા ન કથઞ્ચિદ્ વેદવાદમુહૃદો હિ ગિરસ્તે ॥ ૧૩॥

સત્યમેવ વિજયે યતિતવ્યં સાધનં પ્રથમમત્ર વિપક્ષઃ ।
માર્ગયેઽહમપિ નોપલભે તં ન વ્યજિજ્ઞપમતમ્ત્વયિ કિઞ્ચિત્ ॥ ૧૪॥

ઇત્થમુક્તવતિ મન્ત્રિવરેઽસ્મિન્ કુમ્ભભૂઃ સ્વયમુપેત્ય મહર્ષિઃ ।
આશિષો બહુવિધા વિરચય્ય વ્યાજહાર મલયધ્વજકન્યામ્ ॥ ૧૫॥

સાધયિષ્યસિ કરગ્રહણં ત્વં સર્વથા ચલતુ તે જયયાત્રા ।
ભૂરિયં ભવતુ પુણ્યતમા તે પાવનીભિરભિતો ભ્રમણીભિઃ ॥ ૧૬॥

ઇત્યુદીર્ય જયનામ્નિ મુહૂર્તે તાં પ્રવેશ્ય સબલામુપશલ્યમ્ ।
તત્કરગ્રહમહોત્સવવીક્ષાકૌતુકી સ મલયં વિજગાહે ॥ ૧૭॥

સજ્જિતૈવ પૃતના સકલેયં કિન્ત્વિમાં નિશમિહ વ્યતિલઙ્ઘય ।
શ્વઃ પ્રયાહિ વિનિવર્ત્ય નિવર્ત્યાનિત્યુવાચ સુમતિર્જનનીં તામ્ ॥ ૧૮॥

પાર્શ્વમુત્તરમપિ ત્રિદશાદ્રેઃ સા પ્રયાસ્યતિ યતો વિજયાય ।
તન્નિરીક્ષિતુમિવ પ્રથમં તં પ્રસ્થિતો દિનકરશ્ચરમાદ્રૌ ॥ ૧૯॥

નિષ્પતન્નપિ રવિશ્ચરમાબ્ધાબુદ્દધાર કિરણાનનુયાતાન્ ।
ઈદૃશં વ્યસનમસ્પૃશતઃ કિં લોકબન્ધુરિતિ જીર્યતિ શબ્દઃ ॥ ૨૦॥

નિર્મમજ્જ ન જલે કતિ વારાનુન્મમજ્જ ન પુનઃ કતિ વારાન્ ।
અદ્ય ભાસ્વતિ મિમઙ્ક્ષતિ વિપ્રૈરર્પિતા બત જલાઞ્જલયોઽપિ ॥ ૨૧॥

નાધુનાપિ કથમસ્તમુપૈતીત્યાર્દ્રકોપપરિપાટલકોણૈઃ ।
વીક્ષિતો નુ નયનસ્તરુણીનામંશુમાનરુણિમાનમયાસીત્ ॥ ૨૨॥

કર્ષણાદુપલકણ્ટકદુર્ગેષ્વન્તરા શિથિલિતાસ્ત્રુટિતાશ્ચ ।
અંશવઃ કતિચિદંશુમતઃ કિં સાન્ધ્યરાગમપદિશ્ય નિષેદુઃ ॥ ૨૩॥

પશ્ચિમાચલગુહાસુ નિલીનૈઃ પ્રાર્થિતા નુ તિમિરૈર્બલવદ્ભિઃ ।
સાન્ધ્યરાગનિભતો દિનભર્તુર્ભાનવઃ કતિપયે પથિ લગ્નાઃ ॥ ૨૪॥

અધ્વખેદશિથિલા જરઢા યે ભાનવો દિનમણેઃ પથિ લગ્નાઃ ।
દીપિકાહુતભુજામનુસાયં તેઽભવન્નતિથયો ભવનેષુ ॥ ૨૫॥

યે સહૈવ પતિતાઃ પતતાબ્ધો યે ચ દૂરતરમેવ નિવૃત્તાઃ ।
તે દ્વયેઽપિ સદૃશા દિનબન્ધોરીદૃશઃ પ્રભવતામવિવેકઃ ॥ ૨૬॥

સઙ્કુચન્નવદલારરમૂલસ્થાનદત્તમધુપોપલખણ્ડામ્ ।
અમ્બુજોદરકુટીમપિધાય શ્રીરપિ સ્વયમિતો નિરયાસીત્ ॥ ૨૫॥

આપ્રભાતમપિ નર્તિતુકામા વ્યોમરઙ્ગભવનેઽવતરન્તી ।
કિં નિશૈવ વિચકાર સમન્તાદઞ્જલીનુડુનિભાત્ કુસુમાનામ્ ॥ ૨૮॥

મજ્જતીવ ન મમજ્જ દિનેશો નાંશવોઽસ્ય નિખિલાશ્ચ નિવૃત્તાઃ ।
ક્વ સ્થિતાનિ મિલિતાનિ કુતો વા તાવદેવ તિમિરાણ્યભિવવ્રુઃ ॥ ૨૯॥

આકલય્ય ધનુરાકલિતજ્યં તસ્થુષઃ સવયસો મદનસ્ય ।
અઞ્ચલે નિશિતમાદિમમસ્ત્રં ચન્દ્રમા મુકુલનેન ચકાર ॥ ૩૦॥

સર્વરાત્રમપિ સા જનયિત્ર્યા સઁલ્લપન્ત્યવિરલં શફરાક્ષી ।
પઞ્ચષક્ષણમિતામિવ મેને તામ્રચૂડનિનદેન તમિસ્રામ્ ॥ ૩૧॥

આજ્ઞયા સ સુમતેરધિસૈન્યં તાડિતો વિજયદુન્દુભિરસ્યાઃ ।
આરવૈર્જલદનાદગભીરૈરાવૃણોદિવ દિવઞ્ચ ભુવઞ્ચ ॥ ૩૨॥

નિર્જરાઃ કિમપિ પાણિવિહારૈઃ પન્નગાસ્તુ પુનરક્ષિનિકોચૈઃ ।
તૈર્દ્વયૈરપિ નરા વ્યવજહુસ્તદ્રવૈર્મુખરિતે જગદણ્ડે ॥ ૩૩॥

ઉચ્છ્રિતધ્વજમુપસ્થિતયોધં સજ્જવારણતુરઙ્ગશતાઙ્ગમ્ ।
સન્નનાહ સકલં બલમસ્યાસ્તૂર્યઘોષમુખરં નિમિષેણ ॥ ૩૪॥

દિગ્જયાય કૃતમઙ્ગલરક્ષા સા ત્રિલોકજનની જનયિત્ર્યા ।
નિર્જગામ શિબિકામધિરૂઢા સમ્પ્રચાલ્ય સકલં બલમગ્રે ॥ ૩૫॥

અગ્રતો ભટગણૈરથ વાહૈઃ કુઞ્જરૈરથ રથૈરથ ભૃત્યૈઃ ।
સૌવિદલ્લનિકરૈરથ તસ્યા દૂરતઃ પ્રચલિતં શિબિકાગ્રે ॥ ૩૬॥

રાજચિહ્નનિવહૈર્મણિવેત્રૈર્વલ્લકીડમરુવેણુમૃદઙ્ગૈઃ ।
ગદ્યપદ્યપઠનૈરપિ સેવાં સુભ્રુવો વિદધિરે ધુરિ તસ્યાઃ ॥ ૩૭॥

અગ્રતશ્ચલદસઙ્ખ્યતુરઙ્ગોદ્ધૂતભૂતલરજઃસ્થગિતાર્કે ।
દિક્તટેઽપિ બુબુધે સરણિઃ સ્વા તદ્બલેન પવનૈરનુકૂલૈઃ ॥ ૩૮॥

સૈન્ધવૈર્ધુરિ સમુદ્ભ્રમિતા યે પાંસવો દશ દિશઃ પરિવવ્રુઃ ।
તાનશીશમદિહ દ્વિરદાનાં દાનશીકરકિરઃ શ્રુતિવાતઃ ॥ ૩૯॥

વિશ્વથેષુ શરદાગમયોગાદ્ વિષ્વગૈક્ષત પયોદકુલેષુ ।
શાતમન્યવશરાસનખણ્ડં હસ્તલભ્યમિવ હસ્તિપકાનામ્ ॥ ૪૦॥

દંશિતસ્તુરગબદ્ધનિષઙ્ગો બાણપાણિરધિરોપિતચાપઃ ।
આપ્તસૈન્યસહિતઃ સુમતિસ્તામન્વયાચ્ચરમતઃ શરપાતે ॥ ૪૧॥

ઉદ્ગૃહીતવિહિતૈરુપહારૈર્વેત્રપાતચકિતાઃ કૃતસઙ્ઘાઃ ।
આકુમારમવલોકયિતું તાં પ્રસ્થિતાં પ્રકૃતયઃ પરિવવ્રુઃ ॥ ૪૨॥
મુગ્ધસલ્લઁપનકૌતુકભૂમ્ના મન્દચાલિતમણીશિબિકા સા ।
સમ્પ્રવાદમશ‌ૃણોદિતિ તાસાં ગ્રામ્યભાવપિશુનં વિહસન્તી ॥ ૪૩॥

પશ્ય ! કાલિ! મલયધ્વજકન્યાં કુન્જિકે! જનકવન્મુખમસ્યાઃ ।
જ્યાયસી હિ દુહિતુર્મમ માસૈઃ પઞ્ચષૈરિયમહો શિશુરેવ ॥ ૪૪॥

ચણ્ડવાતવિગમાદનુ જાતા નન્વિયં તુરગકર્મણિ રાજ્ઞઃ ।
કીદૃશી ચતુરતા પુનરસ્યાઃ કીદૃશસ્તુ ભવિતા ગૃહમેધી ॥ ૪૫॥

સન્તિ નઃ શતમજા દશ ગાવઃ પઞ્ચષાશ્ચ મહિષા દયયા તે ।
ગવ્યમેતપદુપયુઙ્ક્ષ્વ કદુષ્ણં દૂરમમ્બુતૃષિતાસિ પથિ ત્વમ્ ॥ ૪૬॥

અસ્તિ પર્યુષિતમસ્તિ યવાગૂઃ સન્તિ વંશશકલાદ્યુપદંશાઃ ।
શીતમુષ્ણમપિ વા પિબ કામં ગચ્છ પુત્રિ! ન પુનસ્તૃષિતા ત્વમ્ ॥ ૪૫॥

પ્રાર્થયેમહિ વયં ભવદર્થે કુક્કુરૈશ્ચ પશુભિસ્સહ દેવીમ્ ।
ગચ્છ પુત્રિ! સુખિની પુનરેહિ ત્વાં કથં નુ મુમુચે જરતી સા ॥ ૪૮॥

કિં ત્વમેવ મલયધ્વજકન્યેત્યાલપન્ત્યભિમૃશન્તિ કરાગ્રૈઃ ।

આશિષશ્ચ દદતે શતશો યાસ્તા યથાયથમુપાચરદેષા ॥ ૪૯॥

યત્ર યત્ર પરિપશ્યતિ બાલા પાદપાન્ ક્ષિતિભૃતઃ સરિતો વા ।
તત્ર તત્ર નિભૃતાર્પિતદૃષ્ટિઃ કૌતુકેન પથિ સા ચિરમાસીત્ ॥ ૫૦॥

તાવતી કિલ ચમૂરપિ તસ્યાઃ પાંસુલે પથિ શનૈઃ પ્રચલન્તી ।
પાર્શ્વતો ન નિદધે પદમાત્રં પાત્રમધ્યપતિતા તટિનીવ ॥ ૫૧॥

નાદદે પથિ ફલાનિ ન ચે ક્ષૂન્ કા કથાવતરણે કલમેષુ ।
પુષ્પગન્ધમપિ મારુતનીતં જિઘ્રતિ સ્મ પૃતના ચકિતાસ્યાઃ ॥ ૫૨॥

કિં ધમેમ જલધીન્ મુખવાતૈઃ કિં ક્ષિપેમ નખરૈર્ગિરિકૂટાન્ ।
ઇત્યખણ્ડિતચલદ્રણકણ્ડૂદુર્મદૈરગણિ તત્ર ચમૂપૈઃ ॥ ૫૩॥

યાવદમ્બરમણિર્દિનમધ્યં નાધિરોહતિ સુદુર્વિષહોષ્મા ।
તાવદેવ સુમતિર્હૃદયજ્ઞો વિશ્રમાય બલમાદિશદસ્યાઃ ॥ ૫૪॥

નાળિકેરપનસક્રમુકામ્રસ્પર્ધમાનકદળીચવણાયામ્ ।
તીરસીમનિ કવેરસુતાયાસ્તદ્ બભૂવ શિબિરં શફરાક્ષ્યાઃ ॥ ૫૫॥

પ્રાગ્ગતૈરધિકૃતૈઃ પ્રવિભજ્ય સ્થાપિતેષુ પટવેશ્મસુ તસ્મિન્ ।
સ્વં સ્વમેત્ય વિજયધ્વજાચહ્નં નિર્વિવાદમવિશન્ બલમુખ્યાઃ ॥ ૫૬॥

વિસ્તૃતાભિરભિતો વિપણીભિર્વેશ્મભિશ્ચ વિપુલૈઃ સકલાનામ્ ।
અન્વયાદિવ પુરી મધુરૈવ સ્વામિનીં પટનિકેતમયી તામ્ ॥ ૫૭॥

સ્વેદરજ્યદલિકાન્તનિમજ્જદ્ધૂસરાળકતયાધિકદૃશ્યમ્ ।
આનનં વિકસિતેક્ષણમસ્યા ધ્યાનમઙ્ગલમભૂદ્ ભુવનાનામ્ ॥ ૫૮॥

સાવતીર્ય શિબિરપ્રતિહારે સૈનિકાન્ સમનુગૃહ્ય કટાક્ષૈઃ ।
કલ્પિતં સુમતિના બહુકક્ષ્યં પાણ્ડરં પટગૃહં પ્રવિવેશ ॥ ૫૯॥

આવૃતં બહુભિરાવરણૈસ્તદ્ દીર્ઘિકોપવનશોભિતમન્તઃ ।
સા મણીકલશસમ્ભૃતમુચ્ચૈર્દર્શિતં સુમતિના વિલુલોકે ॥ ૬૦॥

અત્યુદારમવબદ્ધવિતાનં ક્લૃપ્તમઞ્ચમુપબર્હવિશોભિ ।
ધૂપિતં કુસુમદામસુગન્ધિ પ્રાવિશચ્છયનમન્દિરમમ્બા ॥ ૬૧॥

યત્ સહસ્રદલમાગમગમ્યં પઙ્કજં વિમલચિન્મયમસ્તિ ।
ન્યાઞ્ચિતં તદિવ કૌતુકહેતોઃ પાણ્ડરં પટગૃહં શુશુભેઽસ્યાઃ ॥ ૬૨॥

સા નિવિશ્ય મૃદુલે શયનીયે સંવિસૃજ્ય સુમતિં શુભયોક્ત્યા ।
અધ્વખેદમવરોપિતભૂષા સલ્લઁપન્ત્યપજહાર સખીનામ્ ॥ ૬૩॥

વિશ્રમય્ય બલમેતદુપેતં સન્નિપાત્ય ચ ચમૂમનુયાન્તીમ્ ।
શ્વો નિષદ્ય સુખમત્ર પરશ્વો યામ ઇત્યભિદધે સચિવેન ॥ ૬૪॥

સંવૃતે પયસિ સહ્ય પુતાયા ભિત્તિભિર્નવદુકૂલમયીભિઃ ।
ક્લૃપ્તમજ્જનવિધિઃ સવયોભિઃ સોપસજ્ય વિજહાર કુમારી ॥ ૬૫॥

મુક્તપલ્યયનવિશ્રમિતાશ્વં સ્રસ્તબન્ધસુખિતદ્વિપસઙ્ઘમ્ ।
સ્નાતપીતસુખસુપ્તભટં તચ્છાસનેન મુમતેર્બલમાસીત્ ॥ ૬૬॥

સાપરેદ્યુરધિરુહ્ય તુરઙ્ગં સઞ્ચરન્ત્યવનિપાલકુમારી ।
તૃપ્તિમાપ ન કવેરસુતાયાઃ કામનીયકમવેક્ષમવેક્ષમ્ ॥ ૬૭॥

તત્પ્રતીરભુવિ કેરતરૂણાં હસ્તલભ્યમુપયુજ્ય ફલામ્ભઃ ।
નિર્જરા વિધુકલામૃતભાગાનાપિબન્તિ સકૃદૌષધરીત્યા ॥ ૬૮॥

તજ્જલં નિપતિતં કચિદન્તઃ સ્તબ્ધમાસ્ત કિલ યત્ર પયોધેઃ ।
તત્પ્રદેશવિષયસ્તનુભાજામિક્ષુસારજલાધિવ્યવહારઃ ॥ ૬૯॥

સા વહેત યદિ સર્વપથીના કિં ન સા ત્રિપથગાર્ધમમુષ્યાઃ ।
અર્થમેનમવબુદ્ધ્ય જનાસ્તામર્ધજહ્નુતનયેતિ ગૃણન્તિ ॥ ૭૦॥

તામગસ્ત્યગૃહિણીં પરિણમ્રાં તત્ર સિન્ધુવપુષા ગૃણતી સા ।
નન્વિયં ભવતિ નો ગુરુપત્નીત્યાદરં દૃઢમધત્ત સખીનામ્ ॥ ૭૧॥

સા તુ દિવ્યસરિતોઽપિ વિશિષ્ટાં પ્રીતિમાતનુત સહ્યસુતાયામ્ ।
સા હ્યસાવિવ યતો ન સપત્ની તેન તેન્ન તુ ગુરોર્ગૃહિણીતિ ॥ ૭૨॥

સ્વર્ગમાહુ રવગાહફલં યં સોઽપવર્ગ ઇતિ મે મતિરસ્યામ્ ।
સ્વર્ગતોઽપિ મધુરાં ભજતાં તાં સ્વર્ગ ઇત્યભિમતં કિમિવાન્યત્ ॥ ૭૩॥

સા હયેન વિશદેન ચરન્તી સમ્પરીત્ય સકલં કટકં તત્ ।
આસદત્ પટકુટીમનુ સાયં સૈનિકૈઃ પરિમિતૈરનુયાતા ॥ ૭૪॥

પ્રસ્થિતાં પરિચરન્ પથિ દેવીં સેવયા વિવિધયા સુમતિસ્તામ્ ।
એક એવ બહુધા પરિણેમે યામિકશ્ચ સચિવશ્ચ ભટશ્ચ ॥ ૭૫॥

દિગ્જયાય ચલિતામથ દેવીં તાં નિશમ્ય શતશો ધરણીશાઃ ।
સમ્પ્રગૃહ્ય વિવિધાનુપહારાનાયયુઃ શરણમર્થયમાનાઃ ॥ ૭૬॥

સૂક્તિભિઃ સુમતિસઙ્ક્રમિતાભિઃ સ્વાં ચિરાત્ પ્રવણતાં ભગવત્યામ્ ।
તે નિવેદ્ય દયયાનુગૃહીતાઃ સન્નિધિં સમુપજગ્મુરમુષ્યાઃ ॥ ૭૭॥

કીર્ણરત્નકુસુમાઞ્જલયસ્તે વાહનાનિ ચ ધનાન્યુપહૃત્ય ।
સૂચિતાસ્સુમતિના સ્વયમસ્યાઃ પાદપીઠનિકટે પ્રણિપેતુઃ ॥ ૭૮॥

મા બિભીત મુખિનઃ પ્રતિયાતેત્યાકલય્ય મૃદુલાં ગિરમસ્યાઃ ।
ઉત્થિતા ગિરમવાદિષુરિત્થં તે નિરીક્ષિતપરસ્પરવક્ત્રાઃ ॥ ૭૯॥

માદૃશેષુ મલયધ્વજદેવો યામધત્ત કરુણાં કરુણાબ્ધિઃ ।
સા ત્વયા શતગુણા નિહિતૈવં કિન્તુ કિઞ્ચિદિદમસ્તિ નિવેદ્યમ્ ॥ ૮૦॥

અર્પિતાત્મસુ સદા કુલદાસેષ્વસ્મદાદિષુ ચ સત્સુ ભટેષુ ।
સ્વામિની યદિ વિધિત્સતિ યાત્રાં કા યશઃક્ષતિરિતોઽપિ કુલે નઃ ॥ ૮૧॥

તત્ પ્રયાતુ ભવતી પુનરમ્બામસ્તુ ચૈષ સુમતિઃ સ્થપતિર્નઃ ।
ત્વત્પ્રસાદકણિકામવલમ્બ્ય દ્યોચરાનપિ સમાનમયામઃ ॥ ૮૨॥

ઈદૃશા ભવથ યૂયમિમાં માં દ્રષ્ટુમેવ તુ વયં ચલિતાઃ સ્મઃ ।
કૌતુકં તુ યદિ વઃ સહ યાતેત્યન્વશાત્ સદસિ સા નરપાલાન્ ॥ ૮૩॥

ભૂષણૈઃ સુમતિહસ્તવિતીર્ણૈર્વાહનૈર્બહુવિધૈશ્ચ નૃપાલાન્ ।
સા યથાક્રમમિમાન્ બહુમત્ય વ્યાદિદેશ કટકાવતરાય ॥ ૮૪॥

તાં વાક્યેષુ ગભીરતામથ ચ તાં કાલોચિતાર્થજ્ઞતાં
તાં નમ્રેષુ કૃપાલુતામપિ ચ તાં કીર્ત્તૌ પરં લુબ્ધતામ્ ।
સમ્પશ્યન્ પ્રમદાદ્ભુતવ્યતિકરસ્તબ્ધસ્ત્વમાત્યોઽસકૃત્
પાદેઽસ્યાઃ પ્રણનામ વત્સલતયા પ્રાયુઙ્ક્ત ચાપ્યાશિષઃ ॥ ૮૫॥

ત્વત્સાચિવ્યબલાનતાન્ ક્ષિતિભુજસ્ત્વચ્છિક્ષિતૈરક્ષરૈ-
સ્ત્વત્સાન્નિધ્યબલાત્ કિલેદમવદં કિઞ્ચિદ્યથોપસ્થિતમ્ ।
કર્તવ્યં યદિતોઽપિ તત્ર સુમતે! કામં પ્રમાણં ભવા-
નિત્યુક્ત્યેયમપાચકાર નિખિલં સેવાશ્રમં મન્ત્રિણઃ ॥ ૮૬॥

ઇતિ મહાકવિશ્રીનીલકણ્ઠદીક્ષિતપ્રણીતે શિવલીલાર્ણવે અષ્ટમઃ સર્ગઃ ।

## અથ નવમઃ સર્ગઃ ।

તાં ગીતસંવલિતમર્દ્દલવેણુવીણાનાદામૃતાધિગમિતસ્વપના સખીભિઃ ।
વૈતાલિકા ઇવ સુશિક્ષિતતારવાચઃ પ્રાબોધયન્ મૃગદૃશઃ કતિચિત્ પ્રભાતે ॥ ૧॥

અમ્બ ! ત્વદભ્યુદયતો નિહતં પુરૈવ હન્તું તમઃ પુનરસાવરુણઃ સમુદ્યન્ ।
સુપ્રાતમાવહતિ દેવિ! રથાઙ્ગનામ્નાં સાજાત્યરક્તચરણાયુધબોધિતાનામ્ ॥ ૨॥

આયાસ્યતો દિનમણેરભિકસ્ય વાર્તાં પ્રાભાતિકાનિલમુખાદવધારયન્તી ।
ઉદ્દણ્ડપઙ્કજતયા કિલ પદ્મિનીયમુદ્ગ્રીવિકાં વહતિ વાસકસજ્જિકેવ ॥ ૩॥

પત્યુસ્ત્વિષાં પ્રથમનિર્ગલિતૈર્મયૂખૈર્ધ્વાન્તેર્ષ્યયા મલિનદર્શમનુદ્રવદ્ભિઃ ।
ઉચ્ચાટિતા મધુકૃતોઽપિ કિમુત્પલેભ્યઃ પર્યાકુલાસ્તત ઇતોઽપિ પરિભ્રમન્તિ ॥ ૪॥

હંસેષુ કઞ્ચુકિષુ ષટ્ચરણેષુ કુબ્જેષ્વાદેશહારિષુ મરુત્સુ ચ સઙ્ગતેષુ ।
ઉદ્ઘાટયન્ત્યધિકૃતા ઇવ શાર્ઙ્ગપાણેરન્તઃપુરં ઘટિતમંશુમતો મયૂખાઃ ॥ ૫॥

ઉન્મુદ્રિતે સતિ મનાગરવિન્દકોશે ભૃઙ્ગૈરહમ્પ્રથમિકાકલિતપ્રવેશૈઃ ।
આસ્કન્ધમાનમપિ સૌરભમેકતસ્તદાદાય યાન્ત્યપરતો મરુતો યથેચ્છમ્ ॥ ૬॥

ભૂદેવમન્ત્રિતવિમુક્તજલાઞ્જલિભ્યો નિર્ગત્ય દૈત્યહનનાય સમન્તતોઽપિ ।
આસીદતામિવ રવિં મહસા પવીનાં પૌરન્દરી હરિદિયં પરિપિઞ્જરાસીત્ ॥ ૭॥

અમ્ભોનિધેસ્તપનવાજિભિરુજ્જિહાનૈરાધૂતકન્ધરસટૈરસકૃદ્વિકીર્ણા ।
સામુદ્રવિદ્રુમલતાશકલાવલીયં પ્રાચીમુખે વિજયતે નતુ સાન્ધ્યરાગઃ ॥ ૮॥

નિર્જિત્ય વિશ્વમખિલં મકરધ્વજેન નિર્ગચ્છતા શિબિરસીમનિ દીપિતમ્ય ।
મન્યામહે હુતભુજઃ પ્રથમપ્રકાશો મારુત્વતે જયતિ સમ્પ્રતિ દિગ્વિભાગે ॥ ૯॥

જૈત્રપ્રયાણસમયં ત્વયિ વક્તુકામઃ પ્રાયઃ પ્રબોધસમયં પ્રતિપાલ્ય ભાનુઃ ।
ઉન્મજ્જ્ય સાગરજલાદુદયાદ્રિશૃઙ્ગે લીનઃ ક્વચિન્ન કિલ દર્શયતેઽધુનાપિ ॥ ૧૦॥

આમોદતે બત કિયત્ કમલાકરોઽયમસ્મિન્નપિ પ્રવિકસત્યરવિન્દકોશે ।
ઉન્મુદ્રય ત્વમધુના નયનારવિન્દમામોદતામખિલમમ્બ! જગત્ ત્વયેદમ્ ॥ ૧૧॥

સુપ્રાતમસ્તુ મલયધ્વજકન્યકાયાઃ મુપ્રાતમસ્તુ મધુરાપુરવલ્લભાયાઃ ।
સુપ્રાતમસ્તુ વિધુવંશપતાકિકાયાઃ સુપ્રાતમસ્તુ હરિતાં જગતાં ત્રયાણામ્ ॥ ૧૨॥

ઇત્યુક્તિભિર્મુગદૃશાં પ્રતિબોધિતા સા નિર્વર્ત્ય નૈત્યિકવિધિં નૃપતેઃ કુમારી ।
સજ્જીકૃતં સુમતિના સકલં બલં તત્ પ્રસ્થાપ્ય પાર્થિવકુલાનુગતા પ્રતસ્થે ॥ ૧૩॥

અત્યદ્ભુતો વિજયદુન્દુભિનાદમન્ત્રસ્તસ્યા નૃપાલકુલકર્ણપથાવતીર્ણઃ ।
અસ્તમ્ભયદ્વ્યધમદાચકૃષે જઘાન નિન્યે વશં વ્યઘટયચ્ચ યથાયથં તાન્ ॥ ૧૪॥

ભેરીરવશ્ચલતિ યોજનમેવ યાવત્ તાવત્ તતો દશગુણં ચલિતઃ પ્રતાપઃ ।
કીર્તિસ્તતો દશગુણં વ્યચલત્ તતોઽપિ ચેલુસ્તતો દશગુણં વિમતા વિદૂરે ॥ ૧૫॥

વાર્ત્તાહરા દિશિ દિશિ પ્રહિતા હિ યાવદાગત્ય મન્ત્રિણિ ન તં તમુદન્તમાહુઃ ।
તાવત્ ત એવ ધરણીપતયઃ સદારાઃ સોપાયનાઃ શરણમીયુરિમાં સવાલાઃ ॥ ૧૬॥

આગચ્છતાં પ્રણમતાં વદતાં પ્રિયોક્તીરગ્રે નિધાય વિવિધાનુપહારભેદાન્ ।
રાજ્ઞામનુગ્રહકૃતે સુમહાન્ વિલમ્બો માર્ગેઽભવત્પ્રતિપદં મધુરેશ્વરાયાઃ ॥ ૧૭॥

રાજ્યં પ્રશાસતિ પુરા મલયધ્વજે યે ભૂમીભુજઃ કતિપયેઽપરરાધુરજ્ઞાઃ ।
તાનપ્યનન્યશરણાન્ સમુતાન્ સદારાન્ સા ચક્ષુષાનુજગૃહે શરણં પ્રપન્નાન્ ॥ ૧૮॥

સા તત્ર તત્ર શરણાગતરાજલોકવિશ્રાણિતાનિ મણિહેમવિભૂષણાનિ ।
માતુઃ સમક્ષમખિલાન્યુપહારયન્તી કીર્તિં પરાં વિતરતિ સ્મ દિશાં મુખેષુ ॥ ૧૯॥

દુર્ગાટવીનગરરાષ્ટ્રપદાનિ તૈસ્તૈસ્ત્યક્તાનિ યુદ્ધનિહતૈશ્ચ પલાયિતૈશ્ચ ।
ભૃત્યેષુ સા કુલપરમ્પરયાગતેષુ ન્યાસીચકાર સચિવાનુમતેષુ રાજ્ઞી ॥ ૨૦॥

નાસીરસીમપરિવર્તિભિરેવ યોધૈર્વિદ્રાવિતાન્ વિનિહતાનપિ વા ગૃહીતાન્ ।
સા શ◌ૃણ્વતી નરપતીનપિ નાત્યહૃપ્યત્ સઙ્ગ્રામદર્શનકુતૂહલિની કુમારી ॥ ૨૧॥

ત્યક્તાન્ ભયાત્ પ્રચલિતૈઃ પિતૃભિઃ સ્વભેરીભાઙ્કારનિર્લુઠિતગર્ભપરિચ્યુતાંશ્ચ ।
સા દર્શિતાન્ પથિ શનૈરવલોકયન્તી સ્વે સ્વે પદે નૃપશિશૂન્ પુનરભ્યષિઞ્ચત્ ॥ ૨૨॥

રાજ્યશ્રિયં પ્રણિપતત્સુ નરેશ્વરેષુ રત્નાનિ હેમનિવહાનપિ ભૂસુરેષુ ।
કીર્તિં પ્રતાપમપિ સા હરિતાં મુખેષુ રાજાધિરાજતનયા વિકિરન્ત્યયાસીત્ ॥ ૨૩॥

સમ્ભ્રાન્તનિષ્પતિતતત્તદરાતિરાજશુદ્ધાન્તયૌવતજનૈઃ પતિપુત્રભિક્ષામ્ ।
સા ભિક્ષિતાનુજગૃહે કરુણાતરઙ્ગસમ્પાતશીતલસમુલ્લસિતૈરપાઙ્ગૈઃ ॥ ૨૪॥

પાષણ્ડસાગરનિમજ્જદનાદિસૂક્તિનિસ્તારણાય ધૃતમાનુપવિગ્રહાયાઃ ।
મીનો મહાન્ વિરુરુચે વિજયધ્વજેઽસ્યા નાસીરસીમનિ નરેન્દ્રકુમારિકાયાઃ ॥ ૨૫॥

બાહુપ્રતાપવિજિતાભિરરાતિરાજરાજ્યેન્દિરાભિરિવ રાજમુતા સખીભિઃ ।
પર્યાવૃતા પિતૃપિતામહપાલિતોર્વીસીમાપરિષ્કરણમાપ તુષારશૈલમ્ ॥ ૨૬॥

પ્રાલેયશૈલશિખરાદવનૌ નિપત્ય ભાગીરથીં કનખલં પરિતો વહન્તીમ્ ।
દૃષ્ટ્વૈવ સા સ્વયમભૂજ્જનનાન્તરીયસોદર્યતાપ્રણયવિદ્રવદન્તરઙ્ગા ॥ ૨૭॥

સ્રોતાંસિ તાન્નિ કબલીકૃતદિઙ્મુખાનિ યાદાંસિ તત્ર ચ મહાન્તિ સમુલ્લલન્તિ ।
અપ્રેક્ષિતશ્રુતચરાણ્યવિતર્કિતાનિ ચિત્રાર્પિતેવ ચિરમૈક્ષત પાણ્ડ્યકન્યા ॥ ૨૮॥

પ્રાગેવ પાણ્ડ્યતનયાચરણારવિન્દસેવાનુભાવચિરનિર્હૃતકલ્મષાસુ ।
સેનાસુ તત્ર જલમાત્રકૃતોપયોગા હ્રીણેવ સા સરિદવાપદવાઙ્મુખત્વમ્ ॥ ૨૯॥

આલક્ષ્ય તામમરસિન્ધુમપારપૂરાં સ્રોતોદશાં સ્વયમપિ પ્રતિપદ્ય સદ્યઃ ।
અમ્ભોનિધિર્ન્યવિશતેવ તટે તદીયે સેનાનિભેન મલયધ્વજકન્યકાયાઃ ॥ ૩૦॥

સેનાં પૃથક્ પૃથગિમાં વિરલં નિવેશ્ય માયાપુરીપરિસરે સુમતિઃ સમસ્તામ્ ।
આસાદ્ય પાણ્ડ્યતનયામિદમાબભાષે ગઙ્ગાતરઙ્ગલતિકાહૃતદૃક્તરઙ્ગામ્ ॥ ૩૧॥

પશ્યામ્બ ! કીર્ત્તિમિવ તે ભુવનં પુનાનામેનાં દયાભિવ તવાસ્ખલિતપ્રવાહામ્ ।
સૂક્તિં તવેવ ચ સુધામધુરાં ગભીરાં ભાગીરથીં ભવજટાપટલાત્ પ્રવૃત્તામ્ ॥ ૩૨॥

નિશ્રેણિકેયમપવર્ગપદાધિરોહે નૌકેયમમ્બ ! દુરિતાર્ણવસમ્પ્રતારે ।
એષા સુધા ભવાવિષજ્વલનાભિષઙ્ગે જ્યોત્સ્નેયમાન્તરતમોભિભવે જનાનામ્ ॥ ૩૩॥

બ્રહ્મર્ષિશાપનિહતાન્ ભસિતાવશેષાનેષા દિવં સગરરાજસુતાનનૈષીત્ ।
એષા ચ કર્મધરણીઘટનાનપેક્ષા સ્રોતસ્ત્રયેણ ભુવનત્રિતયં પુનીતે ॥ ૩૪॥

કર્માણિ પશ્યત હરેરિતિ ઘોષયન્તિ યત્ સેતુબન્ધનમુખાનિ ગિરઃ પુરાણ્યઃ ।
સોઽપ્યર્ણવો નનુ રસાતલમાવિશન્ત્યાઃ પાર્શ્વામ્બુલેશપરિવર્ત્તનપૂરિતોઽસ્યાઃ ॥ ૩૫॥

નીહારભૂધરાશિલાવલયાભિઘાતનિર્ગચ્છદચ્છજલશીકરનિર્વિશેષૈઃ ।
અમ્બાવધેહિ કનકધ્વજમાત્રલક્ષ્યૈરેતાં વૃતાં દિવિષદામભિતો વિમાનૈઃ ॥ ૩૬॥

આસ્તામદૃષ્ટમદસીયમિહાનુભાવ્યં દૃષ્ટં ચ કિં ક્વચન દૃષ્ટમથ શ્રુતં વા ।
યા યાદૃશીયમથ યાસિ ચ યાદૃશી ત્વં તે દ્વે યુવાં પરામિહ વ્યતિસંવિદાથે ॥ ૩૭॥

એતાવતી જનનિ! ભારતવર્ષભૂમિરેષૈવ તે કુલપરમ્પરયાગતા ભૂઃ ।
સ્નાનેન પાવનજલામપિ પાવાયત્વા ભૂયોઽપ્યમૂં પ્રતિનિવર્તિતુમૌચિતી વઃ ॥ ૩૮॥

ઇત્યાલપન્તમિયમાહ તમેવમેતન્મન્દાકિનીં પ્રતિ યથાત્થ મહામતે! ત્વમ્ ।
લબ્ધસ્થિરીકરણમાત્રભવં યશસ્તુ સઞ્ચિન્ત્યમાનમયશઃપરિહાર એવ ॥ ૩૯॥

એનાં વિગાહ્ય તદશેષતમોપહન્ત્રીમેતદ્બલેન સુરસિદ્ધનિષેવિતાનિ ।
વર્ષાણિ તાવદિતરાણ્યપિ સાધયેયં સેનામિહૈવ વિનિવેશ્ય ભવત્સહાયા ॥ ૪૦॥

ત્વત્પાદસેવનકૃતાં ત્રિદિવે કરસ્થે કા નામ ભૂમિવલયાક્રમણેઽપિ શઙ્કા ।

સાહ્યાય કિં તવ ચમૂરનુયાયિનીયં ત્યાજ્યા તુ નેતિ સમયોચિતમાહ સેનામ્ ॥ ૪૧॥

અમ્બા તથેતિ ગિરમભ્યુપગમ્યં તસ્ય સન્નહ્યતામિતિ ચ સા પૃતનાં નિયુજ્ય ।
સસ્નૌ ભવાઙ્ગપરિરમ્ભકૃતાર્થમમ્ભસ્ત્રૈસ્રોતસં કિલ પુનશ્ચ કૃતાર્થયન્તી ॥ ૪૨॥

યદ્ બ્રહ્મણોઽભિભવનં સલિલાત્મના પ્રાગ્ યશ્ચાથ શન્તનુભુવાં સલિલાપવેધઃ ।
અંહો નિરન્વયમમૃજ્યત તત્ સમસ્તં તસ્યાસ્ત્રિલોકજનનીચરણાર્પણેન ॥ ૪૩॥

સા સંવૃતા નૃપસુતા પરિતઃ સખીભિઃ સ્નાનાય ગાઙ્ગસલિલે કલિતાવતારા ।
સ્નાન્તીભિરત્ર સુરપન્નગકન્યકાભિઃ સંયુજ્ય મજ્જનકુતૂહલિની વિજહ્રે ॥ ૪૪॥

સખ્યો નૃપાલદુહિતુર્વિહૃતિચ્છલેન નેત્રે પિધાય બધિરાઃ ફણિરાજકન્યાઃ ।
સ્મેરાનનાસુ પરિતઃ સુરસુન્દરીષુ સ્વૈરં કિલાપજહસુઃ શ્રવણવ્યપાયાત્ ॥ ૪૫॥

સંસારસિન્ધુતરણિસ્તરણિં વિનૈવ સા દૂરમપ્લવત તત્ર સમં સખીભિઃ ।
પ્રાગાર્જિતં વિતરણિત્વકૃતં યશો યત્ તેનાધુના દ્વિગુણિતં તદભૂદમુષ્યાઃ ॥ ૪૬॥

ઉદ્દામનિશ્વસિતસૌરભસારલોભાદુન્મજ્જનાવસરમેવ ચિરં પ્રતીક્ષ્ય ।
તં દેશમપ્રજહતી ભ્રમરાવલીવ સ્નાન્ત્યા બહિર્વિરુરુચે કબરી શ્લથાસ્યાઃ ॥ ૪૭॥

સા નન્દનોપવનચન્દનમઙ્ગરાગમાલિમ્પતી સમુપદર્શિતમપ્સરાભિઃ ।
સસ્નૌ યદા સુરસરિત્સાલલે તદૈવ ચક્રે સુરદ્રુમસમાહરણાવસાયમ્ ॥ ૪૮॥

ઇત્થં વિહૃત્ય સલિલે સુચિરં સખીભિરુન્મજ્જ્ય નૈત્યિકવિધેરનુ પાણ્ડ્યકન્યા ।
તાં સેતુના પ્રથમતઃ સરિતં તતાર નૌકાસહસ્રનિબિડાકલિતેન રાજ્ઞી ॥ ૪૯॥

અનાદપાદપિ ચમૂરધિગઙ્ગમસ્યા મેને કમપ્યતિશયં ન તુ તાવતા સા ।
રાજીવબાન્ધવરથે વસતો જનસ્ય કો નામ દીપસમવાયકૃતઃ પ્રકાશઃ ॥ ૫૦॥

આદાય પુષ્કરમુખૈરભિતો વિકીર્ય યાવત્ કિલ વ્યયિતમમ્બુ સુરસ્રવન્ત્યાઃ ।
તાવત્ તતો દ્વિગુણમપ્યભિવર્ષતિ સ્મ દાનોદકૈર્દ્વિપિગણઃ પરિતઃ સ્રુતોસ્યાત્ ॥ ૫૧॥

માતઙ્ગપુઙ્ગવતુરઙ્ગશતાઙ્ગયોધપાણિન્ધમે ધરણિસેતુપથે ચરન્તી ।
નક્તન્દિવૈસ્ત્રિભિરશિશ્રયદભ્રસિન્ધોઃ પારં પરં નિરવશેષમનીકિના સા ॥ ૫૨॥

સા સન્નિપાત્ય સકલામપિ વાહિનીં તામાજ્ઞાં વિતીર્ય ચ ગિરેરધિરોહણાય ।
આળીજનાકલિતસારથિકર્મસુસ્થં કર્ણીરથં કમપિ તુ સ્વયમારુરોહ ॥ ૫૩॥

તાં વાહિનીં સુમહતીમપદિશ્ય તસ્યા ગઙ્ગૈવ તં ગિરિવરં પુનરારુરોહ ।
પ્રસ્થાનસમ્ભ્રમવશાદનિવેદિતં પ્રાગ્વક્તવ્યશેષમિવ કિઞ્ચન વક્તુમાશે ॥ ૫૪॥

નીહારશૈલશિખરેષુ સમુત્પતન્તો નિમ્નોન્નતાનિ કિયદપ્યવિચારયન્તઃ ।
જગ્મુઃ શતાઙ્ગયુગસંયમિતાસ્તુરઙ્ગા દેવ્યાઃ સુખં નયનરશ્મિભિરુદ્ગૃહીતાઃ ॥ ૫૫॥

પ્રસ્નિગ્ધકાશકુશકાનનમેદુરાણિ ભાગીરથીસલિલપાતપવિત્રિતાનિ ।
સ્થાનાનિ સંયમવતામતિસુન્દરાણિ સવ્યાનિ સા વિદધતી શનકૈરયાસીત્ ॥ ૫૬॥

રત્નાનિ તત્ર વણિજો ભિષજોઽગ્રહીપુર્દિવ્યાપધીર્ગજવરાનપિ રાજકીયાઃ ।
અસ્માદૃશાઃ ક્ષિતિસુરાઃ પુનરાહરન્ત ભાગીરથીતટરુહાણિ કુશાઙ્કુરાણિ ॥ ૫૭॥

આમુક્તકઞ્ચુકમધિજ્યશરાસકાણ્ડમુન્નદ્ધકુન્તળનિયન્ત્રિતવન્યપુષ્પમ્ ।
સેનારજોમસૃણિતાળકસુન્દરં તત્ તત્ત્વં પરં વનચરૈરપિ તત્ર દૃષ્ટમ્ ॥ ૫૮॥

દુર્લઙ્ઘતત્પથવિલઙ્ઘનકૌતુકિન્યાઃ કોલાહલેન મહતા પરિતો ધ્વજિન્યાઃ ।
યદ્યદ્વિભિદ્ય પતિતં શિખરં હિમાદ્રેસ્તત્તન્નવેન યશસા સમપૂરિ તસ્યાઃ ॥ ૫૯॥

નાસીરસઙ્ગતભટોદ્ભટસિંહનાદવિદ્રાવિતાન્ ગિરિગુહાશયિતાન્ મૃગેન્દ્રાન્ ।
વન્યદ્વિપાઃ સમભિદુદ્રુવુરાત્મવૈરનિર્યાતનાવસરલાભનિતાન્તહૃષ્ટાઃ ॥ ૬૦॥

માધ્વીકમિશ્રનવવૈણવસક્તુભક્તૈઃ કસ્તૂરિકાહરિણમાંસકૃતોપદંશૈઃ ।
આતિથ્યમાપુરુચિતં શબરાલયેષુ સેનાભટાશ્ચમરવાલાધિવીજ્યમાનાઃ ॥ ૬૧॥

પારીન્દ્રનિર્દલિતકુઞ્જરકુમ્ભમુક્તમુક્તાફલગ્રથિતહારકૃતોપહારાઃ ।
સ્થાનાનિ તત્ર વિવિધાન્યુપદર્શયન્તો દેવીમસેવિષત હૈમવતાઃ કિરાતાઃ ॥ ૬૨॥

અત્રૈવ નઃ કુલપતિં ધનુષા જઘાન મર્ત્ત્યઃ સ કશ્ચિદિતિ વૃદ્ધજના વદન્તિ ।
દૂરે સુવર્ણકદલીવનમેતદમ્બ ! જીર્ણઃ કપિર્વસતિ યત્ર ચિરાય કોઽપિ ॥ ૬૩॥

નાચક્ષતે ન નિમિષન્તિ ન નિશ્વસન્તિ વલ્મીકતઃ પ્રસૃમરા વપુષા તુ મર્ત્ત્યાઃ ।
સન્તિ દ્રુમા ઇહ શતં દલપુષ્પહીનાશ્છિત્વા નયામ યદિ દેવિ ! દિદૃક્ષસે તાન્ ॥ ૬૪॥

અસ્ત્યમ્બિકેતિ નનુ ગોત્રપિતામહી નઃ કોદણ્ડદણ્ડકુશલા ગતભાવ્યભિજ્ઞા ।
કાન્ત્યા ગિરા કરુણયા ચ ભુજોષ્મણા ચ દૃગ્ભ્યાં શપેમહિ મહેશ્વરિ ! સૈવ નસ્ત્વમ્ ॥

બાહુસ્ત્વયાવમમૃશે પ્રથમં પુરો નસ્તદ્બાહુસારવિજિતો ભવિતા પતિસ્તે ।
સત્યાનિ વિદ્ધિ શબરીજનભાષિતાનિ જાત્વમ્બ! ચિન્તય ન જાનપદાનિવાસ્માન્ ॥

ઇત્થં સદારશબરોક્તિકૃતસ્મિતાસુ રાજ્ઞી સખીષુ કૃતનર્મવચોવિલાસા ।
મા જાતુ ખણ્ડયત માનુષપાદપાનિત્યાજ્ઞાપ્ય તાનતિ યયૌ શનકૈર્હિમાદ્રિમ્ ॥ ૬૭॥

શાર્દૂલસિંહશરભદ્વિરદાચ્છભલ્લવાહદ્વિષદ્વૃકવરાહપરાહતેષુ ।
શ‍ૃઙ્ગેષુ માર્ગરહિતેષ્વપિ સા હિમાદ્રેઃ સેના જગામ સુરસિન્ધુમનુદ્રવન્તી ॥ ૬૮॥

ઇત્થં હિમાદ્રિશિખરાદવતીર્ય મન્દં વર્ષેऽથ કિમ્પુરુષનામનિ સા વિશન્તી ।
નોદન્યયોપસસૃજે ન બુભુક્ષયા વા નાધ્વશ્રમેણ પૃતના ન ચ ધર્મતોયૈઃ ॥ ૬૯॥

અજ્ઞાતમેઘજલમશ્રુતસસ્યભેદમર્થોપસઙ્ગ્રહણદાનકથાનભિજ્ઞમ્ ।
દેશં સમીક્ષ્ય સુમતિ ર્ધૃતવિસ્મયોऽપિ કામં બભૂવ સ કરગ્રહણે નિરાશઃ ॥ ૭૦॥

સ્વચ્છાનિ ભૌમસલિલાનિ સુધાધિકાનિ સૌરભ્યવન્તિ ચ ફલાનિ મહીરુહાણામ્ ॥
દૃષ્ટ્વૈવ તૃપ્તિભરિતેષુ ચમૂચરેષુ કૌતૂહલેન જગૃહુઃ કતિચિત્તુ તાનિ ॥ ૭૧॥

સન્ત્યદ્ભુતા દ્રુમલતા મૃગપક્ષિભેદાઃ સન્તિ સ્ત્રિયોऽપિ સુરયૌવતનિર્વિશેષાઃ ।
કિન્તુ ક્ષિતિં વિમલસત્ત્વમયીં ગતાસ્તા ન ક્વાપિ લોભમલભન્ત ચમૂચરાસ્તે ॥ ૭૨॥

ધન્યાન્ જટાપટલનીડસુખપ્રસુપ્તનાનાવિહઙ્ગકુલનાદવિનીતખેદાન્ ।
અધ્યાત્મયોગનિરતાનનુગૃહ્ણતી સા મન્દં જગામ જનની જગતાં ત્રયાણામ્ ॥ ૭૩॥

કાલાદ્ બહોર્મુનિકુલેન કથઞ્ચિદન્તીવારશૂકવદલક્ષ્યત કેવલં યત્ ।
તદ્ દૃશ્યતે સ્મ તરુણારુણકોટિદીપ્રં કાન્તામયં કલિતકાર્મુકમાત્મતત્ત્વમ્ ॥ ૭૪॥

ઉચ્ચાવચૈઃ શમધનાઃ પૃતનાચરાણાં કોલાહલૈઃ શ્રુતિગણૈરિવ બોધ્યમાનાઃ ।
કન્દં ફલં સલિલમપ્યુપજહ્રિરે યત્ તત્ સમ્પ્રગૃહ્ય બુભુજે સ્વયમમ્બિકા સા ॥ ૭૫॥

સા તદ્યતીત્ય સમુપત્ય ચ હેમકૂટં તેનાધ્વના ચ હરિવર્ષમનુપ્રપન્ના ।
તસ્યોત્તરં નિષધભૂધરમારુરોહ પ્રાક્પશ્ચિમાર્ણવતરઙ્ગકૃતાભિષેકમ્ ॥ ૭૬॥

તસ્મિન્ ગિરૌ પ્રચલિતા પથિ પશ્ચિમે સા મેરું પ્રદક્ષિણતયા પરિવેષ્ટયન્તી ।
વાસં કિટેઃ ક્રતુમયસ્ય હિ કેતુમાલં વર્ષં નિનાય બલમુચ્છ્રિતકેતુમાલમ્ ॥ ૭૭॥

ભક્ત્યા પ્રણમ્ય ભગવન્તમભિષ્ટુતા સા વિજ્ઞેન તેન વસુધાભરણશ્રમાણામ્ ।
તદ્દર્શિતેન ચ પથા સમવાપ નીલં શૈલં નિજેન યશસા વિશદં સમન્તાત્ ॥ ૭૮॥

સા રમ્યકં સમતિલઙ્ઘ્ય હિરણ્મયં ચ શ્વેતં ચ શ‍ૃઙ્ગિણમતીત્ય મહીધરૌ દ્વૌ ।
પ્રાપ્તોત્તરાનથ કુરૂન્ પ્રયતા વવન્દે પાણ્ડ્યાત્મજા ભગવતઃ પ્રથમાવતારમ્ ॥ ૭૯॥

યે નોદહારિષત વન્દિગણાઃ સ્વકીયા જૈત્રધ્વજો જયતિ યશ્ચ નિજે શતાઙ્ગે ।
તેનાદૃતા તદુપદર્શિતમાલુલોકે સા તત્ર વારિનિધિમુત્તરમુત્તરઙ્ગમ્ ॥ ૮૦॥

પ્રાગેવ યે કૃતપદા યશસાં પ્રપઞ્ચાઃ સ્વોપાર્જિતાઃ પિતૃપિતામહસમ્ભૃતાશ્ચ ।
સ્વં દ્રષ્ટુમપ્યુપગતાનિવ તાનશેષાન્ સા તત્ર તત્ર સમવૈક્ષત ફેનકૂટાન્ ॥ ૮૧॥

પશ્ચાત્ સમુદ્યતિ રવૌ કુરુષૂત્તરેષુ પ્રાગેવ દક્ષિણમિમં વિદતી પયોધિમ્ ।
ઉન્મજ્જતાત્ર તિમિના નલસેતુનેવ નિસ્સંશયં વ્યવજહાર વરૂથિની સા ॥ ૮૨॥

અભ્યુદ્યતૈસ્ત્રિભુવનાક્રમણેચ્છયેવ પ્રાપ્તૈઃ પ્રતીરમપિ વારિનિધેસ્તરઙ્ગૈઃ ।
લિલ્યે સમુલ્લસદસઙ્ખ્યતુરઙ્ગમસ્યા વીક્ષ્ય હ્રિયેવ વિપુલં બલમન્તિકસ્થમ્ ॥ ૮૩॥

અમ્ભોધરેષુ સલિલગ્રહણાવતીર્ણેષ્વારાત્ પ્રતિદ્વિપરુષા ચલિતાન્ નિહન્તુમ્ ।
આધોરણા જગૃહુરઙ્કુશસમ્પ્રહારૈઃ સેનાગજાન્ ધુરિ નરેન્દ્રકુમારિકાયાઃ ॥ ૮૪॥

તસ્મિન્ દિશાં વિજયકર્મણિ ધાવિતા યે યે ચાહવેષ્વભિમુખં નિહતાઃ સ્વયોધૈઃ ।
તાનર્ણવે ચ તટસીમ્નિ ચ તત્ર રાજ્ઞો લબ્ધાસ્પદાન્ યુગપદક્ષત પાણ્ડ્યકન્યા ॥ ૮૫॥

પર્ણાશનૈઃ શમધનૈઃ પનસામ્રજમ્બૂપ્લક્ષાશનૈરપિ ચ જાનપદૈર્વૃતેષુ ।
વર્ષેષુ તેષ્વનધિગત્ય કરં ચરન્તી દેવી ચકાઙ્ક્ષ જલધેરુપદાં ગ્રહીતુમ્ ॥ ૮૬॥

યાવત્ પરામૃશતિ સા ન કરેણ મૌર્વીં યાવદ્ દધાતિ ચ નિષઙ્ગમુખે ન દૃષ્ટિમ્ ।
તાવત્ પ્રગૃહ્ય વિવિધાનુપહારભેદાંસ્તામર્ણવઃ શરણમેત્ય વચો બભાષે ॥ ૮૭॥

મુક્તાપગા વિશતિ દક્ષિણમમ્બુરાશિં જમ્બૂનદી વિશતિ પૂર્વમહં તુ રિક્તઃ ।
વેદાન્ વિચેતુમુપશોધિતગર્ભસારઃ સાક્ષ્યત્ર મે સ ભગવાન્ નનુ મત્સ્યરાજઃ ॥ ૮૮॥

ત્વબાહુસારવિજિતૈર્જઠરં ગતૈર્મે ભૂપાલકૈરવગતા હ્યસિ ભૂયસા ત્વમ્ ।
સત્યપ્રિયાસિ શરણાગતવત્સલાસીત્યાનીતમેતદિયમમ્બ ! ચિરાભિગુપ્તમ્ ॥ ૮૯॥

મૈનાકભૂધરચરાસ્ત ઇમે ગજેન્દ્રા દ્વીપે ગભસ્તિમતિ રત્નગણોઽયમાસીત્ ।
શઙ્ખા ઇમે જનનિ! પશ્ચિમસિન્ધુનીતા યેષાં પ્રકામમવમઃ સ હિ પાઞ્ચજન્યઃ ॥ ૯૦॥

ઇક્ષૂદધેરુપહૃતાઃ કમઠાશ્ચ મત્સ્યાઃ પક્વા ઇમે ગુડરસાઃ પરિશોષિતા વા ।
હૈયઙ્ગવીનમકરા ઇતિ સમ્પ્રતીતા એતે પુનર્જનનિ! યોચિતકા ઘૃતાબ્ધેઃ ॥ ૯૧॥

એષા જરાપલિતરોગવિષાદહન્ત્રી દિવ્યા સુરોદધિહૃતા મદિરા સુગન્ધિઃ ।
દધ્યર્ણવાદુપહૃતં નવનીતમેતન્નાદ્યાપિ વેદ તદિદં નવનીતચોરઃ ॥ ૯૨॥

ક્ષીરાબ્ધિનોપદદિરે તુરગા ગજાશ્ચ ક્ષીરાશિનઃ સુવિમલાનવધારયેમાન્ ।
એકં તુ તચ્છકલમૈન્દવમાસ્ત દત્તં પ્રાગેવ તદ્ ભગવતે પ્રમથાધિપાય ॥ ૯૩॥

સન્તિ સ્ત્રિયઃ કતિચિદત્ર સખીરિમાસ્તે સમ્પશ્યતા ન તુ મયા સમુપાહૃતાસ્તાઃ ।
ત્વં કામધેનુરસિ કલ્પલતાસિ ચ ત્વં નાહારિ તદ્વિતયમમ્બ! વિડમ્બનેતિ ॥ ૯૪॥

તામ્રાપગાસલિલપાનસુનિર્વૃતાનાં કિં કાર્યમસ્તિ સુધયા મધુરોદતો વા ।
માતસ્તથાપ્યુપહૃતા મણિરાશયોઽમી ત્વચ્છાસનશ્રમવિનોદપદે નતેન ॥ ૯૫॥

સામુદ્રદિવ્યમણિજાતિષુ કૌસ્તુભશ્ચ ચિન્તામણિશ્ચ ભુવને વિદિતે મણી દ્વે ।
અન્યાદૃશી જનનિ! હારલતેયમેનાં વૈવાહિકોત્સવવિધૌ વહ મદ્વિભૂત્ય ॥ ૯૬॥

ઇત્થં નિવેદ્ય નિહિતાનુપહારભેદાન્ હારં વિતીર્ય ચ કરે વિનતં પુરસ્તાત્ ।
ઉત્થાપ્ય સા સુમતિના પતિમાપગાનામમ્બા જગાદ વચનૈરમૃતાવસિક્તૈઃ ॥ ૯૭॥

સખ્યાઃ શ્રિયો મમ યતો જનકોઽસિ તાવત્ તદ્ધર્મતોઽસિ જનકો મમ ચ ત્વમેવ ।
દત્તં ત્વયા હરણમેતદિતિ બ્રુવાણા સા તં પુપોષ નયનાઞ્ચલચન્દ્રિકાભિઃ ॥ ૯૮॥

સા તં વિસૃજ્ય સમુપેત્ય ચ પૂર્વવર્ષં ભદ્રાશ્વમત્ર ચ નદીમતિલઙ્ઘ્ય સીતામ્ ।
તત્તીરસીમનિ તપો વિપુલં ચરન્તમશ્વાનનં પુરુષમાદ્યમસૌ વવન્દે ॥ ૯૯॥

સા ચ સ્વદર્શનકૃતાર્થતપઃપ્રબન્ધાદશ્વાનનાદ્ ભગવતો વરમાતિથેયાત્ ।
આસેદુષી વિજયમપ્રતિઘાતમગ્રે જમ્બૂનદીપ્રભવમાપદિલાવૃતસ્થમ્ ॥ ૧૦૦॥

યાન્યુત્તરેષુ કુરુષુ પ્રભવન્તિ યાનિ જમ્બૂનદીપયસિ યાનિ સુમેરુમૂલે ।
સ્વર્ણાનિ તાનિ સુમતિઃ પૃથગાનિનાય વર્ણોત્તરાણ્યનનુભૂતતયા ન લોભાત્ ॥ ૧૦૧॥

જમ્બૂનદીપયસિ સર્વસુવર્ણભૂતે સેનાભટા અનવધારિતવર્ણભેદાઃ ।
શૈવાલફેનકમલોત્પલશઙ્ખભૃઙ્ગહંસાન્ પૃથગ્ જગૃહુરાકૃતિમાત્રભેદાત્ ॥ ૧૦૨॥

પઙ્કાનિ કેચિદપરે સિકતાઃ પરે તુ પદ્મોત્પલાનિ કતિચિત્ ભ્રમરીમરાલાન્ ।
મણ્ડૂકકૂર્મમકરાનિતરે તુ તત્ર હેમાશયા જગૃહિરે પૃતનાસુ યોધાઃ ॥ ૧૦૩॥

પ્રતિકરિપરિશઙ્કિતદ્વાહિનીગન્ધદન્તાવલ-
    પ્રતિહતિશિથિલક્ષરજ્જમ્બુસમ્ભૂતભૂરિદ્રવા ।
સરિદિયમભિતોઽપિ સમ્પ્લાવયન્તી વનં તીરયો-
    રકૃત કૃતનિવેશમસ્મિન્ બલં હૈમમેવાખિલમ્ ॥ ૧૦૪॥

ઇતિ મહાકવિધીનીલકણ્ઠદીક્ષિતપ્રણીતે શિવલીલાર્ણવે નવમઃ સર્ગઃ ।

## અથ દશમઃ સર્ગઃ ।

દિક્પતીનથ વિજેતુમુત્સુકા દેવશૈલશિખરાગ્રવર્તિનઃ ।
ઉત્પપાત સહ સૈનિકૈર્દિવં સ્યન્દનેન મહતા તટાતકા ॥ ૧॥

સજ્જસિન્ધુરતરઙ્ગસઙ્કુલા સા દિવિ પ્રચલિતા પતાકિની ।
આવવાર સહસામરાવતીમપ્રતર્કિતનિરોધવિહ્વલામ્ ॥ ૨॥

સત્પથોત્પતનજાતકૌતુકસ્તબ્ધમુક્તતુરગા શનૈઃ શનૈઃ ।
યાવદાપ ન દિવં તટાતકા તાવદત્ર વવૃતે મહાન્ રણઃ ॥ ૩॥

તદ્ભટાશ્ચિરનિરુદ્ધદોર્મદાઃ સમ્પ્રહારવિમુખેષુ રાજમુ ।
તં મહાહવમુપસ્થિતં સુરૈર્ભાગધેયફલમિત્યમંસત ॥ ૪॥

નિત્યમુન્મુખચરાન્ સુરદ્વિપાન્ સાયકૈરિવ નિપાત્ય શાયિતાન્ ।
કીટપેષમપિષન્ સસાદિનઃ પદ્ભિરેવ કરિણો મદોદ્ધતાઃ ॥ ૫॥

યત્તદાહવભુવિ પ્રવર્તિતં લોહિતં નિપતિતં ક્ષમાતલે ।
અગ્રતઃ સુરગિરેરિલાવૃતે લોહિતોદમિતિ તચ્છ્રુતં સરઃ ॥ ૬॥

દિગ્જયે ભુવિ હતા રણેષુ યે દ્યોચરાઃ સમભવન્નિરોધિનઃ ।
તે નિપેતુરુપજાતમન્યવસ્તેજસીવ શલભાશ્ચમૂમુખે ॥ ૭॥

અભ્યુપેયુરધરેદ્યુરેવ યાન્ સમ્પ્રસાદ્ય બહુધા જયાય યે ।
સમ્પ્રજહ્રુરપરેદ્યુરાહવે સૈનિકાઃ સુમનસસ્ત એવ તાન્ ॥ ૮॥

ભર્ત્સિતા દિવિચરાશ્ચમૂચરૈસ્ત્વઙ્કૃતેન યુધિ હુઙ્કૃતેન ચ ।
દેવમાનવદશાવિપર્યયં વીક્ષ્ય વીક્ષ્ય વિતથં નિશશ્વસુઃ ॥ ૯॥

સ્વે બલે પરબલે ચ યે હતાસ્તાન્ દ્વયાનપિ સમેત્ય દેવતામ્ ।
તત્ક્ષણાત્ પુનરુપસ્થિતાન્ રણે વીક્ષ્ય વિસ્મયમવાપ સા ચમૂઃ ॥ ૧૦॥

તાન્ નિરીક્ષ્ય સમશીર્ષિકાન્ રણે સૈનિકેષુ કતિચિન્મહારથાઃ ।
સમ્પ્રબોધ્ય મલયધ્વજાત્મજાં સન્નિપેતુરનપેક્ષિતાસવઃ ॥ ૧૧॥

ભૂસુરસ્વમુપભુજ્ય કેવલં તે હિ પુષ્ટવપુષો દિવૌકસઃ ।
તન્મુખે શિથિલતાં જગાહિરે સેતવઃ પયસિ સૈકતા ઇવ ॥ ૧૨॥

યાવદસ્ત્રમભિમન્ત્રિતં સુરૈઃ સન્નિકર્ષતિ ન તાન્ મહારથાન્ ।
તાવદેવ સહ તૈઃ પલાયિતૈસ્તત્તદસ્ત્રમપિ ધાવિતં પુરઃ ॥ ૧૩॥

હન્યમાનમમૃતાન્ધસાં બલં વીક્ષ્ય કેઽપિ યુધિ માનવામરાઃ ।
પૂર્વબાન્ધવદશોપદર્શિનસ્તેષુ સાન્ત્વવચનાનિ ચક્રિરે ॥ ૧૪॥

તાં પલાયનપરામિતસ્તતો દુર્ગ્રહાં દિવિષદામનીકિનીમ્ ।
સઙ્ગ્રહીતુમપટુઃ શતક્રતુઃ સમ્મુખીનમચલત્ સ્વયં પુરઃ ॥ ૧૫॥

તં નિરીક્ષ્ય શતમન્યુમગ્રતસ્તન્મુખે ચલિતમમ્બિકારથમ્ ।
સ્તમ્ભયન્ પ્રણતિભિશ્ચ સાન્ત્વનૈઃ સઞ્ચચાલ સુમતિઃ સ્વયં પુરઃ ॥ ૧૬॥

તાં વિહાય શતમન્યુતાં નિજાં સંશ્રિતં યુધિ સહસ્રમન્યુતામ્ ।
શક્રમેક્ષ્ય સુમતૌ જયાશિષશ્ચેતસા પ્રયુયુજે તટાતકા ॥ ૧૭॥

યે શરા નમુચિજમ્ભભેદિનો યે ચ વૃત્રવલઘાતિનો હરેઃ ।
તે કિલાર્ધપથ એવ દારિતાઃ સાયકૈઃ સુમતિચાપનિસ્સૃતૈઃ ॥ ૧૮॥

આદદે જયતિ મીનલોચનેત્યેકમેવ મનુમીરયન્નયમ્ ।
યચ્છરાનજનિ તેન નિષ્ફલં દિવ્યમસ્ત્રમખિલં દિવસ્પતેઃ ॥ ૧૯॥

માર્ગણાઃ કતિપયે મરુત્વતસ્તસ્ય નર્મસુ પતન્તિ વા નવા ।
મર્મસુ પ્રવિવિશુસ્તદાશુગાઃ સર્વ એવ તુ મઘોનિ દૃહ્મયે ॥ ૨૦॥

અક્ષિભિઃ શરચિતૈઃ પુરઃસ્થિતૈરક્ષતૈસ્તુ ચરમાઙ્ગવર્તિભિઃ ।
નિષ્ફલૈઃ શતમખે તુ નિષ્ક્રિયે સન્દધે ન સુમતિઃ શિલીમુખાન્ ॥ ૨૧॥

તં નિરીક્ષ્ય સમયં ચમૂચરાશ્ચોરહૂણયવનાદયો ભટાઃ ।
ભૂષણૈર્મણિમયૈઃ સમં હરેરાયુધં કુલિશમપ્યપાહરન્ ॥ ૨૨॥

સ્થાપિતો ભુવનમાતુરગ્રતઃ સ પ્રસહ્ય પૃતનાગ્રચારિભિઃ ।
લજ્જયા શરરુજા ભયેન ચ સ્તમ્ભવદ્બલભિદાસ્ત કેવલમ્ ॥ ૨૩॥

સમ્પ્રણમ્ય સુમતિસ્તટાતકાં ધારયઞ્છિરસિ તત્પદં ચિરાત્ ।
લાલિતો બહુવિધાભિરુક્તિભિસ્તં ચ તચ્ચરણયોર્ન્યપાતયત્ ॥ ૨૪॥

વીક્ષિતઃ સ કરુણાર્દ્રયા દૃશા વાસવશ્ચરણયોર્નતસ્તયા ।
સ્વસ્થતામુપગતો યથાપુરં પ્રાહ તાં સુમતિનાનુમોદિતઃ ॥ ૨૫॥

પશ્ય દેવિ ! પદમેતદામરં પાલ્યતે સ્મ મલયધ્વજેન યત્ ।
અભ્યુપેત્ય શતશઃ સહાયતામાહવેષુ દનુજાન્ નિગૃહ્ણતા ॥ ૨૬॥

સ્વર્ગવીયમયમપ્સરોગણઃ પઞ્ચ દેવિ! સુરપાદપા ઇમે ।
એષ સાગરભવો મણિર્મહાનેષ યૂથપતિરેષ સૈન્ધવઃ ॥ ૨૭॥

ત્વં ગૃહાણ વિતરાનુયાચિતાં માં નિયોજય યથાપુરં તુ વા ।
ત્વં પ્રમાણમમરશ્રિયા સમં દ્યૌરિયં તવ પદે નિવેદિતા ॥ ૨૮॥

આગતાં નરચમૂમતર્કિતાં તાવકીતિ કથમપ્યજાનતા ।
પ્રત્યવસ્થિતમિવ ક્ષણં હિ યત્ તત્ ક્ષમસ્વ શરણાગતે મયિ ॥ ૨૯॥

ઇત્થમુક્તવતિ પાકશાસને સા જગાદ શરણાગતપ્રિયા ।

ક્ષાન્તમેવ નિખિલં મયાધુના શાન્તચેતસિ પુરન્દર! ત્વયિ ॥ ૩૦॥

સ્વીકૃતં તદખિલં ત્વયાર્પિતં સ્વીકૃતં પુનરિદં મયા તવ ।
એક એવ ગતશઙ્કમિન્દ્રતાં વર્ત્તય ત્વમિહ વાસરે વિધેઃ ॥ ૩૧॥

સુન્દરેશમભિષેક્તુમર્ચિતું સ્વર્ગવીં સુરતરૂંશ્ચ કેવલમ્ ।
મામનુ પ્રહિણુ વાસવેતિ સા તં વિસૃજ્ય ચલિતા તતઃ પુરઃ ॥ ૩૨॥

આનકધ્વનિભિરશ્વહેષિતૈઃ ક્ષ્વેલિતૈર્દ્વિરદબૃંહિતૈરપિ ।
પ્રજ્વલન્નપિ શશામ પાવકઃ પાણ્ડ્યરાજદુહિતુર્વિનિર્ગમે ॥ ૩૩॥

મા વિધેહિ સુમતેઽભિષેણનં રુન્ધિ રુન્ધિ ચલિતાં પતાકિનીમ્ ।
મામકો હિ જનકો હુતાશ ઇત્યાદિદેશ મલયધ્વજાત્મજા ॥ ૩૪॥

યાવદિત્થમનુશાસ્તિ સા ચમૂ તાવદેવ તનયાદિદૃક્ષયા ।
મઙ્ગલાન્યુપહરન્નુપાયનાન્યાજગામ ધુરિ હવ્યવાહનઃ ॥ ૩૫॥

સાવરુહ્ય સહસા શતાઙ્ગતઃ સમ્પ્રણમ્ય મુદિતા હુતાશનમ્ ।
પ્રાર્થિતા મુહુરનેન તાનિ ચ પ્રાભૃતાનિ વિવિધાન્યુપાદદે ॥ ૩૬॥

જમ્બુસિન્ધુતટસમ્ભવા નિશા નીલશૈલશિખરાહૃતા મષી ।
અમ્બરાણિ મણયશ્ચ ભાસ્વરાઃ સ્વાહયા પૃથગથોપજહ્રિરે ॥ ૩૭॥

પાણિપીડનમહોત્સવે તવ પ્રાર્થયે સપદિ સાક્ષિતામિતિ ।
ઈરિતે હુતવહેન સસ્મિતા તં વિસૃજ્ય ચલતિ સ્મ સા પુરઃ ॥ ૩૮॥

મા કદાપિ મધુરાપુરીજુષાં દૃક્પથેષુ પતતેતિ બોધિતાઃ ।
નિત્યમેવ સમવર્ત્તિના ભટાસ્તાં નિરીક્ષ્ય પૃતનાં પ્રદુદ્રુવુઃ ॥ ૩૯॥

તારિતાઃ સુમતિનાગ્રગામિના તત્રતત્ર નિરયસ્થિતા જનાઃ ।
માતુરેષ મહિમા યદીદૃશી ભક્તદૃષ્ટિપથપાતિનાં ગતિઃ ॥ ૪૦॥

સંવૃતં મુસલપાશપાણિભિઃ સર્વતો ભટગણૈર્ગદૈરપિ ।
પશ્યતિ સ્મ પથિ દૂરતઃ સ્થિતં પ્રાઞ્જલિં રવિસુતં તટાતકા ॥ ૪૧॥

સોઽભિગમ્ય સુમતેરનુજ્ઞયા તાં પ્રણમ્ય પદયોઃ સમુત્થિતઃ ।
સ્વાં ગદામુપહરન્નવિપ્લુતાં પ્રશ્રિતો વચનમેતદાદદે ॥ ૪૨॥

ભારત ક્ષિતિતલે ભવદ્વશે સન્તિ દુ ષ્કૃતકૃતો ન જન્તવઃ ।
પ્રાક્સ્થિતાશ્ચ નરકેષુ તારિતાઃ પ્રાપ્ત એવમિહ વિશ્રમો મયા ॥ ૪૩॥

નિષ્ક્રિયોઽસ્મિ કિમિહ સ્થિતેન મે સઞ્ચરામિ સબલશ્ચમૂમુખે ।
યે ભવન્તિ પરિપન્થિનોઽત્ર તે તેષુ દેવિ વિનિયુઙ્ક્ષ્વ મામિતિ ॥ ૪૪॥

સંયુગેષ્વભિમુખા ન સન્તિ નઃ સન્તિ ચેદતિથયો દિવસ્તુ તે ।
સર્વથૈવ તવ વિશ્રમોઽર્હ ઇત્યાહ તં સુમતિરાહિતસ્મિતઃ ॥ ૪૫॥

સા નિવર્ત્ય સમવર્તિનં તતઃ સઞ્ચચાલ પુરતઃ શનૈઃ શનૈઃ ।
આયયૌ નિરૃતિરાહૃતોપદસ્તાવદેવ સબલઃ સબાન્ધવઃ ॥ ૪૬॥

અદ્ય પુણ્યજનતા મમાગતેત્યાલપન્તમિમમાનતં પદે ।
સા વિસૃજ્ય સલિલાધિપોન્મુખી સઞ્ચચાલ મલયધ્વજાત્મજા ॥ ૪૭॥

ઉલ્લલત્તિમિતિમિઙ્ગિલોદ્ભટં ગ્રાહકચ્છપકુલીરસઙ્કુલમ્ ।
વાહિની વરુણસૈન્યમગ્રતઃ પશ્યતિ સ્મ સુમતેઃ પુરસ્સરી ॥ ૪૮॥

શસ્ત્રજાલમપવિધ્ય સર્વતો વાગુરાશ્ચ બડિશાનિ ચ સ્વયમ્ ।
સમ્પ્રગૃહ્ય મૃગયાકુતૂહલાત્ સન્નનાહ પૃતના ચિરાય સા ॥ ૪૯॥

શઙ્ખવિદ્રુમસરોજમૌક્તિકપ્રાયમાપ્યમુપહારમણ્ડલમ્ ।
આહરન્ પુનરપાં પતિઃ ક્ષણાદાજગામ શરણં તટાતકામ્ ॥ ૫૦॥

વારુણીં પલિતરોગહારિણીમદ્ભુતામગુડપિષ્ટશીથુજામ્ ।
વાજિનશ્ચ હરિતાનપાં પતિઃ સન્નિધાપ્ય નિપપાત પાદયોઃ ॥ ૫૧॥

પ્રાભૃતં તદખિલં પ્રચેતસઃ સા નિરીક્ષ્ય સદયેન ચેતસા ।
તં વિસૃજ્ય વિનતં તટાતકા ગન્ધવાહનગરોન્મુખી યયૌ ॥ ૫૨॥

મારુતૈર્મલયજેન્દુગન્ધિભિર્મન્દમન્દમુપદર્શિતાત્મભિઃ ।
સ્વર્ધુનીસલિલપાતશીતલૈઃ સેવ્યતે સ્મ ચતુરં વરૂથિની ॥ ૫૩॥

દાક્ષિણાત્યમનિલં પુરસ્સરં તે વિધાય મરુતોઽપરે પુનઃ ।
પારિજાતકુસુમોપહારિણસ્તાં સુમત્યનુમતાઃ સિષેવિરે ॥ ૫૪॥

તાન્ પ્રદર્શ્ય પવનાન્ પૃથક્ પૃથગ્ વ્યાજહાર સચિવો નૃપાત્મજામ્ ।
એષ જાનપદ એવ દેવિ નો મારુતો મલયશૈલમાશ્રિતઃ ॥ ૫૫॥

પશ્ય ચક્રપવનાનિમાન્ પુરઃ સન્તતોર્ધ્વગતિવાદદેશિકાન્ ।
આરસાતલમમીભિરુદ્ભ્રમત્યર્ણવસ્તિમિતિમિઙ્ગિલાકુલઃ ॥ ૫૬॥

આહરન્તિ તરુવન્મહાગિરીનર્ણવાન્ પૃષતવત્ કિરન્તિ ચ ।
આવિરિઞ્ચિભવનાદનર્ગલાન્ પશ્ય તાન્ પ્રલયમારુતાનિતઃ ॥ ૫૭॥

પશ્ચિમાન્ દ્રુમલતાપ્રભઞ્જનાનૌત્તરાન્ ઘનતુપારવર્ષિણઃ ।
પ્રાગ્ભવાન્ પ્રિયકચાતકપ્રિયાન્ યાનવૈષિ ત ઇમે સમીરણાઃ ॥ ૫૮॥

ભૂતલે કબલયન્તિ પન્નગા વ્યોમ્નિ ભારવહને નિયુઞ્જતે ।
તાવકે તુ વિષયે તટાતકે! સઞ્ચરન્તિ સુખિનઃ સમીરણાઃ ॥ ૫૯॥

દર્શિતાઃ સુમતિનત્થમાદૃતાઃ પ્રેષિતાશ્ચ સદયં તયાનિલાઃ ।
સ્વસ્વચેષ્ટિતકૃતઃ કુતૂહલાત્ સ્વાં પુરીં પ્રતિ યયુસ્તદગ્રતઃ ॥ ૬૦॥

પ્રસ્થિતા ધનપતેર્જિગીષયા પાણ્ડ્યરાજતનયા તતઃ શનૈઃ ।
પ્રાક્ તતોઽપિ સ પથિ વ્યવસ્થિતઃ પ્રાભૃતૈઃ કનકરત્નરાશિભિઃ ॥ ૬૧॥

તં નિપત્ય પદયોઃ સમુત્થિતં યક્ષકિમ્પુરુષરાક્ષસેશ્વરમ્ ।
અન્વકમ્પત દૃશા દયાર્દ્રયા પ્રશ્રયેણ કથયન્તમન્તિકે ॥ ૬૨॥

અમ્બ કશ્ચિદલમેવ મે જયે નૈગમેષુ મધુરાનિવાસિષુ ।
ભક્ત ઇત્યુપનતં પ્રતીચ્છ માં પશ્ય કિઞ્ચિદિદમાહૃતં પુરઃ ॥ ૬૩॥

શઙ્ખપદ્મમકરાદયસ્ત્વમી માતરષ્ટ નિધયો મયાહૃતાઃ ।
ઉત્તમસ્તુ સ વરસ્ત્વયાગ્રતો લભ્યતે ચલ પદાનિ કાનિચિત્ ॥ ૬૪॥

ઇત્યુદીરિતગિરં વિસૃજ્ય તં પ્રસ્થિતા પ્રમથનાથસન્નિધિમ્ ।
તાવતીમવિગણય્ય વાહિનીં સન્નનાહ સમરાય સા સ્વયમ્ ॥ ૬૫॥

ચન્દ્રશેખરપુરીસમીપતઃ સા નિવિશ્ય સકલા પતાકિની ।
સિંહનાદમતનિષ્ટ બૃંહિતં બૃંહિતાનકનિનાદહેષિતૈઃ ॥ ૬૬॥

નાદમેનમવકર્ણ્ય ચુક્રુધે નન્દિના પુરભિદા તુ પ્રિપ્રિયે ।
નાપરોઽસ્તિ ચતુગે મહેશ્વરાન્નાદતત્ત્વમવબુધ્ય નન્દિતુમ્ ॥ ૬૭॥

સંવૃતઃ પ્રમથસેનયા સ્વયા સન્નિકર્ષમુપસૃત્ય શૂલિનઃ ।
વ્યાહરન્નરચમૂસમાગમાત્ પ્રજ્વલન્નિવ શિલાદનન્દનઃ ॥ ૬૮॥

ગર્ભદાસકુલદાસતાં ગતા યે હિ પાણ્ડ્યવિષયે નૃપાસ્ત્વયિ ।
તેષુ વેત્સિ કુલશેખરં નૃપં તત્સુતં ચ મલયધ્વજં તતઃ ॥ ૬૯॥

તસ્ય નામ દુહિતા તટાતકા કિઞ્ચિદુચ્ચલિતશૈશવા સતી ।
સન્નિપાત્ય તૃણપૂલવચ્ચમૂં માનુષીમિત ઇતોઽભિવર્તતે ॥ ૭૦॥

સા મનુષ્યવશગેષુ કેષુચિત્ તાદૃશેષુ વિબુધાધમેષ્વપિ ।

સમ્પ્રદર્શિતપરાક્રમા સતી મન્યતે ન હિ મહેશ! મામપિ ॥ ૭૧॥

તાં પ્રધાવ્ય ધરણીતલં તતસ્તત્પદાનુપદિકાન્ સુરાધમાન્ ।
તાપસાંશ્ચ કતિચિત્ તદાશ્રયાન્ દણ્ડયેયમિતિ દણ્ડવન્નતઃ ॥ ૭૨॥

તં જગાદ ગિરિશઃ કૃતસ્મિતઃ સા પુનઃ શ્રુતિપથં ગતૈવ નઃ ।
અપ્રમત્તમભિષેણયન્નિમા સ્વસ્તિમાન્ પુનરુપેહિ ભામિતિ ॥ ૭૩॥

તાં ગિરં તમપિ ચ સ્મિતાઙ્કુરં સોઽવિચિન્ત્ય કિમપિ સ્મરદ્વિષઃ ।
નિર્જગામ સમરાગ્રહી બહિઃ સપ્તભિર્ગણચમૂપકોટિભિઃ ॥ ૭૪॥

તત્ર સપ્તનયનાસ્ત્રિનાસિકાઃ ષણ્મુખ્ખા દ્વિજઠરા દશાઙ્ઘ્રયઃ ।
ષષ્ટિસપ્તતભુજા જ્વલત્કચા મુણ્ડિતા ધૃતશિખાઃ કપર્દિનઃ ॥ ૭૫॥

વીતબાહુચરણા વિમસ્તકાઃ કુક્ષિલગ્નવદના શિરોઙ્ઘ્રયઃ ।
વિષ્ફુલિઙ્ગનયના વિષોદ્ગિરા લમ્બમાનરસનોષ્ઠનાસિકાઃ ॥ ૭૬॥

શ્વેતપીતહરિતાસિતારુણાઃ શ‍ૃઙ્ગિણઃ સગરુતઃ સચઞ્ચવઃ ।
વ્યાઘ્રદન્તિહયવાયસાઙ્ઘ્રયઃ પાદપાચલશિલાનખાયુધાઃ ॥ ૭૭॥

ઋક્ષવાનરતરક્ષુપન્નગદ્વીપિસિંહશરભદ્વિપાનનાઃ ।
નિર્યયુર્યુગપદટ્ટહાસિનઃ સઙ્ઘશો યુધિ ગણા મદોલ્બણાઃ ॥ ૭૮॥

(ચક્કલકમ્)
ધાવદશ્વમવઘૂર્ણિતદ્વિપં નષ્ટયોધમવસન્નસૈનિકમ્ ।
સમ્પ્રમુગ્ધસચિવં ક્ષણાદભૂત્ તાદૃશં તદપિ માનવં બલમ્ ॥ ૭૯॥

તે પદાતિકુલમૂરુવેગતઃ ફૂત્કૃતેન ગજવાજિમણ્ડલમ્ ।
સ્યન્દનાંશ્ચ કરતાલમારુતૈર્વ્યક્ષિપન્ રણમુખાદ્વિદૂરતઃ ॥ ૮૦॥

ક્ષુદ્રદીપમિવ ચણ્ડમારુતઃ શુષ્કગુલ્મમિવ દાવપાવકઃ ।
ધ્વાન્તવૃન્દમિવ ભાસ્કરોદયસ્તદ્બલં નરબલં વ્યનીનશત્ ॥ ૮૧॥

યુદ્ધદર્શનકુતૂહલાગતાઃ સિદ્ધચારણસુપર્વપન્નગાઃ ।
અપ્સરશ્ચરમભાગવર્ત્મના દુદ્રુવુઃ પ્રમથયૂથદૃક્પથાત્ ॥ ૮૨॥

તાં પ્રધાવ્ય પૃતનાં ગણૈઃ સમં સમ્પ્રસર્પતિ શિલાદનન્દને ।
અગ્રતો વ્યચલદાત્તકાર્મુકઃ સમ્પ્રહૃષ્ટવદનઃ સખીજનઃ ॥ ૮૩॥

બદ્ધકક્ષ્યમપિનદ્ધકઞ્ચુક કુઞ્ચિતભ્રુકુટિ કોમલાનનમ્ ।
મુગ્ધભીષણમલક્ષિ તદ્બલં મૂર્તમાદિમરસદ્વયં યથા ॥ ૮૪॥

સ્વોચિતપ્રતિબલાનવેક્ષણસ્રસ્તયુદ્ધકુતુકા શનૈરિવ ।
આદદે ધનુરધિજ્યમમ્બિકા સા નિરીક્ષિતસખીજનોદ્યમા ॥ ૮૫॥

તત્ર શક્તિપૃતનાધનુશ્ચ્યુતાઃ સાયકાઃ કનકપુઙ્ખશોભિનઃ ।
સર્વતઃ પ્રમથમણ્ડલેઽપતઞ્છર્વરે દિનમણેરિવાંશવઃ ॥ ૮૬॥

તાં પુરૈવ વિકૃતાં વરૂથિનીં સ્વાશુગૈર્વિકૃતિમાપિતાં પરામ્ ।
વીક્ષ્ય વીક્ષ્ય સમરે વિજહ્રિરે તા નિરીક્ષિતપરસ્પરાનનાઃ ॥ ૮૭॥

સંસ્તશૂલમપવિદ્ધતોમરં ધ્વસ્તમુદ્ગરમપાસ્તકાર્મુકમ્ ।
નન્દિનં શરણમીયુરાહવે તાડિતા ગણવરાસ્તદાશુગૈઃ ॥ ૮૮॥

ધાવતો ગણવરાન્નિવારયસ્તર્જયન્યુધિ ચ તત્સખીજનાન્ ।
સન્દદર્શ ધુરિ તાં રથે સ્થિતાં સ દ્વિતીય ઇવ શઙ્કરો ગણઃ ॥ ૮૯॥

નિર્દયં પ્રવિવિધુઃ સખીજના મન્દમન્દમિષુભિસ્તમમ્બિકા ।
માતૃહસ્તગલિતા હિ માર્ગણાઃ કસ્ય મર્મણિ નિવેષ્ટુમીશતે ॥ ૯૦॥

સ્વામિનીતિ જનનીતિ ચાવશાન્નિસ્સરત્સુ વચનેષુ ચાસકૃત્ ।
પાણિના સ યુયુધે ક્ષણં બલાદઞ્જલિં પ્રતિમુહુશ્ચિકીર્ષતા ॥ ૯૧॥

પાણ્ડ્યરાજદુહિતુઃ કરચ્યુતા નાશુગાસ્તમસુભિર્વ્યયોજયન્ ।
તત્ત્વતો હિ કુસુમાનિ સાયકાનૈક્ષવં ચ ધનુરાહુરાગમાઃ ॥ ૯૨॥

સર્વવિત્ સ હિ શિલાદનન્દનઃ સન્નિવૃત્ય ઝટિતિ સ્વયં રણાત્ ।
સ્વામિને તદખિલં વ્યજિજ્ઞપત્ પાદયોઃ પ્રણિપતન્ મુહુર્મુહુઃ ॥ ૯૩॥

સન્ધિરેવ ભવતસ્તયોચિતઃ સઙ્ગરો ન તુ મહેશ! જાત્વપિ ।
એહિ યામ ઇતિવાદિનં તુ તં સોઽવલમ્બ્ય નિરગાત્ કૃતસ્મિતઃ ॥ ૯૪॥

પાણ્ડ્યરાજદુહિતુર્હિ દક્ષિણઃ પ્રાસ્ફુરત્ સમરકર્મણે ભુજઃ ॥
વીક્ષિતે તુ વૃષભધ્વજે વિભોરસ્ફુરત્ સ્વયમદક્ષિણો ભુજઃ ॥ ૯૫॥

આદિમં રસમિવાત્તવિગ્રહં ત્યક્તરૌક્ષ્યમિવ તેજસાં નિધિમ્ ।
સા દદર્શ શરદિન્દુસુન્દરં પુઙ્ગવે પુરહરં સનન્દિનમ્ ॥ ૯૬॥

સ્રંસતે સ્મ સશરં ધનુઃ કરાત્ તત્ત્વરે તમુપગૂહિતું મનઃ ।
ઉન્મમજ્જ પુલકોઽભિતસ્તદા નિર્મમજ્જ હૃદયેઽધિકઃ કુચઃ ॥ ૯૭॥

યં પ્રહર્તુમવલમ્બિતં ધનુસ્તં નિરીક્ષ્ય સમરે તદુજ્ઝિતમ્ ।
તત્કટાક્ષશરણઃ સમાદદે સાભિમાન ઇવ મીનકેતનઃ ॥ ૯૮॥

તદ્વિલોકવિવશીકૃતે હરે બાણપાતચકિતે ચ નન્દિનિ ।
રન્ધ્રમેતદુપલભ્ય દર્પકઃ સ્વાં રુષં સફલયામ્બભૂવ સઃ ॥ ૯૯॥

યુધ્યતે કથમિયં કુમારિકા યુધ્યતે કથમસૌ હરસ્ત્વિતિ ।
દ્રષ્ટુમિચ્છતિ જગત્રયે સ્મરમ્તાવુભૌ શરગણૈરિવાકિરત્ ॥ ૧૦૦॥

યાં વિદન્નનપરાધ્યમાશુગં પ્રાગજીયત કૃતશ્રમઃ સ્મરઃ ।
અદ્ય લબ્ધમનયા મહદ્યશઃ કાલ એવ વિજયસ્ય કારણમ્ ॥ ૧૦૧॥

તસ્તમ્ભિરે ચ મુમુહુશ્ચ ચકમ્પિરે ચ
    યત્ ત્રાસિતા યુધિ તયા પ્રમથાઃ સમસ્તાઃ ।
સદ્યો દશા પરિણતા નનુ સૈવ તસ્યાં
    કસ્યાપિ જીર્યતિ ન શૈવજનાપચારઃ ॥ ૧૦૨॥

મારસ્ય ચાર ઇવ વીક્ષ્ય હરં પુરસ્તા-
    દન્તર્યદા પ્રવિશતિ સ્મ કુચસ્તૃતીયઃ ।
સમ્બોધિતઃ સુમતિના સવિધં તદૈવ
    તસ્યા જગામ તરુણસ્તરુણેન્દુમૌલિઃ ॥ ૧૦૩॥

દદૃશે કિલ પુષ્પવર્ષમેકં પ્રકટં મૂર્ધ્નિ તયોસ્તદા પ્રવૃત્તમ્ ।
હૃદયસ્થપરસ્પરા ધિગમ્યં વવૃતે ચાન્તરમાઙ્ગજં તદન્યત્ ॥ ૧૦૪॥

ઉન્નમય્ય મુખમાનતમસ્યાઃ પાણિનેદમવદત્ પ્રમથેશઃ ।
પશ્ય દેવિ! કિમપત્રપસે ત્વં યત્ ત્વયા યુધિ વયં વિજિતાઃ સ્મઃ ॥ ૧૦૫॥

ઘટિતમખિલં જ્ઞાતો ભાવો ન કિઞ્ચન શેષિતં
    તદપિ ભવતીં વાચા યાચામિ કાઞ્ચનમાલિકામ્ ।
ઇતિ નિગદતિ સ્મેરે શમ્ભૌ રસોત્તરમુત્તરં
    ચતુરમવદત્ સદ્યો બાલા તથા ક્રિયતામિતિ ॥ ૧૦૬॥

ચાતુર્યં તદવેત્ય વાક્યસરણૌ ચન્દ્રાર્ધચૂડામણિ-
    ર્બાલે! તત્ ક્રિયતે તથૈવ ભવતી સદ્યઃ પરાવર્ત્તતામ્ ।
આસન્ને વિધુવાર એવ મધુરામેતાસ્મિ સજ્જીભવે-
    ત્યાભાષ્ય સ્મિતમન્થરં સ્વયમસાવન્તર્દધે તામપિ ॥ ૧૦૭॥

સદ્યઃ કરગ્રહફલા તવ જૈત્રયાત્રેત્યુક્તં ન વિસ્મર વચઃ કલશીભુવેતિ ।

સા બોધિતા સુમતિના સવિલજ્જમન્તઃ સ્મિત્વા તદૈવ મધુરાભિમુખી પ્રતસ્થે ।

ઇતિ મહાકવિશ્રીનીલકણ્ઠદીક્ષિતપ્રણીતે શિવલીલાર્ણવે દશમઃ સર્ગઃ ।

## અથૈકાદશઃ સર્ગઃ ।

અથોત્થિતાં તામનુગૃહ્ણતી ચમૂં સુખપ્રસુપ્તપ્રતિબોધિતામિવ ।
વિહાય સા ભૂમિપથં સખીવૃતા વિહાયસા પ્રાસ્થિત પુષ્પકાશ્રિતા ॥ ૧॥

દદર્શ વલ્મીકવદુન્નતાન્ ગિરીન્ મહાન્ત્યરણ્યાન્યપિ શાડ્વલાનિવ ।
સુરાપગાદ્યાઃ સરિતોઽપિ તન્તુવદ્ વિદૂરભાવાદવનૌ નૃપાત્મજા ॥ ૨॥

પુરોપશલ્યોપવનેઽવતીર્ય સા શુભ મુહૂર્તે સુમતિપ્રવેદિતે ।
વિવેશ રાજ્ઞો ભવનં પરિષ્કૃતં ગજેન દુગ્ધાર્ણવજન્મના શનૈઃ ॥ ૩॥

પ્રવિશ્ય ગેહં સદસિ ક્ષણં સ્થિતા વિસૃજ્ય પૌરાનનુયાયિનોઽપિ ચ ।
સખીસમેતા સુમતૌ પુરસ્સરે જગામ માતુઃ સદનં તટાતકા ॥ ૪॥

અભિદ્રવન્તીં દ્રુતમાસનાન્નિજાત્ પ્રમોદબાષ્પસ્થગિતેક્ષણામિયમ્ ।
નનામ નામ સ્વમુદીર્ય પાદયોર્વિકીર્ણપુષ્પા વિનયેન માતરમ્ ॥ ૫॥

સુતાં વિનમ્રાં પરિરભ્ય નિર્ભરં શિરસ્યુપાઘ્રાય ચુચુમ્બ ચાનને ।
પુનશ્ચ માતા પરિષસ્વજે ચિરં પુનશ્ચ જઘ્રૌ સુચિરં શિરસ્પદે ॥ ૬॥

નિયન્ત્રિતાનન્દતરઙ્ગસમ્પ્લવાં નિરુદ્ધહર્ષાશ્રુલવાં કથઞ્ચન ।
સમેત્ય સખ્યઃ સુમતિશ્ચ પાદયોર્મુહુઃ પ્રણેમુર્મહિષીં મહીપતેઃ ॥ ૭॥

ઇયં નદીભર્ત્તુરિયં સુધાન્ધસામિયં નૃપાણામુપદેતિ મન્ત્રિણા ।
નિવેદ્યમાનેઽપિ સુતામુખાર્પિતાં ન દૃષ્ટિમાવર્ત્તયિતું શશાક સા ॥ ૮॥

ઇયાન્ જયસ્તે સુમતેઃ પ્રભાવતઃ સખીભિરાભિઃ સુખમસ્મિ પોષિતા ।
ઇમાન્ સમાલોકય દેવિ! તાવદિત્યબોધયન્માતરમમ્બિકા સ્વયમ્ ॥ ૯॥

તથેતિ સા મન્ત્રિનિવેદિતાં પૃથગ્ દદર્શ દિવ્યામુપદાં ચ પાર્થિવીમ્ ।
સુરદ્રુમાન્ સ્વર્ગગવીં ચ પૂજિતાન્ પ્રણમ્ય જગ્રાહ નૃપાલભામિની ॥ ૧૦॥

વરઃ સુરાણાં જગતાં ચ યો વરો વરઃ સ એવ સ્વયમમ્બયાર્જિતઃ ।
કિમેભિરદ્યેત્યવદન્મહત્પ્રિયં સમેત્ય સખ્યઃ સુમતિશ્ચ તાં પ્રતિ ॥ ૧૧॥

કિમેતદિત્યપ્રતિપત્તિમન્થરાં વિશિષ્ય દેવીં સુમતિર્વિબોધયન્ ।
સ સંવિધિત્સુઃ સકલં તદાજ્ઞયા બહિઃ પ્રતસ્થે બહુધા તયાદૃતઃ ॥ ૧૨॥

ઉપસ્થિતેશાનવિવાહમઙ્ગલામુદીક્ષ્ય પુત્રીં મુમુદે ન સા તથા ।
યથા વ્યષીદત્ તનયોત્સવપ્રિયં પતિં સ્મરન્તી મલયધ્વજં નૃપમ્ ॥ ૧૩॥

પરીત્ય હેમામ્બરરત્નભૂષણૈઃ પ્રવર્તિતારાત્રિકમઙ્ગલા સ્વયમ્ ।
ચકાર રક્ષાં જનની તનૂભુવઃ સિતેન ફાલે ભસિતેન શૂલિનઃ ॥ ૧૪॥

અથોપકાર્યા વિવિધાઃ સુધાન્ધસાં ધરાભુજાં તત્ર તપસ્વિનામપિ ।
સમસ્તવસ્તૂપચિતાઃ સમન્તતશ્ચકાર સજ્જાઃ સુમતિઃ ક્ષણાદિવ ॥ ૧૫॥

સુગન્ધિગન્ધદ્રવલિપ્તભિત્તિકં સુવર્ણરમ્ભાઘટિતં ગૃહે ગૃહે ।
નિયન્ત્રિતચ્છત્રમુદઞ્ચિતધ્વજં પુરં સ્વતઃ પૌરજનૈરલઙ્કૃતમ્ ॥ ૧૬॥

વિનિર્ગતઃ સુન્દરનાથલિઙ્ગતો મહેશ્વરો માનુષમાસ્થિતો વપુઃ ।
પુરોપશલ્યેઽવતતાર સંવૃતો ગણૈઃ સુરૈર્માતૃગણૈશ્ચ સર્વતઃ ॥ ૧૭॥

સ પાણ્ડ્યદેવીપ્રહિતેન મન્ત્રિણા નિવેદિતાસન્નમુહૂર્તમઙ્ગલઃ ।
પ્રભુર્વિવાહોચિતવેષસુન્દરઃ પ્રવેષ્ટુકામો મધુરાં વિનિર્યયૌ ॥ ૧૮॥

કિરીટકોટીઘટિતોઽસ્ય પાટલો મણિર્બભૌ વાસુકિનોપદીકૃતઃ ।
નિકૃત્ય બાલં વિધુમુચ્ચકૈસ્તતઃ પરિસ્ફુરન્ બાલ ઇવ ત્વિષાં પતિઃ ॥ ૧૯॥

વિજિત્ય મારં જગદેકધન્વિનં યદાપ કીર્તિં મહતીં મહેશિતુઃ ।
તદક્ષિ તસ્મિન્નધુના વિજૃમ્ભિતે મમજ્જ મન્દાક્ષવશાદિવ સ્વયમ્ ॥ ૨૦॥

પ્રસક્તમઙ્કં વિમલે કથઞ્ચન પ્રમાર્ષ્ટુમીષ્ટે ન શિવોઽપિ સર્વથા ।
મૃગેણ હીનોઽપ્યલિકેઽસ્ય યત્ ક્વચિત્ બભૌ મુખેન્દુર્મૃગનાભિલાઞ્છિતઃ ॥ ૨૧॥

કપોલસૌન્દર્યમમુષ્ય પશ્યતઃ કટાક્ષરેખાઃ પતિતા જનસ્ય યાઃ ।
નવોદ્ગતશ્મશ્રુનિભાદિહૈવ તા નિષેદુરત્યાદરકીલિતા ઇવ ॥ ૨૨॥

વિશુદ્ધમુક્તાફલકુણ્ડલાઙ્કિતં વિકીર્ણમન્દસ્મિતસુન્દરાધરમ્ ।
વિશાલનેત્રં વદનં નિરીક્ષિતું તદસ્ય સૈવાર્હતિ મીનલોચના ॥ ૨૩॥

વિશુદ્ધહેમત્વિષિ વિશ્વમઙ્ગલે વપુષ્યમુષ્યાદ્ભુતકુઙ્કુમાઙ્કિતે ।
અલક્ષિ સૂક્ષ્મો વિશદશ્ચ કઞ્ચુકોઽવતંસિતેન્દોરિવ ચન્દ્રિકાઙ્કુરઃ ॥ ૨૪॥

મુહૂર્તપર્યન્તવિલમ્બનાક્ષમાવિજૃમ્ભમાણસ્મરસઞ્જ્વરાર્જિતઃ ।
વિનીલિમેવ વ્યરુચદ્ ભુજાન્તરે તનુસ્તદીયે મૃગનાભિચર્ચિકા ॥ ૨૫॥

પૃથગ્વિધાભિર્મણિહારયષ્ટિભિઃ પરિષ્કૃતં તદ્વપુરૈન્દુશેખરમ્ ।

અલક્ષ્યતાખણ્ડલચાપમણ્ડિતઃ પયોધરઃ સાન્ધ્યરુચેવ પાટલઃ ॥ ૨૬॥

મણીમયૈરઙ્ગદકઙ્કણાદિભિર્ભરં ન મેને મૃદુલોઽપિ તદ્ભુજઃ ।
મહીધરાણાં મહતાં ફણાભૃતાં વિરોપણાસાદિતલાઘવોત્સવઃ ॥ ૨૭॥

દિગમ્બરઃ કાઞ્ચનમમ્બરં હરઃ કથં બભારેતિ ન વિસ્મયાય નઃ ।
તનુત્વિષા તસ્ય દિશો દશાપિ યત્ પ્રતપ્તકાર્ત્તસ્વરભાસ્વરીકૃતાઃ ॥ ૨૮॥

કિમસ્ય મઞ્જીરપદે કૃતાલયાઃ પરીત્ય મુક્તાશ્ચરણં સિષેવિરે ।
મહોત્સવં દ્રષ્ટુમિમં મહેશ! નઃ સકૃત્ પુનઃ સંસરણં ભવત્વિતિ ॥ ૨૯॥

વપુશ્ચિદાનન્દમયં યદદ્ભુતં તદાવૃતં તાવદવિદ્યયાદ્યયા ।
ઇદં તતસ્સુન્દરમિત્થમાવૃતં મણિત્વિષેતિ વ્યષદન્મહર્ષયઃ ॥ ૩૦॥

વિભૂષિતસ્યાસ્ય પુરઃ પુરન્દરો વિશાલમેકં મુકુરં સમાદદે ।
ન તત્સમશ્ચેતિ ગિરં પુરાતનીમપાકરિષ્યન્નિવ બિમ્બલમ્ભનાત્ ॥ ૩૧॥

સ નન્દિના સઙ્ઘટિતં પદાબ્જયોઃ પુનન્ પુરારિર્મણિપાદુકાયુગમ્ ।
કરૌ કૃતાર્થૌ કમલાક્ષવેધસોઃ સલીલમાલમ્બ્ય શનૈર્બહિર્યયૌ ॥ ૩૨॥

મદાલસાભિક્રમણાક્ષિમીલનૈઃ કરાર્પણાકુઞ્ચિતકર્ણચાપલૈઃ ।
ગજાનનાત્ તત્ક્ષણશિક્ષિતૈર્દૃઢં સ પુઙ્ગવઃ કુઞ્જરપુઙ્ગવોઽભવત્ ॥ ૩૩॥

ઉદઞ્ચિતાકુઞ્ચિતતત્પુરઃપદક્ષણાર્પિતાઙ્ઘ્રિઃ શ્રવણાવલમ્બનઃ ।
સલીલમુન્નમ્ય સ પૂર્વપર્વતં પતિસ્ત્વિષાં બાલ રુરોહ તમ્ ॥ ૩૪॥

નિગૃહ્યમાણૌ કરિણૌ મુહુર્મુહુઃ પુનર્નયન્તૌ સમમાજ્ઞયા વિભોઃ ।
કૃતાનુલાપૌ વિધિકેશવૌ તદા પ્રચેલતુસ્તસ્ય તુ પાર્શ્વયોર્દ્વયોઃ ૩૫॥

ક્વચિન્મહાકાલમુખાન્ ગણેશ્વરાન્ ક્વચિચ્ચ દેવાસુરસિદ્ધચારણાન્ ।
નિયન્ત્રયન્ દૂરત એવ પાર્શ્વયોશ્ચચાલ નન્દી પુરતઃ સવાસવઃ ॥ ૩૬॥

સ્મૃતીતિહાસૈર્નિગમાસ્તમેકતઃ શિવાગમાસ્તન્ત્રગણૈસ્તતોઽન્યતઃ ।
વવન્દિરે વન્દિદશામુપાશ્રિતા વિમિશ્રિતા યોગિભિરાત્મદર્શિભિઃ ॥ ૩૭॥

પુરઃ પુરઃ પાણ્ડ્યનૃપાલવાહિની તતોઽનુ દેવાઃ પ્રમથાસ્તતોઽનુ ચ ।
તતોઽનુ ભેરીજયકાહલાદયસ્તતોઽનુ ચેલુર્વિવિધા જયધ્વજાઃ ॥ ૩૮॥

શચીમુખૈર્નિર્જરકામિનીજનૈઃ સમાવૃતે માતૃગણૈશ્ચ સર્વતઃ ।
મહાર્હકર્ણીરથમધ્યગે રમાવચોઽધિદેવ્યૌ તમનુ પ્રચેલતુઃ ॥ ૩૯॥

શ્રિયં નૃપાણામવરોધસુભ્રુવો દ્વિજાતિપત્ન્યો દયિતાં હવિર્ભુજઃ ।
ગિરં ગૃહિણ્યો વિદુષાં ચ સાદરં વિશિષ્ય ભક્ત્યાવનતા વવન્દિરે ॥ ૪૦॥

સમુદ્ધૃતં મૂર્ધનિ તસ્ય પાણ્ડરં પ્રકાશતે સ્માતપવારણં મહત્ ।
શિરસ્થિતં સ્વં શિશુમસ્ય વીક્ષિતું સમાગતઃ પૂર્ણ ઇવ ક્ષપાકરઃ ॥ ૪૧॥

સિતાતપત્રાન્તરસમ્મિતં વિભોઃ શિરસ્પદં વીક્ષિતુમુન્મના મનાક્ ।
વિધાતૃહંસઃ પરિતઃ પતન્નિવ વ્યલોકિ ધૂતં દિવિ ચામરદ્વયમ્ ॥ ૪૨॥

અયં સ રાજ્ઞીપતિરેતિ પશ્યતેત્યનુદ્રવજ્જાનપદોક્તિભનિભિઃ ।
કૃતાભ્યસૂયેષુ ગણેષુ સસ્મિતૌ હરિર્વિરિઞ્ચશ્ચ તમન્વપશ્યતામ્ ॥ ૪૩॥

પરાક્રમં સ્વં પ્રકટીચિકીર્ષતા સમાહૃતં શમ્બરવૈરિણા શિવે ।
બલં નિજં મૌલમિવાઙ્ગનાજનસ્તમીક્ષિતું સન્નિપપાત સર્વતઃ ॥ ૪૪॥

તમેકવક્ત્રં દ્વિભુજં દ્વિનેત્રમપ્યમાનુષં ભાવમિવાસ્થિતં ત્વિષા ।
નિરીક્ષમાણા નિભૃતૈર્વિલોચનૈઃ પરસ્પરામિત્થમવાદિષુઃ સ્ત્રિયઃ ॥ ૪૫॥

અહો મુખામ્ભોજમહો યુગં દૃશોરહો ભુજદ્વન્દ્વમહો ભુજાન્તરમ્ ।
અહો મહત્કૌશલમસ્ય વીક્ષિતેષ્વહો વિચિત્રા મદવારણે સ્થિતિઃ ॥ ૪૬॥

જિતા ત્વયા યત્ પૃથિવી ન તજ્જિતં જિતાશ્ચ યદ્દેવિ! સુરા ન તજ્જિતમ્ ।
અનેન યૂના યદનન્યનિર્જિતં જિતં વધૂજન્મ તદૂર્જિતં જિતમ્ ॥ ૪૭॥

અમું સમાલોક્ય યુગેન સા દૃશોરમું સમાશ્લિષ્ય ભુજદ્વયેન વા ।
કથં પુનર્નિર્વૃણુયાત્ તટાતકાપ્યપૂર્ણકામાઃ સકલા વયં તતઃ ॥ ૪૮॥

હૃતં મનોઽનેન હૃતે વિલોચને સહૈવ નીતાઃ સખિ! પઞ્ચ ચાસવઃ ।
ઇદં વપુર્નઃ પરમત્ર પાતિતં ગતત્રપો વિધ્યતિ તચ્ચ મન્મથઃ ॥ ૪૯॥

ત્વદીક્ષણાયોપગતાસ્ત્વદાશ્રિતા હિનસ્તિ નસ્ત્વય્યપિ પશ્યતિ સ્મરઃ ।
ઇતીરયામો વયમસ્ય સન્નિધૌ પ્રભુઃ કિલાયં નગરસ્ય ચાસ્ય નઃ ॥ ૫૦॥

મયામ્બુજાક્ષઃ સવિશેષમીક્ષિતો મયાદ્ય દૃષ્ટઃ સવિધે ચતુર્મુખઃ ।
અમું યુવાનં પ્રથમં વિલોકયન્ત્યહં તુ મુગ્ધા ન કમપ્યવોદિષમ્ ॥ ૫૧॥

મયાસ્ય દૃષ્ટે વિપુલાયતે દૃશૌ મયાસ્ય મન્દસ્મિતમીક્ષિતં શુચિ ।
અહં દ્વયં પ્રૈક્ષિષિ સાધુ સાધ્વિયં પશુર્હિ નઃ પુચ્છવિષાણવર્જિતઃ ॥ ૫૨॥

અનઙ્ગસર્વસ્વમનન્યવીક્ષિતં ન્યધાયિ યત્ પાણ્ડ્યકુમારિકાવશે ।
તદપ્યવસ્કન્તુમુપાગતઃ સ્વયં યુવા કિલાયં ચતુરો જિતસ્મરઃ ॥ ૫૩॥

ઇતિ પ્રવૃત્તાઃ પ્રતિવીથિ સઙ્કથા મૃગીદૃશામાકલયન્ કૃતસ્મિતઃ ।
વિકીર્યમાણઃ પથિ લાજમૌક્તિકૈઃ પુરાઙ્ગનાભિઃ પુરશાસનો યયૌ ॥ ૫૪॥

સ રાજગેહં સમયા મતઙ્ગજં નિયન્ત્રયન્નાદિશતિ સ્મ નન્દિનમ્ ।
શ્રિયં ચ વાણીમપિ રાજમન્દિરં પ્રવેશય પ્રાગમરીગણૈરિતિ ॥ ૫૫॥

તતઃ શિલાદાત્મજવેત્રતાડિતદ્રવન્નભોભૂચરસંસદા પથા ।
સમં સમસ્તામરસુન્દરીજનૈર્જગજ્જનન્યૌ યયતુર્નૃપાલયમ્ ॥ ૫૬॥

પુરસ્કૃતે સ્વોચિતયા સપર્યયા પુરોધસા કુમ્ભભવેન તે ઉભે ।
અભિદ્રુતા કાઞ્ચનમાલિકા જવાદ્ વિકીર્ણપુષ્પા પદયોરવન્દત ॥ ૫૭॥

પૃથક્ પૃથક્ સા પરિરભ્ય લાલિતા શચીરમાવાગ્જનનીભિરાદરાત્ ।
શ્રિયે સરોજં શુકમુજ્જ્વલં ગિરે મણિં ચ શચ્યૈ વિનયાદુપાહરત્ ॥ ૫૮॥

ઉપેહિ માતામહિ ! કુત્ર સા વધૂઃ પ્રદર્શયાસ્મજ્જનનીમિતીરિતા ।
નિનાય તાઃ કાઞ્ચનમાલિકા શનૈસ્તમાલયં યત્ર તટાતકાસ્થિતિઃ ॥ ૫૯॥

વિસૃજ્ય ભદ્રાસનમાત્તપાદુકાં સમાયતીં પ્રશ્રયગન્ધિભિઃ પદૈઃ ।
વધૂં વિવાહોચિતવેષકોમળાં નિરીક્ષ્ય તસ્થુર્નિભૃતાઃ સુરસ્ત્રિયઃ ॥ ૬૦॥

અલક્ષ્યતાસ્યા મણિપાદુકાઞ્ચલે સમન્તતો મૌક્તિકપઙ્ક્તિરુજ્જ્વલા ।
અદૂરલગ્ના ચરણારવિન્દયોરનુશ્રવાણામિવ વર્ણપદ્ધતિઃ ॥ ૬૧॥

અતીત્ય લાક્ષારસમાહિતં નવં માણપ્રભાં પાદુકયોશ્ચ તાવતીમ્ ।
અકૃત્રિમઃ પાટલિમા પદાબ્જયોરલક્ષ્યતાસ્યા વિસરન્ બહિઃ સ્ફુટમ્ ॥ ૬૨॥

પ્રબોધયન્તી શ્રિયમક્ષિસંજ્ઞયા સરસ્વતી તચ્ચરણામ્બુજદ્વયમ્ ।
ક્ષણં નિદધ્યૌ વિકચેક્ષણા તતશ્ચિરં તુ દધ્યૌ મુકુળીકૃતેક્ષણા ॥ ૬૩॥

સમાપતન્ત્યાઃ સવિલાસમાબભૌ મનોહરોઽસ્યા મણિમેખલારવઃ ।
વિજિત્ય શમ્ભું મદનેન ગર્જતા પ્રવર્તિતોચ્ચૈરિવ વીરઘોષણા ॥ ૬૪॥

પ્રતિક્ષણોન્મેષિપયોધરોન્નતિપ્રતિસ્ફુટત્કઞ્ચુકસન્ધિપૂરણઃ ।
ઉરોજનિશ્શેષસમાવૃતે બભાવુરસ્યમુષ્યા મણિહારકોરકઃ ॥ ૬૫॥

પરસ્પરસ્પર્ધ્યપિ તત્ કુચદ્વયં વિજેતુકામં કિલ મેરુમન્દરૌ ।
તથા સમેતં સમયે મિથઃ સ્વયં યથોપલભ્યેત ન કિઞ્ચિદન્તરમ્ ॥ ૬૬॥

કૃપાણચાપગ્રહકન્દુકાહતિપ્રપન્નકોટીરતટાર્પણાદિભિઃ ।

કરો ન કાઠિન્યમવાપ હેતુભિર્વદાન્યતાવાસનયેવ સુભ્રવઃ ॥ ૬૭॥

ત્રિલોકજેતુર્જયલાઞ્છનેન સા ત્રિભઙ્ગિસઙ્ઘટ્ટિતમૌક્તિકાત્મના ।
કરારવિન્દં કટકેન બાલિકા વિભૂષયામાસ મનોભવાજ્ઞયા ॥ ૬૮॥

ઉપાસિતું સા પતિમુત્પલપ્રિયં કરે ચ કર્ણે ચ નિવેશિતોત્પલા ।
બભાર ભૂયો નયનોત્પલે તતઃ સ્વયં બભૂવોત્પલદામકોમલા ॥ ૬૯॥

અલક્ષિ તાટઙ્કયુગાન્તરાર્પિતો વિનિર્મિતો મૌક્તિકરત્નમણ્ડલઃ ।
સ્વયંવરાયોપગતસ્ત્યજન્ વિધું તદાનનેન્દોરિવ તારકાગણઃ ॥ ૭૦॥

અલક્ષ્યતાસન્નકરગ્રહોત્સવપ્રમોદજોઽસ્યા વિશદઃ સ્મિતાઙ્કુરઃ ।
વિસૃત્ય નાસામણિચન્દ્રિકા બહિર્વિભૂષયન્તીવ રદચ્છદાન્તરમ્ ॥ ૭૧॥

પ્રચીયમાનં મુખરામણીયકપ્રવાહમિત્થં વયસા નવં નવમ્ ।
અવેક્ષ્ય મીનાવિવ જાતવલ્ગનાવશોભિષાતાં ચપલે તદીક્ષણે ॥ ૭૨॥

વિધું ચતુર્ધા પ્રવિભજ્ય તન્મુખે ત્રિભિઃ કપોલૌ નિટિલં ચ કલ્પયન્ ।
તુરીયમંશં વિનિયોગવર્જિતં ન્યવેદયત્ સ્વામિનિ શઙ્કરે વિધિઃ ॥ ૭૩॥

વિશેષયામાસ યદર્ધચન્દ્રતો લલાટમસ્યા મૃગનાભિરેખિકા ।
વિશેષકત્વં વહતિ સ્મ તેન સા તતોઽન્યતસ્તત્પદમૌપચારિકમ્ ॥ ૭૪॥

રરાજ તદ્વેણિલતાવલમ્બિની પ્રસૂનપઙ્ક્તિશ્ચરમાઙ્કુસીમનિ ।
પ્રહર્તુમીશં સમયે મનોભુવા નિવેશિતા ગૂઢમિવેષુસંહતિઃ ॥ ૭૫॥

હરસ્ય શૃઙ્ગારરસાધિદેવતામવેક્ષ્ય તાં મન્થરમાયતીં પુરઃ ।
અલજ્જત શ્રીર્જગદાદિસુન્દરી લલજ્જિરે લજ્જિતુમપ્સરોગણાઃ ॥ ૭૬॥

પદૈરિમાં પ્રાકૃતવસ્તુસંહતિપ્રસક્તસઙ્કેતમલીમસીકૃતૈઃ ।
અવર્ણયન્તી વિવવાર ભારતા સ્વવૈદુષીં મૌનત એવ કેવલમ્ ॥ ૭૭॥

શચી તદીયાદ્ભુતરૂપદર્શને સહસ્રમક્ષ્ણાં સ્વયમિચ્છતી સતી ।
સકૃત્પ્રવૃત્ત્યાપિ ચકાઙ્ક્ષ ગૌતમે બલાદહલ્યાકૃતશાપમાત્મનઃ ॥ ૭૮॥

તતઃ શનૈર્ભૂષણગૌરવેણ સા સખીજનાલમ્બિતહારમણ્ડલા ।
નનામ વાણીકમલે નતા સ્વયં સુરાઙ્ગનાભિઃ પરિષસ્વજે શચીમ્ ॥ ૭૯॥

અયં પ્રણામો નનુ લાભ એવ નો વિવાહદીક્ષાવભૃથે તુ દેવિ! તે ।
ન હિ પ્રણામાવસરં લભેવહીત્યવોચતાં તાં પરિરભ્ય તે દૃઢમ્ ॥ ૮૦॥

અથાવતીર્ય દ્વિરદાદલઙ્કૃતાદનુદ્રુતઃ પારિષદૈઃ સુરૈરપિ ।
વિરિઞ્ચવૈકુણ્ઠકરાવલમ્બનો વિવેશ રાજ્ઞો ભવનં મહેશ્વરઃ ॥ ૮૧॥

તમર્ઘ્યપાદ્યાચમનીયપૂર્વયા સપર્યયા કુમ્ભભવઃ સભાજયન્ ।
પ્રવેશયામાસ વરં મહર્ષિભિઃ પ્રસન્નયા તસ્ય દૃશા કૃતાર્થિતઃ ॥ ૮૨॥

સ પાણ્ડ્યશુદ્ધાન્તવિલાસિનીજનૈર્વિકીર્યમાણઃ શુભલાજમુષ્ટિભિઃ ।
જટાભિઘાતોત્પતદભ્રવાહિનીપયઃકણાકીર્ણ ઇવાબભૌ વરઃ ॥ ૮૩॥

પ્રવિષ્ટમન્તઃ પ્રતિહારસીમનિ પ્રતીક્ષ્ય જામાતરમિન્દુશેખરમ્ ।
પ્રચોદિતા કાઞ્ચનમાલયા રમા ચકાર પાદ્યં પયસાસ્ય પાદયોઃ ॥ ૮૪॥

પ્રદીપહસ્તા વચસામધીશ્વરા પ્રદક્ષિણીકૃત્ય શચીસમન્વિતા ।
પ્રવેશયામાસ શશાઙ્કશેખરં પુરસ્સરન્તી દિવિષત્પુરન્ધ્રિભિઃ ॥ ૮૫॥

સ વિદ્રુમસ્તમ્ભચતુષ્કશોભિતાં વિચિત્રવૈદૂર્યવિટઙ્કલાઞ્છિતામ્ ।
વિલમ્બિમુક્તામણિદામકોમલાં વિવેશ દેવોઽથ વિવાહવેદિકામ્ ॥ ૮૬॥

ભેરીભાઙ્કારસાન્દ્રં બહિરબહિરપિ પ્રૌઢશુદ્ધાન્તકાન્તા-
પાણિવ્યાવિદ્ધતૂર્યધ્વનિજનિતચમત્કારસઙ્ગીતરમ્યમ્ ।
જામાતૃશ્લાઘનોક્તિવ્યતિકરિતવધૂબાન્ધવોલ્લાસહાસં
જજ્ઞે રાજ્ઞો ગૃહં તન્મુનિજનરચિતોત્તુઙ્ગમઙ્ગલ્યપાઠમ્ ॥ ૮૭॥

ઇતિ મહાકવિશ્રીનીલકણ્ઠદીક્ષિતપ્રણીતે શિવલીલાર્ણવે એકાદશઃ સર્ગઃ ।

## અથ દ્વાદશઃ સર્ગઃ ।

અથાસને રત્નમયે નિષણ્ણમાદ્યં યુવાનં મુનયઃ પુરાણાઃ ।
આશીર્વચોભિર્વિવિધૈરપુષ્ણન્નનાહતાતોદ્યનિનાદમિશ્રૈઃ ॥ ૧॥

પ્રકીર્ય પુષ્પાણિ મણીમયાનિ પત્નીં નમન્તીં મલયધ્વજસ્ય ।
શ્રિયા ચ વાણ્યા ચ નિવેદ્યમાનાં શ્વશ્રૂં હરઃ પ્રૈક્ષત ગૌરવેણ ॥ ૨॥

અગસ્ત્યમામન્ત્ર્ય તતો વિધાતુરાદેશતઃ શ્રીશ્ચ સરસ્વતી ચ ।
નિવેશયામાસતુરાસનાર્ધે વધૂં હ્રિયા નમ્રમુખીં વરસ્ય ॥ ૩॥

દાને સ્વસુર્દાનવમર્દનોઽપિ નિયુજ્યમાનઃ કમલાસનેન ।
શ્રિયા સમં કાઞ્ચનમાલિકાયાઃ સમક્ષમારાન્નિષસાદ વધ્વાઃ ॥ ૪॥

પ્રસ્થાપિતઃ પ્રાગ્ ગિરિજાવિવાહે યત્ કુમ્ભજન્મા તદૃણં વિનેતુમ્ ।

બ્રહ્માણમીશસ્તુ વિવાહહોમે વવ્રે તમધ્વર્યુમથાબ્જયોનિમ્ ॥ ૫॥

યત્નાદપિ પ્રાગનવેક્ષિતં યત્ તચ્છામ્ભવં પાદતલં મુકુન્દઃ ।
પદ્માકરાવર્જિતપાદ્યધૌતમાનર્ચ પશ્યન્નિભૃતં પ્રસૂનૈઃ ॥ ૬॥

આરોપયન્નઙ્ઘ્રતલં હરિસ્તામાચક્ષતે સ્વં પરમં પદં યામ્ ।
રાજ્યશ્રિયા દક્ષિણયા સહૈવ દદૌ ત્રિવેદીકવયે વરાય ॥ ૭॥

દાતુર્ગ્રહીતુશ્ચ કિમસ્તિ ગોત્રં કો વા પિતા કશ્ચ પિતામહો વા ।
અતોઽદ્ભુતસ્તુભ્યમિમાં દદામીત્યાસીદિયાનેવ તુ દાનમન્ત્રઃ ॥ ૮॥

તત્પૂર્વમુત્તાનદશાગૃહીતસઙ્કેતકે પાણિતલે પુરારેઃ ।
ન્યસ્તઃ કરઃ પાણ્ડ્યકુમારિકાયાઃ સર્વોત્તરત્વં પ્રકટીચકાર ॥ ૯॥

કરો ગૃહીતઃ પૃથિવીપતિભ્યો દિક્પાલકેભ્યશ્ચ યયા જયન્ત્યા ।
તસ્યાસ્ત્વયાગ્રાહિ કરોઽધુનેતિ દેવી ગિરાં સસ્મિતમાહ દેવમ્ ॥ ૧૦॥

પરસ્પરસ્યોપરિ મન્મથેન પ્રયુક્તમસ્ત્રં સમયં પ્રતીક્ષ્ય ।
સન્દર્શયન્તાવિવ ચક્રતુસ્તૌ માલ્યાર્પણવ્યત્યયમઙ્ગલાનિ ॥ ૧૧॥

ગૃહન્ વરઃ સ્વાઞ્જલિના મૃગાક્ષ્યા લાજાઞ્જલિં હોમવિધૌ ચકાશે ।
માલ્યાપવેધગ્લપનાપરાધનિર્માર્જનાયાનુનયન્નિવેમામ્ ॥ ૧૨॥

અશ્માનમારોપયિતું પદાન્જમાલમ્બમાને દયિતે મૃગાક્ષ્યાઃ ।
પાદગ્રહઃ પ્રાથમિકોઽયમસ્યાઃ પ્રચીયતામિત્યવદન્મુકુન્દઃ ॥ ૧૩॥

કાન્તઃ શરણ્યો જગતાં ત્રયાણાં તસ્યાઃ કરસ્થે ચરણારવિન્દે ।
ઐશ્વર્યમુર્વ્યાદિ સદાશિવાન્તમવ્યાહતં તદ્ બુબુધે કરસ્થમ્ ॥ ૧૪॥

આમુક્તમઞ્જીરમલક્તકાઙ્કમાકુઞ્ચિતં કિઞ્ચિદિવ હ્રિયાન્તઃ ।
સ્વિન્નં કરે સ્વિદ્યતિ લગ્નમૈશે ધન્યાઃ પદં તદ્ દદૃશુર્જનન્યાઃ ॥ ૧૫॥

આસીત્ તદાવિષ્કૃતહર્ષબાષ્પમક્ષિદ્વયં કાઞ્ચનમાલિકાયાઃ ।
આ માનુષાદા ચ મહેશ્વરીયાદાનન્દ સામ્રાજ્ય ઇવાભિષિક્તમ્ ॥ ૧૬॥

આધીયમાનેઽશ્મનિ તત્પદાબ્જે મઞ્જીરઘોષો મધુરો જજૃમ્ભે ।
સદ્યઃ સમાસ્ફાલિતદોર્દ્વયેન મુક્તઃ સ્મરેણેવ જયાટ્ટહાસઃ ॥ ૧૭॥

પ્રદક્ષિણીકુર્વતિ હવ્યવાહં દ્વન્દ્વે જગન્મઙ્ગલધામ્નિ તસ્મિન્ ।
પ્રદક્ષિણીચક્રુરિવ પ્રજાનાં દૃશસ્તદીયોત્પલદામદમ્ભાત્ ॥ ૧૮॥

નિવર્ત્ય વૈવાહિકહોમશેષમમ્ભોજભૂઃ કુમ્ભભુવોપદિષ્ટઃ ।
ન્યવેશયદ્રત્નમયેઽથ પીઠે વામે વધૂં દક્ષિણતો વરઞ્ચ ॥ ૧૯॥

આસન્નમપ્યન્તરલેશશૂન્યં મિથો ન તૃપ્તિં મિથુનં તદૂહે ।
અતૃપ્તયોરેકશરીરભાવેઽપ્યાસત્તિરેષા કતમા તયોઃ સ્યાત્ ॥ ૨૦॥

આશીર્ભિરાનુશ્રવિકીભિરાદ્યામાચારપદ્યામનુપાલયન્તઃ ।
સંવર્ધયામાસુરિમૌ સમેતા બ્રહ્મર્ષયો બ્રહ્મમુખા હસન્તઃ ॥ ૨૧॥

સ દક્ષિણાભિઃ પરિતોષ્ય વિપ્રાન્ સમ્માન્ય દેવાનુચિતોપચારૈઃ ।
વિશ્રાન્તિહેતોરવરોધગેહં વિવેશ દેવોઽથ તટાતકાયાઃ ॥ ૨૨॥

ધૈર્યોપદેશાદસકૃત્ સખીભ્યાં વાણીરમાભ્યાં પ્રતિબોધિતાયાઃ ।
આલમ્બમાનઃ કરમમ્બિકાયા મઞ્ચે પરાર્ધ્યે નિષસાદ દેવઃ ॥ ૨૩॥

તામ્રાધરોષ્ઠં તરલાયતાક્ષમાસ્વિન્નમષિત્રપયાવનમ્રમ્ ।
વક્ત્રં શનૈરુન્નમયામ્બભૂવ માર્જન્નિવ સ્વેદલવાન્ સ તસ્યાઃ ॥ ૨૪॥

તામ્બૂલમાસન્નસખીવિતીર્ણમાદાય પર્યાકુલિતાં હ્રિયા તામ્ ।
આલક્ષયન્તી કમલા સલીલમાહ સ્મ પત્યે પ્રતિપાદયતિ ॥ ૨૫॥

કુતો ગૃહીતા વલયાસ્ત્વયેમે કેનોપહારીકૃત એષ હારઃ ।
ઇત્યઙ્ગમઙ્ગં પતિરામમર્શ જિજ્ઞાસયેવાભરણેષુ તસ્યાઃ ॥ ૨૬॥

આપૃચ્છ્યમાના દયિતેન તત્ તદવાઙ્મુખી નોત્તરમાચચક્ષે ।
નિર્બન્ધપૃષ્ટા તુ કથઞ્ચિદેષા મન્દસ્મિતેનોત્તરયામ્બભૂવ ॥ ૨૭॥

માતા તવેયં મલયધ્વજસ્ય કિં ભોગિની કિં ગૃહિણીષુ કાચિત્ ।
ઇત્યુક્તિભિઃ કોપયતાપિ પત્યા પ્રત્યુત્તરં ભ્રૂકુટિરેવ લેભે ॥ ૨૮॥

તદિઙ્ગિતાનામયથાવબોધાત્ સમાચરન્તીભિરિવાન્યદન્યત્ ।
સલ્લાઁપયામાસ રુષા સખીભિઃ સઙ્કેતિતાભિઃ સ હસન્ નવોઢામ્ ॥ ૨૯॥

યદાહ યત્ પ્રૈક્ષત યજ્જહાસ યદાસ્ત જોષં યદપિ ન્યષેધત્ ।
સા તેન તેનૈવ શરીરલાભસાફલ્યમાપાદયતિ સ્મ યૂનઃ ॥ ૩૦॥

સ યાવદિત્થં સમયાચકાર નવોઢયા નર્મપરો મહેશઃ ।
તાવજ્જના ભક્તકરાઃ સમેત્ય નિર્વર્તિતં પાકવિધિં શશંસુઃ ॥ ૩૧॥

તે શાસનાત્ તત્ર મહેશ્વરસ્ય પ્રાક્ બ્રાહ્મણાન્ ભોજયિતું સમેતાન્ ।
સમ્મેલયન્તિ સ્મ સમન્તતોઽપિ સ્વયં તુ ભક્ત્યા સુમતિર્મહર્ષીન્ ॥ ૩૨॥

અસેવમાનૌ નટનં પુરારેરપોઽપિ યો જાત્વપિ નાદદાતે ।
તૌ વ્યાઘ્રપાદશ્ચ પતઞ્જલિશ્ચ સન્નેહતુર્હેમસભાં પ્રયાતુમ્ ॥ ૩૩॥

આકર્ણ્ય તન્નિશ્ચયમાનિનાય તૌ યોગિનૌ સુન્દરપાણ્ડ્યદેવઃ ।
આચષ્ટ ચૈનાવભિગમ્ય ભક્ત્યા પાદે સ્પૃશન્ પ્રશ્રયપૂર્વમિત્થમ્ ॥ ૩૪॥

સભાનટઃ કાઞ્ચનસંસદીવ સંસેવ્યમાનઃ સુરસિદ્ધસઙ્ઘૈઃ ।
હાલાસ્યનાથોઽપિ કરોતિ નૃત્તમસ્મિન્ સદા રૂપ્યસભાન્તરાલે ॥ ૩૫॥

અત્રૈવ નૃતં તરુણેન્દુમૌલેરાસેવ્ય માધ્યાહ્નિકમદ્ભુતં તત્ ।
આગચ્છતં ક્ષિપ્રમનુગ્રહીતું પ્રાણાગ્નિહોત્રાચરણાદિહાસ્માન્ ॥ ૩૬॥

ઇતીરિતૌ પાશુપતૌ મુની તૌ તથેતિ ગત્વા કનકામ્બુજિન્યામ્ ।
નિર્વર્ત્તયન્તૌ નિયમાભિષેકમાસેદતુર્નૃત્તસભાં પુરારેઃ ॥ ૩૭॥

અન્તર્હિતબ્રહ્મકપાલજાલમાબદ્ધ્ય દૃશ્યેન્દુકલં કપર્દમ્ ।
આમુક્તવૈયાકરણાઙ્ગદાઙ્ઘ્રિરવાતરત્ તત્ર તદા નટેશઃ ॥ ૩૮॥

મુરં પુરા યઃ સ્વયમાજઘાન સ એવ દેવો મુરજં તદાનીમ્ ।
સસર્જ યસ્તાલમસેવનીયં સ એવ તાલં જગૃહે તુ વેધાઃ ॥ ૩૯॥

પ્રાગેવ યઃ પાણ્ડ્યસુતોપલમ્ભાન્નાથઃ સ્થિતો નર્ત્તિતુકામ એવ ।
ભક્તાનુકમ્પામપદિશ્ય તસ્ય નૃત્તં તદાવર્ત્તત નિર્વિશઙ્કમ્ ॥ ૪૦॥

આતોદ્યગીતાનુગપાદતાલમાવિર્ભવદ્ભાવરસોત્તરઙ્ગમ્ ।
આવર્ત્તવેગત્રુટિતાઙ્ગહારમનૃત્યદીશો લલિતાઙ્ગહારમ્ ॥ ૪૧॥

ઉદાઞ્ચિતોઽઙ્ઘ્રિશ્ચિરમુલ્લલાસ નૃત્તે સ્થિતાવર્ત્તકનામ્નિ શમ્ભોઃ ।
ચિત્તે વિલીને જતુવન્મુનીનાં ન્યાસાદિવ સ્પન્દયિતું ન શક્યઃ ॥ ૪૨॥

વૃત્તૌ ચકારેવ વિલમ્બિતાયાં મઞ્જીરનાદૈઃ પ્રણવોપદેશમ્ ।
તસ્યાં દ્રુતાયાં સ તદૂર્ધ્વલગ્નાં તુર્યામુપાદિક્ષદિવાર્ધમાત્રામ્ ॥ ૪૩॥

સ્વભાવરમ્યાણિ યથા યથાસન્ સ્વાચ્છન્દ્યતસ્તસ્ય વિચેષ્ટિતાનિ ।
તથા તથા પપ્રથિરે જગત્યાં શૈલૂષતન્ત્રોપનિષદ્પ્રભેદાઃ ॥ ૪૪॥

તાલાન્તનૃત્તારભટીષુ તસ્ય નિર્ગચ્છતાં નિશ્વસિતાગમાનામ્ ।
આદૌ મહાવ્યાહૃતિતામવાપુર્ભૂષાભુજઙ્ગેશ્વરફૂત્કૃતાનિ ॥ ૪૫॥

ઉદ્ભિન્નરોમાઞ્ચમુદશ્રુપૂરમાશ્ચર્યસમ્મૂઢમનન્યવૃત્તિ ।

આલેખ્યવિન્યસ્તમિવાસ્ત વિશ્વમાનન્દનૃત્તાવસરે પુરારેઃ ॥ ૪૬॥

સંવ્યાનસમ્મૃષ્ટમુખં ભવાન્યા વિનસ્તચન્દ્રાર્ધવિલોભનીયમ્ ।
નૃત્તાન્તરમ્યં વપુરિન્દુમૌલેર્નિધ્યાય તૌ તુષ્ટુવતુર્મુનીન્દ્રૌ ॥ ૪૭॥

નમ્રેષુ ચિત્તાન્નવનીતવૃત્તેર્નાથ! ત્વદીયાદપિ કોમલૌ યૌ ।
અસ્મત્કૃતે તૌ ચરણૌ યદિત્થમાયાસિતૌ તત્ પ્રથમં ક્ષમેથાઃ ॥ ૪૮॥

ત્વયીશ ! નૃત્તાદ્વિરતેઽપિ ચિત્તં ત્વદાસ્પદં નૌ પરમાદ્ભુતેન ।
નાદ્યાપિ નૃત્તાદ્વિરતિં પ્રયાતિ તતો નં કિઞ્ચિત્ પ્રતિભા ભજાવઃ ॥ ૪૯॥

આવાં પ્રસાદેન કૃતાર્થિતૌ તે યાચાવહે લોકહિતાય કિઞ્ચિત્ ।
નૃત્તોત્સવઃ કાઞ્ચનસંસદીવ નિત્યોઽસ્ત્વમુષ્યામપિ સંસદીતિ ॥ ૫૦॥

તથેતિ દત્વાભિમતં તયોસ્તત્ પ્રસેદિવાન્ લોકહિતાર્થનેન ।
દેવોઽનુજગ્રાહ પુનઃ સ્વયં તો દત્વા શિવજ્ઞાનમનન્યલભ્યમ્ ॥ ૫૧॥

સેવાવસાને પુરશાસનમ્ય સમાગતાન્ ભૃમિસુરાન્ સુરાંશ્ચ ।
હૈમેષુ પીઠેષુ વિતર્ણિપાદ્યાનમ્થાપયત્ કુમ્ભભવોઽથ ભોક્તુમ્ ॥ ૫૨॥

તે ભાવિતાશ્ચન્દનચર્ચિકાભિઃ કર્પૂરકાશ્મીરકરમ્વિતાભિઃ ।
અભ્યર્ચિતા દક્ષિણયા ચ માલ્યૈરભુઞ્જતાન્નાનિ રસોત્તરાણિ ॥ ૫૩॥

શાકૌદનવ્યઞ્જનસૂપયૂ ષૈરસાયનક્વાથરસપ્રભેદૈઃ ।
ભક્ષ્યૈરસઙ્ખ્યૈર્ઘૃતશર્કરાઢ્યૈઃ ફલૈર્વિચિત્રૈરપિ તૃપ્તિમાપુઃ ॥ ૫૪॥

તે ભક્ષ્યભોજ્યૈઃ ખલચૂર્ણલેહ્યાનિર્યૂહપાનીયગણૈશ્ચ ચિત્રૈઃ ।
વિસ્માપિતાઃ સ્વાં વિધિવઞ્ચિતેતિ જાતિં નિનિન્દુઃ શતશઃ સુધાશાઃ ॥ ૫૫॥

આપૃચ્છમાના વિબુધા મનુષ્યાનામ્વાદભઙ્ગીમભિધાં રસં ચ ।
અત્યાદરાદભ્યવજહ્રુરિસ્થમાશ્ચર્યમગ્ના ઇવ તાન્ પદાર્થાન્ ॥ ૫૬॥

આકર્ણ્ય ગર્હામમૃતાશનત્વે તપઃફલે તત્ર સુરૈઃ પ્રયુક્તામ્ ।
વાતામ્બુપર્ણાશનવૃત્તયોઽપિ વાચંયમાઃ સ્વાનિ જહુર્વ્રતાનિ ॥ ૫૭॥

અનેકવક્ત્રોદરપાણિચિહ્નાનાલક્ષ્ય ભૃતેશગણાનસઙ્ખ્યાન્ ।
તદ્વિક્રિયાયૈ સ્પૃહયામ્બભૂવુસ્તત્ર પ્રજાઃ પ્રત્યવસાનસક્તાઃ ॥ ૫૮॥

ઇત્યં જગત્ તર્પિતમિન્દુમૌલિર્નિશમ્ય નિર્વર્તિતનિત્યકર્મા ।
વધ્વા સમં ભોજનવેદિકાયામુપાવિશન્મઙ્ગલતૂર્યઘોષૈઃ ॥ ૫૯॥

વાણીવિરિઞ્ચૌ કમલામુકુન્દૌ શચીમહેન્દ્રૌ ચ નિષેદુરગ્રે ।
હેરમ્બષાણ્માતુરનન્દિનસ્તુ પાર્શ્વે નિદેશેન શશાઙ્કમૌલેઃ ॥ ૬૦॥

અથાન્નપૂર્ણાપરિવિષ્યમાણમન્નં શુચિ સ્વાદુ બહુપ્રકારમ્ ।
આમોદયન્ નર્મભિરન્તિકસ્થાનભુઙ્ક્ત વધ્વા સહ ચન્દ્રચૂડઃ ॥ ૬૧॥

સ ભુક્તશેષં કવલં પ્રિયાયૈ સમન્ત્રમેકં પ્રથમં દદૌ યત્ ।
હેતુસ્તદાસીદિવ ભાવિનીનાં તદ્ભુક્તશેષગ્રહસન્તતીનામ્ ॥ ૬૨॥

પક્વં ફલં માન્મથમેતદદ્ય જામાતુરેવાર્હમિતિ બ્રુવાણમ્ ।
સત્યં પ્રસાદેન તુ માધવસ્ય તલ્લબ્ધમિત્યાહ હસન્ સ શૌરિમ્ ॥ ૬૩॥

પત્યુઃ પ્રિયં બિમ્બફલં વિનૈવ ફલાન્યસઙ્ખ્યાનિ મુધાહૃતાનિ ।
અતઃ પિપાસા વિરતાસ્ય નેતિ વાણી વધૂમાક્ષિપતિ સ્મ રાજ્ઞીમ્ ॥ ૬૪॥

ભોજ્યાનિ યાનિ ત્રિદિવેઽદ્ભુતાનિ તાન્યાદદાનઃ સ્વયમીષદીષત્ ।
સાસૂયયોરાત્મજયોર્મહેશઃ શૈલાદયે તત્ર દૈયામ્બભૂવ ॥ ૬૫॥

ભુક્તોત્થિતો નમકથાભિરિત્થં વિસૃજ્ય વિશ્રાન્તિકૃતે વયસ્યાન્ ।
સજ્જીકૃતં પ્રાપ તટાતકાયાઃ શય્યાગૃહં સુન્દરપાણ્ડ્યદેવઃ ॥ ૬૬॥

તતો જનાઃ પાકગૃહે નિયુક્તાસ્તત્રાન્નરાશીન્ શતશોઽવશિષ્ટાન્ ।
આવેદયામાસુરનુક્રમેણ દેવ્યાઃ પુરઃ કાઞ્ચનમાલિકાયાઃ ॥ ૬૭॥

કોટ્યસ્ત્રયસ્ત્રિંશદિતિ પ્રતીતા સઙ્ખ્યા ત્વિયં કાચન દેવતાનામ્ ।
સઙ્ખ્યા ગણાનામપિ માનવાનાં સઙ્ખ્યાયતે ભુક્તવતાં ન કૈશ્ચિત્ ॥ ૬૮॥

શાકેષુ સૂપેષુ ફલેષ્વપૂપેષ્વન્નેષુ માધ્વીગુડશર્કરાસુ ।
શિષ્ટાનિ શક્ત્યા પ્રવક્તું શાધિ ત્વમેષામુપયોગયોગમ્ ॥ ૬૯॥

ઇતીરિતં કાઞ્ચનમાલિકા તચ્ચેટીભિરાસૂચયદાત્મજાયાઃ ।
સા ચ પ્રિયં કિં ક્રિયતામિહેતિ મન્દાક્ષમન્દાક્ષરમન્વયુઙ્ક્ત ॥ ૭૦॥

તામાહ દેવસ્ત્વમસીહ રાજ્ઞી દવી ત્રયાણામપિ વિષ્ટપાનામ્ ।
તત્તાવકીમન્નસમૃદ્ધિમેતાં ભોક્તું જનાઃ કે મમ સમ્ભવેયુઃ ॥ ૭૧॥

કુણ્ડોદરો નામ ગણોઽયમેકસ્તથાપિ શિષ્ટઃ પરિચર્યયા મે ।
ભોક્તું ન યસ્યાવસરઃ પુરાભૂત્ તં ભોજય સ્વોદરપૂરમેનમ્ ॥ ૭૨॥

ઇત્યાદિશન્નન્નસમૃદ્ધિગર્વમપાચિકીર્ષુઃ સ નૃપાલપન્ત્યાઃ ।
દેવો ગણસ્ય ત્રિજગચ્છરીરવૈશ્વાનરાત્મા જઠરં વિવેશ ॥ ૭૩॥

પૌરોગવાસ્તત્ર તયા નિયુક્તાઃ પ્રવેશ્ય તં ભોજનમણ્ડપાન્તઃ ।
વિસ્તાર્ય પત્રાણિ વિશઙ્કટાનિ ભક્ષ્યાણિ ભોજ્યાનિ તતોઽભ્યવર્ષન્ ॥ ૭૪॥

પ્રાણાહુતેઃ પર્યુપયુક્તમન્નમપ્યત્ર દૃષ્ટ્યોપલભે ન યાવત્ ।
તાવત્ કથં ભોક્તુમુપક્રમેયેત્યૂચે સ ભુઙ્ક્ષ્વેતિ વદત્સુ રોષાત્ ॥ ૭૫॥

સા પાણ્ડ્યદેવી સુમતિશ્ચ તત્ર સમેત્ય વિસ્મેરવિલોચનાન્તૌ ।
આપૂપિકૈરાન્ધસિકૈશ્ચ ભૂયોઽપ્યદાપયેતાં મુહુરન્નરાશીન્ ॥ ૭૬॥

પાત્રાધિકં પ્રેક્ષ્ય સ ભક્તરાશિં વ્યામિશ્રિતં વ્યઞ્જનશાકભેદૈઃ ।
પ્રાણાહુતિં પ્રાથમિકીં કથઞ્ચિન્નિર્વર્ત્ય તસ્થૌ નિભૃતં ક્ષુધાર્ત્તઃ ॥ ૭૭॥

સમ્ભ્રમ્ય દાસ્યોઽથ નૃપાલપત્ન્યાઃ સમ્ભૂય સમ્ભૂય યથોપલબ્ધમ્ ।
ભક્ષ્યાણિ ભોજ્યાન્યદુરક્રમેણ પક્વાન્યપક્વાન્યપિ ધાવમાનાઃ ॥ ૭૮॥

પ્રાણાહુતીઃ પઞ્ચ તતઃ કથઞ્ચિત્ પ્રસાધ્ય ખિન્નઃ ક્ષુધયા મહત્યા ।
સ તાવતીનાં પરિવેષિણીનાં ન ચક્ષમે તત્ર ગણો વિલમ્બમ્ ॥ ૭૯॥

અથાન્નકૂટૈરભિતોઽપ્યસઙ્ખ્યૈરપૂપશૈલૈશ્ચ નિરન્તરાલમ્ ।
મહાનસં સ સ્વયમાવિવેશ મહાહ્રદં મત્ત ઇવ દ્વિપેન્દ્રઃ ॥ ૮૦॥

તત્રાન્નકૂટાન્ સહ ભક્ષ્યવર્ગૈરાલોડયન્ દૃષ્ટિપથં પ્રવિષ્ટાન્ ।
ષષ્ટ્યા નવત્યા ચ શતેન ચૈષાં સ એકમેકં કબલં ચકાર ॥ ૮૧॥

અન્નોઞ્ચયાનાસ્તરણૈઃ સહૈવ દુગ્ધાનિ ભાણ્ડૈર્દૃતિભિર્ઘૃતાનિ ।
સ્વીકુર્વતોઽસ્માચ્ચકિતાઃ સમન્તાત્ પ્રદુદ્રુવુઃ પાકગૃહે નિયુક્તાઃ ॥ ૮૨॥

સુરદ્રુમાઃ સ્વર્ગગવી ચ તત્ર સમ્પ્રાર્થ્યમાના નરપાલપત્ન્યા ।
યાન્ યાનસઙ્ખ્યાનસૃજન પદાર્થાસ્તે તેઽભવન્નસ્ય કિલોપદંશાઃ ॥ ૮૩॥

ગોધૂમમાષાઢકમુદ્ગશાલિશ્યામાકનીવારતિલાદિમાનિ ।
ધાન્યાનિ ચાન્યાનિ સ ચર્વતિ સ્મ કુડ્યૈઃ કુસૂલૈર્મણિકૈશ્ચ કુમ્ભૈઃ ॥ ૮૪॥

સમ્ભ્રાન્તચેટીશતઘુષ્યમાણતચ્ચેષ્ટિતાકર્ણનજાતલજ્જામ્ ।
અભિદ્રવન્તીં સ્વયમેવ દેવીમપાઙ્ગયન્ સસ્મિતમાસ્ત દેવઃ ॥ ૮૫॥

અથ ક્ષણાદક્ષયમન્નગર્તં સસર્જ તસ્મૈ શફરેક્ષણા યમ્ ।
તમપ્યસૌ સ્થણ્ડિલમાત્રશેષં ચક્રે મહદ્ભિઃ કવલૈશ્ચતુર્ભિઃ ॥ ૮૬॥

અપૂર્ણમન્નૈરુદરં મમેદમાપૂરયિષ્યે સલિલેન વેતિ ।

કુણ્ડોદરે યાચતિ પાણ્ડ્યકન્યા સસ્માર ગઙ્ગાં તરલોર્મિસઙ્ઘામ્ ॥ ૮૭॥

અથાસિન્ધુર્મલયાદ્રિશ‍ૃઙ્ગાદાવિર્ભવન્તી વિપુલૈસ્તરઙ્ગૈઃ ।
આપ્લાવયન્તીવ ભુવં સમસ્તામભ્યર્ણમાગાન્મધુરાનગર્યાઃ ॥ ૮૮॥

સ પાણિના વક્રનિવેશિતેન તથા પપૌ તામપિ દિવ્યસિન્ધુમ્ ।
કૌતૂહલાત્ પ્રેરયતસ્તમાસીદ્ ગઙ્ગાધરસ્યાપિ યથાનુતાપઃ ॥ ૮૯॥

સ્વીકુર્વતસ્તાં સિકતાવશેષાં સૃક્કદ્વયીમાલિહતશ્ચ ભૂયઃ ।
સા તસ્ય તાં ગ્લાનિમવેક્ષમાણા ગૌરી સલજ્જા ગિરિશં બભાષે ॥ ૯૦॥

અજાનતી યદ્ ભવતઃ પ્રભાવમન્નોચ્ચયોચ્છેષમવાદિષં પ્રાક્ ।
તન્મર્ષયન્ માનદ! તર્પમેનં કુણ્ડોદરસ્યાસ્ય નિવારયેતિ ॥ ૯૧॥

વ્યાજેન કેનાપિ ગિરં ત્વદીયાં શુશ્રૂષમાણો યદકાર્ષમિત્થમ્ ।
તત્ સંહૃતં દેવિ! તવ પ્રભાવાદશ્રાન્તપૂરાસ્તુ વિયન્નદીયમ્ ॥ ૯૨॥

વેગાગતા વેગવતીતિ નામ્ના ખ્યાતા નદીયં ભવિતા ભુવીતિ ।
પ્રસાદયન્ પાણ્ડ્યસુતાં મૃદૂક્ત્યા રેમે તયા સુન્દરપાણ્ડ્યદેવઃ ॥ ૯૩॥

અથાપરેદ્યુસ્ત્રિદશૈઃ સમસ્તૈરગસ્ત્યમુખ્યૈઃ પરમર્ષિભિશ્ચ ।
પાણ્ડ્યાધિરાજ્યે કલિતાભિષેકઃ શશાસ પૃથ્વીં સ તયા મહિષ્યા ॥ ૯૪॥

ઇત્થં સ પાણ્ડ્યતનયાચરણાવલમ્બસૌભાગ્યસમ્પદુપપન્નસમસ્તરાજ્યઃ ।
દેવાન્ વિસૃજ્ય નિખિલાનુચિતોપચારૈર્દેવઃ સસાગરવનાં બુભુજે ધરિત્રીમ્ ॥ ૯૫॥

ઇતિ મહાકવિશ્રીનીલકણ્ઠદીક્ષિતપ્રણીતે શિવલાલાર્ણવ દ્વાદશઃ સર્ગઃ ।

## અથ ત્રયોદશઃ સર્ગઃ ।

સમ્પ્રાપ્યેત્થં પાણ્ડ્યરાજ્યાભિષેકં સાધં દેવ્યા સુન્દરઃ પાણ્ડ્યદેવઃ ।
આસીમાદ્રેર્નિહૃતારાતિશલ્યાં પૃથ્વીં રેમે બિભ્રદેકાતપત્રામ્ ॥ ૧॥

સાબ્ધિદ્વીપા સાટવીદુર્ગશૈલા સર્વાપ્યુર્વી યત્તુલાકોટિમૂર્ધ્નિ ।
લગ્ના દૃષ્ટા રત્નવદ્ બાહુના તાં તસ્યેદાનીં બિભ્રતઃ કઃ પ્રયાસઃ ॥ ૨॥

યા ભૂયોભિઃ પાણ્ડરૈરાતપત્રૈઃ સચ્છન્ના ભૂરાપ સન્તાપમન્તઃ ।
સૈવાહૃષ્યચ્છાદ્યમાના તદાનીમેકચ્છત્રચ્છાયયા તસ્ય રાજ્ઞઃ ॥ ૩॥

નાયષ્ટારો નાકૃતબ્રહ્મવિદ્યા નાદાતારો નાપ્યધર્મે પ્રસક્તાઃ ।
વિપ્રાઃ કિન્તુ ત્યક્તપાણ્ડિત્યયોગાઃ સ્થાતું બાલ્યે તસ્ય રાષ્ટ્રે ચકાઙ્ક્ષુઃ ॥ ૪॥

ચાતુર્વર્ણ્યં ચાતુરાશ્રમ્યરમ્યં ચાતુર્વૈદ્યં તચ્ચતુર્વર્ગયોગમ્ ।
દૃષ્ટ્વા તેન સ્થાપિતં નિર્વિશઙ્કં તસ્થૌ ધર્મસ્તત્ર પાદૈશ્ચતુર્ભિઃ ॥ ૫॥

ગાવો ધાન્યં ભૂષણાન્યમ્બરાણિ સ્વર્ણં રૂપ્યં યાનિ ચૈવંવિધાનિ ।
સ્વામિન્યાદૌ વિપ્રલબ્ધે તદીયં સર્વં જજ્ઞે વિપ્રલબ્ધં તદાનીમ્ ॥ ૬॥

કૈલાસાદ્રિં શાસતઃ કલ્પકોટીઃ પૂર્ણઃ કોશો યસ્ય ભિક્ષાકપાલૈઃ ।
પ્રાપ્તેનેત્થં પાણ્ડ્યરાજ્યાધિપત્યં લબ્ધા સદ્યસ્તેન લક્ષ્મીરપારા ॥ ૭॥

શૈવાઃ શાક્તા વૈષ્ણવાઃ સાઙ્ખ્યનિષ્ઠા યોગાચાર્યા બ્રહ્મવિદ્યાવિદોઽપિ ।
ગત્વા ગત્વા તં યથૈકં પ્રપન્નાસ્તદ્વત્ તાસ્તાઃ કીર્તયોઽપિ ત્રિલોક્યામ્ ॥ ૮॥

યેઽસ્મિન્નગ્રાસ્તેજસા તં પ્રપન્ના યે તુ દ્વિષ્ટાસ્તે હતાઃ સઙ્ગરેષુ ।
ભિત્ત્વા ભાનોર્બિમ્બમૂર્ધ્વં પતન્તઃ પર્યાવૃત્ય પ્રાપુરન્તે તમેવ ॥ ૯॥

વક્રામ્ભોજાન્નિસ્સૃતં વાક્યમાનં પશ્યન્ દેવો વેદવાદાયમાનમ્ ।
સઙ્ખ્યાધિક્યાદ્વેદશાખાસુ ભીતઃ સ્તોકસ્તોકં વ્યાજહારાપ્રમત્તઃ ॥ ૧૦॥

સીમન્યમ્ભોવિપ્લવે સેતુબન્ધે ગોસઞ્ચારે સાર્થસમ્મેલને વા ।
યા મીનાક્ષ્યા સ્થાપિતા પ્રાક્ પ્રજાનાં તાં મર્યાદાં સ પ્રમાણીચકાર ॥ ૧૧॥

કોશાન્ પઞ્ચૈવાહુરન્નાદિરૂપાન્ યસ્યાશેષં શાસતોઽમું પ્રપઞ્ચમ્ ।
સઙ્ખ્યાતીતા હેમરત્નાદિરૂપાસ્તસ્યેદાનીં તેઽભવન્ પાણ્ડ્યભર્તુઃ ॥ ૧૨॥

પાણ્ડ્યાધ્યક્ષઃ પાણ્ડ્યજામાતૃદેવઃ પ્રેયાન્ રાજ્ઞ્યાઃ પાલકો દ્રામિડાનામ્ ।
ઇત્યાખ્યાભિઃ પ્રીતિરસ્યાધિકાસીદાત્મબ્રહ્મજ્યોતિરાદિશ્રુતિભ્યઃ ॥ ૧૩॥

યા મીનાક્ષ્યાસ્તાવતી રાજ્ય શક્તિઃ સા સઙ્ક્રાન્તા તત્ર ભૂયશ્ચકાશે ।
પ્રાપ્તોત્કર્ષા સાનુનિ સ્ફાટિકાદ્રેઃ પત્યુર્ભાસાં ભાસ્વરેવાંશુરેખા ॥ ૧૪॥

સ્વે સ્વે ધર્મે સ્થાપિતાઃ સર્વ એવ ક્ષ્માપાલત્વં બિભ્રતા તેન લોકાઃ ।
કાલસ્ત્વેકશ્ચ્યાવિતઃ સ્વાધિકારાદ્ ધર્મૈકાન્ત્યં તન્વતા માનવેષુ ॥ ૧૫॥

ઇત્થં રાજ્યં બિભ્રતા તેન રાજ્ઞા દેવી જાતુ સ્ફારચિન્તાનિમગ્ના ।
ભૂયો ભૂયો હેતુમત્રાનુયુક્તા પ્રાહ સ્મેદં પ્રાણનાથં મૃગાક્ષી ॥ ૧૬॥

સઞ્ચિન્વાના તાવકીનાત્ પ્રસાદાદ્ ધર્મં તં તં નાથ! માતા મદીયા ।
જાતૌત્સુક્યા તીર્થયાત્રાવિધાને સ્નાતું સિન્ધૌ શ્વઃ પ્રતિષ્ઠાસતે સા ॥ ૧૭॥

ઇત્યાકર્ણ્ય પ્રેયસીખેદમૂલં તત્રાનેષ્યન્ સાગરાન્ સપ્ત દેવઃ ।

સસ્મારાગ્રે સદ્ય એવાસ્ય તેઽપિ પ્રાદુર્ભૂતા મૂર્તિમન્તઃ પ્રણેમુઃ ॥ ૧૮॥

પ્રાચિ સ્થાને સોમસૌન્દર્યનેતુઃ પ્રાગેવાસ્તે કશ્ચિદેકસ્તટાકઃ ।
સર્વે તસ્મિન્ સન્નિધત્તેતિ દેવો નામાદેશં સાગરાનાદિદેશ ॥ ૧૯॥

પશ્યન્તીનામગ્રતસ્તે પ્રજાનાં ત્યક્ત્વા રૂપં પૌરુષં સિન્ધુરાજાઃ ।
દૃશ્યન્તે સ્મ વ્યામ્નિ દૂરે તરઙ્ગૈરાજિઘ્રન્તો દિક્તટાનુત્તરઙ્ગૈઃ ॥ ૨૦॥

સ્વં સ્વં રૂપં સઙ્ક્ષિપન્તોઽપિ તે તે કાસારાન્તસ્સમ્ભવાહ સમુદ્રાઃ ।
આલક્ષ્યન્ત સ્પષ્ટમત્યદ્ભુતાભિર્વલ્ગન્તીભિઃ પઙ્ક્તિભિર્વીચિકાનામ્ ॥ ૨૧॥

આક્રામદ્ભિર્યોમકક્ષ્યામકાણ્ડે સ્રોતોભિસ્તૈઃ સ્વીકૃતાઃ સાગરાણામ્ ।
જગ્મુર્મેઘાસ્તત્ર શૈવાલભાવં વિદ્યુલ્લેખા વિદ્રુમત્વં ચ તેષામ્ ॥ ૨૨॥

આસપ્તર્ષિસ્થાનમાક્રાન્તિહેતોઃ સંવર્તેષુ દ્યામિવ દ્રષ્ટુકામૈઃ ।
આરૂઢે વ્યોમ્ન્યર્ણવૈરભ્રસિન્ધોઃ સવ્યં ચક્ષુઃ શશ્વદસ્પન્દતોચ્ચૈઃ ॥ ૨૩॥

ભાગીરથ્યા જાતુ લેભેઽભિષેકં પર્યાપ્તં યઃ પ્રાગ્યુગે વ્યોમકેશઃ ।
દ્રવ્યૈસ્તૈસ્તૈર્દુગ્ધદધ્યાજ્યમુખ્યૈર્દ્વૈતીયીકઃ સોઽસ્ય જજ્ઞેઽભિષેકઃ ॥ ૨૪॥

પશ્યત્યગ્રે પાણ્ડ્યદેવે તતસ્તે પારાવારાઃ પલ્વલે તત્ર પેતુઃ ।
પાર્શ્વસ્થાસ્નોરૃત્વિજઃ કુમ્ભયોનેઃ પ્રાયસ્તાલુન્યાર્દ્રતામાવહન્તઃ ॥ ૨૫॥

ક્ષીરં સર્પિર્વારુણીમિક્ષુસારં દધ્યપ્યભ્રે દુર્લભં પાતુકામાઃ ।
વિષ્વગ્ દેવાઃ સમ્પતન્તો વિમાનૈઃ સ્રોતસ્યેષાં કીટમજ્જં મમજ્જુઃ ॥ ૨૬॥

ક્ષારં વારિ ક્ષીરમુખ્યાનિ વસ્તૂન્યેકં સર્વાણ્યેકદૈવાજધાન ।
મૌઢ્યં હ્યેકં હન્તિ રાશિં ગુણાનાં શૌર્યૌદાર્યસ્થૈર્યગામ્ભીર્યમુખ્યમ્ ॥ ૨૭॥

શબ્દસ્પર્શૌ રૂપગન્ધૌ રસશ્ચ પ્રાપ્તાસ્તીર્થે ચિત્રતાં તત્ર સદ્યઃ ।
આસ્તામેતન્મજ્જતામત્ર નૃણાં સ્વર્ગેઽપ્યાસીચ્ચિત્રતા યદ્વિચિત્રા ॥ ૨૮॥

સર્વે ગન્ધા યત્ર સર્વે રસાશ્ચ પ્રાદુર્ભૂતાસ્તીર્થરાજે હિ તસ્મિન્ ।
સ્નાનાલ્લભ્યે તાદૃશિ બ્રહ્મભાવે ન્યાયજ્ઞાનાં નાગમાઃ પર્યુપાસ્યાઃ ॥ ૨૯॥

નીરક્ષીરે દ્વે વિવેક્તું પ્રગલ્ભા હંસાસ્તસ્મિન્ સર્વસઙ્ઘાતરૂપે ।
ભગ્નોત્સાહા મત્સ્યમણ્ડૂકકૂર્મૈઃ પ્રાપ્તાઃ સામ્યં ન પ્રચેલુર્વિલજ્જાઃ ॥ ૩૦॥

પત્યા સાર્ધં યોપિતોઽધિક્રિયન્તે તીર્થે સ્નાતું પુત્રવત્યોઽથવેતિ ।
શ્રુત્વા શાસ્ત્રં ચિન્તયા દૂયમાનાં શ્વશ્રૂમન્તસ્તત્ર શુશ્રાવ દેવઃ ॥ ૩૧॥

આવર્તાર્હં સ્થાનમુલ્લઙ્ઘ્ય સર્વં સમ્પ્રાપ્તસ્તચ્છાશ્વતં ધામ શમ્ભોઃ ।
પ્રત્યાનેયો વલ્લભોઽસ્યાઃ કથં વેત્યન્તશ્ચિન્તામાપ દેવસ્તતોઽપિ ॥ ૩૨॥

પત્યુશ્છાયાં પાણ્ડ્યદેવ્યાઃ સ કામપ્યાનીયાગ્રે દર્શયન્ પ્રેયસી સ્વામ્ ।
તદ્વૃત્તાન્તસ્મેરદૃષ્ટ્યાનયા તાં વૃત્તાન્તં તં વેદયામાસ દેવઃ ॥ ૩૩॥

સા સંહૃષ્ટા તાં નિશમ્ય પ્રવૃત્તિં પશ્યન્તી ચ પ્રાણનાથં વિમાને ।
આલિઙ્ગન્તી નિભરં મીનનેત્રાં ભૂયો ભૂયો મૂર્ધ્નિ ચૈનામજિઘ્રત્ ॥ ૩૪॥

ત્વન્માતૃત્વાત્ સિદ્ધમેવાપવર્ગં મન્વાનાહં તેન હૃષ્ટા ન તાવત્ ।
યાવત્ તાતં વીક્ષમાણા તવેતિ સ્તાવંસ્તાવં સા બભાષ કુમારીમ્ ॥ ૩૫॥

લબ્ધ્વા યોગં લજ્જમાના વિમાનાદાપ્લુત્યારાદાગતેન પ્રિયેણ ।
દત્તાનુજ્ઞા દેવપાણ્ડ્યેન દેવી સસ્નૌ તીર્થે સપ્તરત્નાકરે સા ॥ ૩૬॥

દીનં રૂપં પ્રેયસા વિપ્રયોગાદ્ દેવ્યાઃ સ્નાન્ત્યાસ્તત્ર દૃષ્ટં જનૈર્યત્ ।
ઉન્મજ્જન્ત્યાસ્તત્ તતઃ પર્યણંસીચ્ચન્દ્રાપીડં ચારુહાસં ત્રિણેત્રમ્ ॥ ૩૭॥

સા ગચ્છન્તી શાશ્વતં ધામ શમ્ભોઃ સાર્ધં પત્યા સર્વસૌભાગ્યધામ ।
ક્લેશં કન્યાવિપ્રયોગપ્રસક્તં કિઞ્ચિઞ્ચિતે ધારયન્તીદમૂચે ॥ ૩૮॥

અદ્ય જ્ઞાતં બ્રહ્મ પૂર્ણં યુવામિત્યદ્યોત્સન્નઃ પાશવર્ગોઽખિલો મે ।
દૂયેઽથાપિ ત્વર્ધવિચ્છિન્નમાસીત્ ત્વત્સૌભાગ્યાલોકભાગ્યં કિલેતિ ॥ ૩૯॥

શુશ્રૂષસ્વ પ્રેયસઃ પાદપદ્મં ક્ષાન્ત્યા ધૃત્યા પ્રેમવત્યા ચ ભક્ત્યા ।
લબ્ધ્વા પુત્રં રાજ્યભારેઽભિષિચ્ય દ્રષ્ટાસ્મિ ત્વાં સ્વં પદં પ્રત્યુપેતામ્ ॥ ૪૦॥

ઇત્યાદિશ્ય પ્રસ્થિતાયાં જનન્યાં સર્વોત્તીર્ણં શાઙ્કરં ધામ દિવ્યમ્ ।
આનન્દોત્થૈઃ શોકજૈશ્ચાશ્રુપૂરૈર્વક્ત્રં દેવ્યા દૂષિતં ભૂષિતં ચ ॥ ૪૧॥

તાભિસ્તાભિસ્તત્પ્રસઙ્ગોચિતાભિર્માર્જન્ વાગ્ભિર્માનસં ક્લેશમસ્યાઃ ।
વારિક્રીડાં વારિજાક્ષ્યાનયાસાવાનન્દાબ્ધાવાચચાર પ્રવીરઃ ॥ ૪૨॥

દીનાન્ દાનૈર્દેવતા યજ્ઞભાગૈરાર્તાનાર્તિચ્છેદનૈસ્તત્તદર્હૈઃ ।
જિજ્ઞાસૂનપ્યાત્મવિજ્ઞાનદાનૈર્દેવો રક્ષન્ પાલયામાસ પૃથ્વીમ્ ॥ ૪૩॥

અન્તર્વત્નીં જાતુ કાલેન પત્નીં દર્શં દર્શં પિપ્રિયે દેવપાણ્ડ્યઃ ।
કેકીવામ્ભસ્સમ્ભૃતાં મેઘમાલાં માધ્વીગર્ભાં પદ્મિનીમપ્યળીવ ॥ ૪૪॥

યત્ કાતર્યં યૌવનેનાક્ષ્ણિ દત્તં યચ્ચાનીતં દૌહૃદેનાથ તસ્યાઃ ।
પ્રાગલ્ભ્યાય પ્રાભવત્ સર્વમેતત્ તત્સમ્ભૂતેરદ્ભુતં મીનકેતોઃ ॥ ૪૫॥

પુષ્ટાન્યઙ્ગાન્યાપુરસ્યાઃ કૃશત્વં નિત્યં કાર્શ્યં નિર્જહૌ મધ્યદેશઃ ।
પર્યાયેણ હ્રાસવૃદ્ધ્યોઃ પ્રવૃત્તિસ્તત્રાપ્યાસીદીદૃશઃ કાલભેદઃ ॥ ૪૬॥

અન્યોન્યેન સ્પર્ધમાનાવુરોજાવાસ્તામસ્યા યૌવનોપક્રમં યૌ
સ્પર્ધાં મુખ્યામદ્ય તાવન્વભૂતાં સઙ્ઘર્ષેણાન્યોન્યમાસાદિતેન ॥ ૪૭॥

શક્તિઃ ખ્યાતા યાવતી યા ચ તસ્યાઃ સર્વાપ્યેષાલમ્ભિ ગર્ભેણ નૂનમ્ ।
નો ચેદિત્થં સ્યાત્ કથઙ્કારમસ્યાઃ સ્નાતું પાતું સ્પન્દિતું ચાપ્યશક્તિઃ ॥ ૪૮॥

કેન્દ્રે ચન્દ્રે દેશિકે ચામરાણામૃક્ષે રૌદ્ર રૌદ્રવૃત્તિઃ પરેષુ ।
પ્રાદુર્ભૂતઃ પાણ્ડ્યવંશસ્ય ભૂત્યૈ તસ્યા ગર્ભાત્ તારકારિઃ કુમારઃ ॥ ૪૯॥

આનેષ્યન્તે યાનિ તેનાત્મજેન સ્વર્ણાન્યગ્રે મેરુમૂલાદમીષામ્ ।
ચક્રે દેવઃ કોશગેહેઽવકાશં ભૂદેવાનાં ભૂરિદાનચ્છલેન ॥ ૫૦॥

રાજ્ઞાં પશ્યન્ રાજ્યતન્ત્રસ્થિતાનાં બાલો દોષાન્ બાહુમુખ્યપ્રયુક્તાન્ ।
સાબ્ધિદ્વીપાં પાલયિષ્યન્ ધરિત્રીં ચક્રે દેવઃ ષણ્મુખોઽપ્યૈકમુખ્યમ્ ॥ ૫૧॥

ઉગ્રસ્યર્ક્ષે જાતમુગ્રં પ્રકૃત્યાપ્યુદ્વન્તારં તેજસા ચ શ્રિયા ચ ।
જાનન્ બાલં શાસનાત્ કુમ્ભયાનેશ્ચક્રે નામ્નાપ્યુગ્ર ઇત્યેવ દેવઃ ॥ ૫૨॥

મીમાંસાઙ્ગન્યાયધર્મેતિહાસૈઃ સાર્ધં વેદાઃ સ્વમ્વશાખાસમેતાઃ ।
પ્રાપ્તે કાલે પ્રત્યભુઃ પાણ્ડ્યસૂનોદ્ધારં કૃત્વા દેશિકસ્યોપદેશમ્ ॥ ૫૩॥

દૈતેયારિર્યેન ખડ્ગે વિનીતશ્ચાપે શિષ્યો જામદગ્ન્યો યદીયઃ ।
સાક્ષાદાસીન્મેરુધન્વા સ દેવઃ શસ્ત્રાસ્ત્રાણાં શાસિતા તસ્ય યૂનઃ ॥ ૫૪॥

કન્યા ખ્યાતા કાન્તિમત્યાખ્યયાસીદ્ ભાસ્વર્સેશ્યા સોમચૂડમ્ય રાજ્ઞઃ ।
પિત્રા દત્તાં તામુપાનીય દેવઃ પાણૌ તેન ગ્રાહયામાસ યૂના ॥ ૫૫॥

શક્તિર્દણ્ડશ્ચક્રમિત્યાયુધાનિ ત્રીણિ પ્રૌઢજ્વાલમાલાકુલાનિ ।
દત્વા તસ્મૈ દેવદેવોઽભ્યષિઞ્ચત્ પ્રહ્વીભૂતં પાણ્ડ્યરાજ્યે કુમારમ્ ॥ ૫૬॥

પ્રાગાસીદ્યો દેવસેનાપતિઃ સ પ્રાપદાનીં પાણ્ડ્યસેનાપતિત્વમ્ ।
દૈતેયઃ પ્રાક્ તારકો નિર્જિતોઽદ્ય ત્વજ્ઞાનાબ્ધેસ્તારકસ્તાત એવ ૫૭॥

પૃથ્વીં સર્વામર્પયિત્વા કુમારે પૃથ્વીં કીર્તિં કેવલં ગૃહ્ણતઃ સ્વામ્ ।
સાર્ધં દેવ્યા વત્સરાણાં સહસ્રાણ્યેવં ષષ્ટિઃ ષટ્ ચ તમ્ય વ્યતીયુઃ ॥ ૫૮॥

ઇત્થં પાલ્યા ભૂમિરિત્થં વિજેયા દૃપ્તા ઇત્થં વર્તિતવ્યં ત્વયેતિ ।

આદિશ્યોગ્રં દમ્પતી મૂલલિઙ્ગે મીનાક્ષ્યાં ચ પ્રાપતુસ્તૌ પ્રવેશમ્ ॥ ૫૯॥

તૌ મીનાક્ષીસુન્દરેશાત્મનાથચ્છન્નૌ કિઞ્ચિત્ પ્રત્યહં સેવમાનઃ ।
ચક્રે રાજ્યં નામયન્ રાજવંશ્યાનુગ્રમ્પશ્યૈઃ શાસનૈરુગ્રપાણ્ડ્યઃ ॥ ૬૦॥

ઈજે શમ્ભું યચ્છતેનાશ્વમેધૈર્યચ્ચાભુઙ્ક્ત સ્વર્ગભાગાન્ સ ભૂમૌ ।
તેનાસૂયાં તત્ર શક્રો બબન્ધ પ્રાયેણાયં પામરાણાં સ્વભાવઃ ॥ ૬૧॥

આક્રમ્યામ્ભસ્સમ્પ્લવૈ રાજધાનીમુન્મર્યાદૈરુગ્રપાણ્ડ્યમ્ય રાજ્ઞઃ ।
રાષ્ટ્રં ચાસ્ય સ્વીકુરુષ્વેતિ શક્રો નેદીયાંસં દક્ષિણાબ્ધિં ન્યયુક્ત ॥ ૬૨॥

અર્ધે રાત્રેરપ્રસક્તે કથઞ્ચિદ્ વર્ષે વાતે દુર્દિને વા ક્ષણેન ।
સન્નહ્યદ્ભિઃ સર્વતો વીચિસઙ્ઘૈઃ પારાવારઃ સ્વાત્ પદાદુચ્ચચાલ ॥ ૬૩॥

એકૈકોર્મિસ્પન્દમાત્રાદપિ ક્ષ્માં ક્રોશં ક્રોશદ્વન્દ્વમપ્યાવૃણાનઃ ।
ભીમૈર્ઘોષૈર્ભીષયન્નમ્બુરાશિર્ગ્રામં ગ્રામં મજ્જયન્ નિર્જગામ ॥ ૬૪॥

ઉચ્ચૈરુચ્ચૈરુત્પતન્તઃ પતન્તો ઘ્નન્તો જન્તૂન્ ગણ્ડશૈલાન્ ક્ષિપન્તઃ ।
આવૃણ્વાનાઃ સૈકતૈરદ્રિકૂટાનભ્યક્રામન્નૂર્મયો વારિરાશેઃ ॥ ૬૫॥

વલ્ગન્તોઽગ્રે દુર્ગ્રહા વીચિકાનાં જાતોત્સાહા જન્તવઃ સાગરીયાઃ ।
વ્યાદાયાસ્યં વ્યાઘ્રસિંહદ્વિપાદીન્ વન્યાન્ સત્ત્વાન્ લીલયૈવાગ્રહીષુઃ ॥ ૬૬॥

ઇત્થં પુર્યા યોજને યોજનાર્ધે યાવત્ સિન્ધુર્નાજિહીતે નિશીથે ।
તાવત્ સ્વપ્ને બોવિતસ્તાં પ્રવૃત્તિં સૂક્ત્યા શમ્ભોર્જાગરામાસ દેવઃ ॥ ૬૭॥

આરુહ્ય દ્રાગભ્રમાતઙ્ગકલ્પં ક્રુદ્ધો દેવઃ કુઞ્જરં કિઞ્ચિદુચ્ચૈઃ ।
પાણૌ કુર્વન્ શક્તિમીશેન દત્તાં પાણ્ડ્યઃ પારાવારમભ્યુજ્જગામ ॥ ૬૮॥

શૈલેનેવોત્સર્પતા કજ્જલાનાં વ્યોમ્નેવાધો ધાવતા સન્નિપત્ય ।
સોઽભૂત્ તેન સ્રોતસા વારિરાશેર્હૃષ્ટો દેવઃ સદ્ય એવાથ રુષ્ટઃ ॥ ૬૯॥

નાયં કાલઃ કૌતુકં કર્ત્તુમસ્મિન્ નશ્યત્સ્વેવં પ્રાણિપૂચ્ચાવચેષુ ।
ઇત્યાલોચ્ય પ્રજ્વલન્ પ્રજ્વલન્તીં પાણ્ડ્યઃ શક્તિં પાતયામાસ સિન્ધૌ ॥ ૭૦॥

શીત્કુર્વાણા સા વિશન્તી સમુદ્રે સર્વં પાથઃ સમ્ભ્રમત્કૂર્મનક્રમ્ ।
ઉચ્છાસેનૈકેન યાન્તી પિબન્તી જહ્રે ભૂમેઃ પ્રાક્તનં ચાર્દ્રભાવમ્ ॥ ૭૧॥

મર્યાદાબ્ધેર્મા વિલોપીતિ શક્તિં પ્રત્યાહૃત્ય પ્રજ્વલન્તીં સ। ભૂયઃ ।
તત્સંસિદ્ધાં તાવતીમપ્યદત્ત ક્ષોણીં દેવઃ સુન્દરેશાય સદ્યઃ ॥ ૭૨॥

આકૈલાસાદા ચ લઙ્કોપકણ્ઠાજ્જાતે દૈવાજ્જાત્વનાવૃષ્ટિયોગે ।
રાજ્ઞઃ સર્વાન્ મેલયન્ પર્યપૃચ્છદ્ રાજા પાણ્ડ્યઃ કુમ્ભયોનિં વિધેયમ્ ॥ ૭૩ ॥

તસ્યાદેશાદર્ચનાભિઃ પ્રણામૈસ્તે તે વૃષ્ટિં દેવરાજં યયાચુઃ ।
દૈન્યં ત્વેતન્મીનનેત્રાત્મજસ્ય સ્વાન્તે જાતુ સ્વાદુતાં નાબભાર ॥ ૭૪ ॥

અભ્યર્ણેઽસૌ જાતુચિચ્ચન્દનાદ્રેરાખેટાર્થં પર્યટન્ પાણ્ડ્યદેવઃ ।
સ્વચ્છાસીનાન્ પુષ્કલાવર્તકાદીન્ શ‍ૃઙ્ગોત્સઙ્ગે તસ્ય મેઘાનપશ્યત્ ॥ ૭૫ ॥

કઃ સુત્રામા કાત્ર યાચ્ઞા વરાકે વૃષ્ટિર્લભ્યા વિક્રમેણેતિ દેવઃ ।
મત્વા ભૃત્યૈર્ગ્રાહયન્નમ્બુવાહાન્ કારાગારે વાસયામાસ બદ્ધાન્ ॥ ૭૬ ॥

કેચિન્મેઘાસ્તત્ર ચોદ્યાનપાલૈઃ કેચિચ્છેકાન્ પાલયદ્ભિર્મયૂરાન્ ।
આકૃષ્યન્ત સ્વૈરમારક્ષકાણાં સૌહાર્દેન દ્વિસ્સકૃદ્ ગૂઢમહ્નામ્ ॥ ૭૭ ॥

નશ્યદ્ગર્જા લુપ્તબિદ્યુદ્વિલાસાઃ સંશુષ્યન્તઃ સાધ્વસેનામ્બુવાહાઃ ।
ધૂલીજાલૈર્ધૂસરા ધૂમશેષાસ્તત્રાવાત્સુઃ શાસનાત્ તસ્ય રાજ્ઞઃ ॥ ૭૮ ॥

આપાતાલાદા ચ સપ્તર્ષિલોકાદમ્ભોભિર્યે વિશ્વમાપ્લાવયન્તે ।
તાનમ્ભોદાંસ્તત્ર રુદ્ધાન્ નિશમ્ય ક્રુધ્યન્નિન્દ્રસ્તેન યોદ્ધું પ્રતસ્થે ॥ ૭૯ ॥

જ્યાનિર્ઘોષચ્છાદિતાશાવકાશં બાણાસારધ્વસ્તહસ્ત્યશ્વયોધમ્ ।
રક્તસ્રોતઃપાતરક્તં સમન્તાજ્જજ્ઞે યુદ્ધં તસ્ય ચાખણ્ડલસ્ય ॥ ૮૦ ॥

ચાપોન્મુક્તૈઃ સાયકૌઘૈર્મોઘૈર્વેધં વેધં વ્યોમયાનાદમર્ત્યાન્ ।
યૂથંયૂથં પાતયન્ કૌતુકેન શ્યૈનમ્પાતામાચચારેવ વીરઃ ॥ ૮૧ ॥

યેઽવાગૃહ્ણન્ ખેચરા વૃષ્ટિમુર્વ્યાં તેષામેવોજ્જાસયન્નઙ્ગમઙ્ગમ્ ।
મર્માવિદ્ભિર્માર્ગણૈરુગ્રપાણ્ડ્યશ્ચક્રે વૃષ્ટિં મજ્જમાંસાસ્રવિસ્રામ્ ॥ ૮૨ ॥

ઉન્મર્યાદૈરુત્પતદ્ભિસ્તદસ્રૈઃ કીર્ણે વિષ્વક્ કણ્ટકૌઘૈરિવાભ્રે ।
સ્થાતું યાતું સ્પન્દિતું ચાપ્યશક્તા તમ્તમ્ભેઽસૌ વાહિની જમ્ભહન્તુઃ ॥ ૮૩ ॥

તત્કોદણ્ડોન્મુક્તનારાચધારાસદ્યઃકૃત્તભ્રશ્યદશ્વેભયોધમ્ ।
હાહાકુર્વત્સિદ્ધગન્ધર્વવર્ગં શૌનાસીરં તત્ર નાસીરમાસીત્ ॥ ૮૪ ॥

મર્ત્યા યુદ્ધે પાતિતા દેવભાવં લબ્ધ્વા દેવીર્ધાવમાના વરીતુમ્ ।
ધાવદ્દેવસ્ત્રૈણમુદ્ભ્રાન્તપાલં ચક્રુઃ સ્વર્ગં સમ્પ્રવૃત્તાપવર્ગમ્ ॥ ૮૫ ॥

અસ્ત્રૈરસ્ત્રં વારયન્નુગ્રપાણ્ડ્યઃ શસ્ત્રૈઃ શસ્ત્રં શસ્ત્રિણશ્ચાવભિન્દન્ ।
જાતસ્તાતસ્યાક્ષિકોણાત્ તૃતીયાજ્જજ્વાલોચ્ચૈર્જાતવેદા ઇવાન્તે ॥ ૮૬ ॥

પશ્યન્ પાણ્ડ્યો વજ્રમિન્દ્રેણ દત્તં પ્રાયુઙ્ક્તોગ્રં ચક્રમીશાદવાપ્તમ્ ।
તદ્ દમ્ભોલિં સ્તમ્ભયત્ તસ્ય મૌલિં ભિત્ત્વા ભૂયઃ પાણિમસ્યાજગામ ॥ ૮૭॥

ભગ્ને શક્રે ભગ્નકોટીરકોટૌ ધાવત્યગ્રે મુક્તકેશં સુધાશાઃ ।
ચેલુર્વિષ્વક્ ચણ્ડવાતાવધૂતા દૂરે દૂરે તૂલપિણ્ડા ઇવાભ્રે ॥ ૮૮॥

ક્રન્દદ્ગન્ધદ્વિપમપસરત્સૈન્ધવોધૂતયોધ-
    પ્રત્યુદ્ધારવ્યસનવિમુખાપેતપાદાતજાતમ્ ।
ધાવદ્દેવપ્રવરસમરોદન્તયાથાર્થ્યબોધ-
    ભ્રામ્યત્પૌરં નગરમભવજ્જર્જરં નિર્જરાણામ્ ॥ ૮૯॥

ઇતિ મહાકવિશ્રીનીલકણ્ઠદીક્ષિતપ્રણીતે શિવલીલાર્ણવે ત્રયોદશઃ સર્ગઃ ।

## અથ ચતુર્દશઃ સર્ગઃ ।

તસ્મિન્ કુમારે મીનાક્ષ્યાસ્તથા શાસતિ મેદિનીમ્ ।
તારાગ્રહાણાં પઞ્ચાનાં જાતા જાત્વપિ વક્રતા ॥ ૧॥

અવાગૃહ્ણત તે વૃષ્ટિમાસેતોરાહિમાચલાત્ ।
જલદુર્ભિક્ષિતશ્ચાત્ર જગ્લે જાનપદૈર્જનૈઃ ॥ ૨॥

સોમવારવ્રતેનાથ સોમસુન્દરમીશ્વરમ્ ।
સ સમારાધયાઞ્ચક્રે શાસનાત્ કુમ્ભજન્મનઃ ॥ ૩॥

તસ્ય ચિન્તયતઃ સ્વપ્ને તરુણેન્દુશિખામણિઃ ।
આવિર્ભૂય દયાસિન્ધુરનુજગ્રાહ પાર્થિવમ્ ॥ ૪॥

વાર્ષિકીયમનાવૃષ્ટિર્વક્રૈઃ શુક્રાદિભિઃ કૃતા ।
કિં કરિષ્યતિ વર્ષાન્તે કિઙ્કુરિષ્યન્તિ તે ગ્રહાઃ ॥ ૫॥

દણ્ડશ્ચણ્ડાયુધાખ્યો યો દત્તોઽસ્માભિઃ પુરા તવ ।
કનકં તેન હેમાદ્રેઃ કણેહત્યોપનીયતામ્ ॥ ૬॥

ઇતિ સમ્બોધિતસ્તેન પ્રતિબુદ્ધો મહીપતિઃ ।
પ્રયાણં રોચયામાસ પ્રાતર્હેમાચલં પ્રતિ ॥ ૭॥

ચણ્ડાયુધં સમાદાય સ ગચ્છન્નિરવર્ણયત્ ।
ભૂપદ્મકર્ણિકાકારં ભૂપાલઃ કનકાચલમ્ ॥ ૮॥

નિકષે વ્યોમ્નિ યં ઘર્ષન્ વેધા જલદસિક્થકે ।
સંયોજ્યાલોકતેઽદ્યાપિ વર્ણં સૌદામનીચ્છલાત્ ॥ ૯॥

શ્રીકણ્ઠકાર્મુકે યત્ર શ‍ૃઙ્ગલગ્ના વિયન્નદી ।
વલયીકૃત્ય વિન્યસ્તા વાસુકિજ્યેવ દૃશ્યતે ॥ ૧૦॥

સર્વરત્નાકરં હૈમં સંરક્ષિતુમહર્નિશમ્ ।
યામિકાવિવ ચન્દ્રાર્કૌ યં ન જાતુ વિમુઞ્ચતઃ ॥ ૧૧॥

પ્રસ્તરા યત્ર રત્નાનિ મૃત્તિકા યત્ર કાઞ્ચનમ્ ।
નિર્ઝરો જાહ્નવી યત્ર લુબ્ધકો યત્ર શઙ્કરઃ ॥ ૧૨॥

યજન્તિ ચ તપસ્યન્તિ યમુદ્દિશ્યૈવ દેહિનઃ ।
યત્પરં નિગમસ્યાર્ધં યોઽપવર્ગાદનન્તરઃ ॥ ૧૩॥

યે કેચિદ્ દ્વિપદા યે ચ ષટ્પદા યે ચતુષ્પદાઃ ।
સર્વેઽપ્યષ્ટાપદમયાઃ સમ્બન્ધાદ્યસ્ય વિશ્રુતાઃ ॥ ૧૪॥

દ્યોર્મૂર્ધા પૃથિવી મધ્યં પાદઃ પાતાલમણ્ડલમ્ ।
યસ્ય ગઙ્ગાધરસ્યેયં યુક્તા ત્રૈલોક્યરૂપતા ॥ ૧૫॥

દ્રવીભવત્સુ શ‍ૃઙ્ગેષુ યત્ર દાવાગ્નિસઙ્ગમાત્ ।
સ્વર્ગાસ્થિરત્વવાદાનાં પ્રત્યક્ષૈવ પ્રમાણતા ॥ ૧૬॥

કાઞ્ચને યત્ર મૃદ્ભૂતે કામિન્યસ્ત્રિદિવૌકસામ્ ।
કુતૂહલિન્યો ભૂષાસુ કુલાલાન્ પર્યુપાસતે ॥ ૧૭॥

પલ્લવં જીર્ણપત્રં ચ પ્રત્યભિજ્ઞાતુમક્ષમાઃ ।
હૈમેષુ સહકારેષુ ખિદ્યન્તે યત્ર કોકિલાઃ ॥ ૧૮॥

ચામીકરૈકરૂપેષુ સર્વેષુ કુસુમેષ્વપિ ।
વ્યુત્પન્ના એવ યત્રત્યા ગન્ધેષુ ન મધુવ્રતાઃ ॥ ૧૯॥

સ તં પ્રદક્ષિણીકૃત્ય સર્વદેવાલયં ગિરિમ્ ।
તસ્થૌ પાણ્ડ્યઃ પુરોભાગે તસ્ય કાઙ્ક્ષન્નનુગ્રહમ્ ॥ ૨૦॥

ઉદાસામાસ હેમાદ્રિરુગ્ર પાણ્ડ્યેઽપિ પાર્થિવે ।
કિં ચકારાર્ણવો રામે નિસર્ગોઽયં જડાત્મનામ્ ॥ ૨૧॥

પ્રકૃત્યાપિ વિનીતસ્ય પાણ્ડ્યસ્યોગ્રસ્ય દણ્ડિનઃ ।
અભિખ્યાનુગુણં વૃત્તમાન્તરં કરણં તદા ॥ ૨૨॥

માહેશ્વરં સ તં દણ્ડં મકરદ્વયલાઞ્છિતમ્ ।
આવર્ત્ય રુષિતો વેગાદાજઘાન સુરાલયમ્ ॥ ૨૩॥

સ્થિરધન્વેતિ ભૂતેશઃ શ્રૂયતે યેન ધન્વના ।
ચકમ્પે સ હતસ્તેન ચામીકરમયો ગિરિઃ ॥ ૨૪॥

તાપિતે તપનાલોકૈસ્તાડિતે તેન દણ્ડતઃ ।
આસીદ દિષ્ટ્યાત્ર વૈપુલ્યમસમ્બાધાય નાકિનામ્ ॥ ૨૫॥

કમ્પિતે દણ્ડઘાતેન કાઞ્ચને તત્ર ભૂધરે ।
પૌલસ્ત્યતુલિતસ્યાદ્રેઃ પરિલુપ્તમિવં હ્રિયા ॥ ૨૬॥

હાલાસ્યનાથતનયમવબુધ્ય તતઃ સ તમ્ ।
સ્વં રૂપં દર્શયન્નાહ સુવિનીતં સુરાલયઃ ॥ ૨૭॥

અજ્ઞાસિષમહં ન ત્વામાસ્થિતઃ સ્થાવરં વપુઃ ।
જાનન્નિહ જગત્તત્ત્વં જાતુ ન ક્રોદ્ધુમર્હસિ ॥ ૨૮॥

ચૂર્ણીકુર્યાં અપિ ત્વં માં ચાપં ચેત્ પિતુરેવ તે ।
સ્વામિનસ્તસ્ય સા હાનિઃ સ્વસ્ય કિં પરિહીયતે ॥ ૨૯॥

અસ્તિ મે બહુશઃ સ્વર્ણમત્યલ્પમિદમુચ્યતે ।
અહમેવ તવાસ્મિ સ્વં મનોહત્યોપયુઙ્ક્ષ્વ મામ્ ॥ ૩૦॥

ઇતિ પ્રસાદિતસ્તેન દર્શિતશ્ચ મહાખનિમ્ ।
જગ્રાહ વિવિધં હેમ ભિત્ત્વા ચણ્ડાયુધેન સઃ ॥ ૩૧॥

નભશ્ચરહયાકૃષ્ટૈર્નરદેવઃ પરશ્શતૈઃ ।
મનોભિરપિ દુષ્પ્રાપમનોભિસ્તદુપાહરત્ ॥ ૩૨॥

સ ચામીકરવર્ષેણ સર્વં પ્રકૃતિમણ્ડલમ્ ।
પાલયામાસ નૃપતિઃ પાણ્ડ્યો યાવદવગ્રહમ્ ॥ ૩૩॥

તથા વવર્ષ કનકં ભૂયોભૂયઃ સ ભૂતલે ।
અવગ્રહં યથા નિત્યમાચકાઙ્ક્ષુઃ શરીરિણઃ ॥ ૩૪॥

સ કાન્તિમત્યાં પ્રેયસ્યાં ચન્દ્રમૌલેરનુગ્રહાત્ ।
પુત્રં યથાર્થનામાનં વીરપાણ્ડ્યમવિન્દત ॥ ૩૯॥

વિન્યસ્ય સકલાં પૃથ્વીં વીરપાણ્ડ્યે મહીપતિઃ ।

પ્રવિવેશ પરં ધામ પરમાનન્દલક્ષણમ્ ॥ ૩૬॥

તસ્મિન્ ભક્ત્યા ચ પૂજાભિસ્તપસા ચામ્બિકાપતેઃ ।
પુત્રાદપિ વિશેષેણ પૌત્રે પ્રીતિરવર્ધત ॥ ૩૭॥

જિજ્ઞાસમાનાઃ શ્રુત્યર્થં સેવયા સુન્દરેશિતુઃ ।
કણ્વાદયો મુનિવરાઃ કદમ્બવનમાયયુઃ ॥ ૩૮॥

તપોભિઃ કર્મભિર્ધ્યાનૈર્દાનૈરપિ પૃથગ્વિધૈઃ ।
નિન્યુઃ સંવત્સરં પૂર્ણં નિયતાસ્તે શિવાન્તિકે ॥ ૩૯॥

પ્રસન્નઃ સુન્દરેશોઽથ ભક્તિલેશવશંવદઃ ।
વિપ્રરૂપેણ વિપ્રેભ્યો વિવવાર નિજં વપુઃ ॥ ૪૦॥

ઉપસન્નઃ સ મુનિભિઃ સન્નિધૌ સુન્દરેશિતુઃ ।
વ્યાઘ્રચર્માસનો વેદાન્ વ્યાખ્યાતુમુપચક્રમે ॥ ૪૧॥

અસ્તિ વાગ્બ્રહ્મ તત્ કિઞ્ચિદખિલોત્પત્તિકારણમ્ ।
પ્રણવોઙ્કારતારાદિપર્યાયગણઘોષિતમ્ ॥ ૪૨॥

તદેકધા ત્રિધા વિપ્રાશ્ચતુર્ધા પઞ્ચધા સ્થિતમ્ ।
અપિ દ્વાદશધા ભિન્નમાગમેષૂપદિશ્યતે ॥ ૪૩॥

તતો વ્યાહૃતયસ્તાભ્યો ગાયત્રી વિશ્વપાવની ।
તતો વેદાઃ સોપભેદાસ્તેભ્યઃ સર્વં ચ વાઙ્મયમ્ ॥ ૪૪॥

પ્રભાવં તસ્ય તારસ્ય બ્રૂયાં શબ્દેન કેન વઃ ।
તત્પ્રસૂતા ગિરઃ સર્વાસ્તદ્વ્યાપ્યા વ્યાપકસ્તુ સઃ ॥ ૪૫॥

એકમાતૃપ્રસૂતાનામૈકમત્યપ્રવર્તિનામ્ ।
સ્વવૈમત્યેન વૈમત્યં શાસ્ત્રાણાં બાલિશા જગુઃ ॥ ૪૬॥

અસ્તિ યત્ પરમં જ્યોતિરસ્મિન્ લિઙ્ગે તિરોહિતમ્ ।
તદેવ સકલૈઃ શબ્દૈસ્તાત્પર્યવિષયીકૃતમ્ ॥ ૪૭॥

અઙ્ગાનિ મન્ત્રાસ્તન્ત્રાણિ શાસ્ત્રાણિ નિગમા અપિ ।
અન્તતો લોકગાથા અપ્યત્રૈવાયાન્તિ વિશ્રમમ્ ॥ ૪૮॥

ઇમા ગિરઃ સમસ્તાશ્ચ રુદ્રાય સ્થિરધન્વને ।
ઇતિ બ્રુવાણા વાણી વઃ પ્રમાણમકુતોભવા ॥ ૪૯॥

સર્વાનુગ્રાહિણી શક્તિઃ શમ્ભોરનતિરોકણી ।
તામપ્રપદ્ય તત્તત્ત્વં ન શબ્દૈરવધાર્યતે ॥ ૫૦॥

આરોહન્ત ઇવ સ્તોકમવરોહન્તિ ભૂયસા ।
જાનન્ત ઇવ મુહ્યન્તિ તત્પાદવિમુખા જનાઃ ॥ ૫૧॥

સા વક્તિ સા વાચયતિ સા ચેતયતિ સા ચિતિઃ ।
સા ગતિઃ સા ગમયતિ સૈવેયં મીનલોચના ॥ ૫૨॥

તામનન્યાઃ પ્રપદ્યધ્વં તપોદાનાધ્વરાદિભિઃ ।
વાઙ્મયં સર્વમેકસ્થં તતો વઃ પ્રતિભાસ્યતિ ॥ ૫૩॥

અનુગૃહ્યૈવમીશસ્તાન્ મસ્તન્યસ્તેન પાણિના ।
મિષતામગ્રતસ્તેષાં મૂલલિઙ્ગે તિરોદધે ॥ ૫૪॥

અથ કાલેન મહતા વીરપાણ્ડ્યો મહીપતિઃ ।
ભૂયસસ્તનયાન્ લેભે ભોગસ્ત્રીષુ દુરાશયાન્ ॥ ૫૫॥

સમારાધ્યાથ બહુધા સામ્બં હાલાસ્યવલ્લભમ્ ।
દેવો વંશકરં પુત્રં દેવ્યાં સમુદપાદયત્ ॥ ૫૬॥

સર્વદા મૃગયાસક્તઃ સ જાતુ વિપિનાન્તરે ।
સઞ્ચરન્ રાજશાર્દૂલઃ શાર્દૂલેન નિપાતિતઃ ॥ ૫૭॥

તદેવ રન્ધ્રમાસાદ્ય તસ્ય ભોગવધૂસુતાઃ ।
પરિલુણ્ટિતસર્વસ્વાઃ પલાયન્ત તતસ્તતઃ ॥ ૫૮॥

કુલવૃદ્ધાસ્તતસ્તસ્ય કુમારં પઞ્ચવાર્ષિકમ્ ।
અભિષેક્તું પદે તસ્મિન્નન્યોન્યં સમમન્ત્રયન્ ॥ ૫૯॥

મકુટેનાભિષેક્તવ્યમભિષેકેણ સુસ્થિરે ।
રાજ્યે રત્નાનિ સમ્પાદ્ય મકુટં કર્તુમીશ્મહે ॥ ૬૦॥

અન્યોન્યાશ્રયદુસ્સ્થોઽયમભિષેકોઽસ્ય ભાતિ નઃ ।
ન મિથ્યાનુગ્રહઃ શમ્ભોર્ન વિઘ્નઃ પુનરાયતિમ્ ॥ ૬૧॥

ઇતિ ચિન્તયતાં તેષામગ્રતઃ પાણ્ડ્યમન્ત્રિણામ્ ।
આવિરાસીત્ તદા શમ્ભુરાશ્રિતો વૈશ્યવિગ્રહમ્ ॥ ૬૨॥

સ ભૃત્યૈર્બહુભિર્વીતઃ સમૃદ્ધ્યા પરયા જ્વલન્ ।
રત્નાનાં વાણિગસ્મીતિ રાજભૃત્યાનુપાસદત્ ॥ ૬૩॥

સં ભૃત્યૈરાહૃતાં રત્નપેટીમુદ્ઘાટયન્ પુરઃ ।
વૈદગ્ધ્યં રત્નશાસ્ત્રેષુ વ્યાકુર્વન્નાદદે ગિરમ્ ॥ ૬૪॥

સર્વે પશ્યન્તિ રત્નાનિ સર્વે બિભ્રતિ ચ સ્વયમ્ ।
તત્ત્વં તુ બ્રહ્મણ ઇવ તેષાં નાવૈતિ કશ્ચન ॥ ૬૫॥

પશુભાવં પ્રપન્નસ્ય પાકશાસિતુરધ્વરે ।
વલસ્ય દેહધાતુભ્યો વરાદ્ધાતુર્યદુદ્ભવઃ ॥ ૬૬॥

યા વીર્યાચ્ચન્દ્રચૂડસ્ય રત્નજાતિઃ પુરાજનિ ।
યા ચ યજ્ઞવરાહસ્ય ફેનનિષ્યન્દબિન્દુભિઃ ॥ ૬૭॥

યા દૃઙ્મલાન્મહેન્દ્રસ્ય યા દધીચ્યસ્થિમણ્ડલાત્ ।
યે ચાકરા ભુવિ સ્વર્ગે પાતાલે ચ પૃથગ્વિધાઃ ॥ ૬૮॥

યા છાયા યાકૃતર્નિષ્ઠા યઃ સ્પર્શો યચ્ચ ગૌરવમ્ ।
યન્માનં યાનિ મૂલ્યાનિ યે દોષા યે ચ વા ગુણાઃ ॥ ૬૯॥

યે જાતિભેદા વિવિધા જાત્યાભાસાશ્ચ યે પુનઃ ।
યે રાગકૃત્રિમાઃ કેચિદ્ યે ચ સર્વાત્મકૃત્રિમાઃ ॥ ૭૦॥

યદા ધાર્યં યથા ધાર્યં યૈર્ધાર્યં યત્ર વા પુનઃ ।
યથા ક્રયો વિક્રયો વા યથા દાનપ્રતિગ્રહૌ ॥ ૭૧॥

યશ્ચૈષાં રક્ષણોપાયો યઃ પરીક્ષાવિધિક્રમઃ ।
યા ચાપ્યેષામુપનિષદધ્યાત્મમધિદૈવતમ્ ॥ ૭૨॥

ચાતુર્વર્ણ્યવ્યવસ્થા યા યા સ્ત્રીપુંસવિકલ્પના ।
જીવાજીવવિભાગો યો યા મર્ત્યામરભોગ્યતા ॥ ૭૩॥

યે ચ દૌર્લભ્યસૌલભ્યે યેષામૌત્પાતિકી જનિઃ ।
યદૌષધોપયોગિત્વં યાશ્ચ સંજ્ઞાઃ પરશ્શતાઃ ॥ ૭૪॥

શક્તઃ કો વેદિતુમિદં સર્વમેકં તમન્તરા ।
રત્નં સમસ્તદેવાનાં રત્નસાનુશરાસનમ્ ॥ ૭૫॥

નમાયં દેવપાણ્ડ્યસ્ય નન્વસૌ પાર્થિવાત્મજઃ ।
અર્હતીદં રત્નજાતમમૂલ્યં મદુપાહૃતમ્ ॥ ૭૬॥

અભિનિર્વર્ત્ત્ય કોટીરમભિષિચ્ય ચ પાર્થિવમ્ ।

રાજ્યે સ્વસ્થીકૃતે દત્ત રત્નમૂલ્યં યથોચિતમ્ ॥ ૭૭॥

ઇત્યુદીર્ય મણીન્ દિવ્યાન્ દત્વા તેભ્યઃ સ કાઙ્ક્ષિતાન્ ।
સદ્યસ્તિરોદધે તેષાં સમક્ષં સપરિચ્છદઃ ॥ ૭૮॥

ચિહ્નેન તેન તે સર્વે ચિન્તયન્તસ્તમીશ્વરમ્ ।
પ્રશશંસુઃ શિશોર્ભાગ્યં બાષ્પગદ્ગદયા ગિરા ॥ ૭૯॥

સદ્યો નિર્માપ્ય તે મૌલિં શાસ્ત્રદૃષ્ટેન વર્ત્મના ।
અભ્યષિઞ્ચન્ નૃપં બાલમખિલા રાજમન્ત્રિણઃ ॥ ૮૦॥

દૃષ્ટ્યા દયાયૈવાયં દેવદેવસ્ય શૂલિનઃ ।
અભિષિક્તઃ પુરા પશ્ચાદભ્યષિચ્યત મન્ત્રિભિઃ ॥ ૮૧॥

તસ્યાભિષેકપાણ્ડ્યાખ્યા તદાદિ ભુવિ પપ્રથે ।
ઈદૃશં ભક્તસૌલભ્યમિન્દુચૂડસ્ય દેહિષુ ॥ ૮૨॥

યદચેષ્ટત યત્પ્રાહ સ બાલઃ પાણ્ડ્યભૂપતિઃ ।
તત્સર્વં વરિવસ્યેતિ જગ્રાહ મધુરેશ્વરઃ ॥ ૮૩॥

યદવસ્ત યદાજઘ્રૌ યદભુઙ્ક્ત યદાલિપત્ ।
યદ્ દધૌ ચ સ સર્વં તચ્છિવ એવ નિવેદિતમ્ ॥ ૮૪॥

દિદૃક્ષા શિવલિઙ્ગેષુ શુશ્રૂષા શિવવૈભવે ।
ચિકીર્ષા શિવપૂજાસુ શિશોરેવાસ્ય કૌતુકમ્ ॥ ૮૫॥

રત્નદસ્ય વિભોલિઙ્ગં રત્નૈરેવાભ્યપૂજયત્ ।
અધમર્ણં સ્વમાત્માનં સ જાનન્ શાશ્વતીઃ સમાઃ ॥ ૮૬॥

દેવસ્તસ્મૈ શિલાસ્વેવ દદૌ રત્નાનિ કાનિચિત્ ।
સર્વવસ્તુષુ રત્નાનિ સ તસ્મૈ સમુપાહરત્ ॥ ૮૭॥

વાસવો જાતુચિત્ કર્તું વાર્ષિકં કમલાર્ચનમ્ ।
પ્રાપ્તસ્તેન કૃતાં શમ્ભોઃ પશ્યન્ પૂજામલજ્જત ॥ ૮૮॥

કથાન્તરે કદાચિત્ સ કથયામાસ પાશિને ।
ભક્તવાત્સલ્યમીશસ્ય ભક્તિં પાણ્ડ્યશિશોશ્ચ તામ્ ॥ ૮૯॥

પરક્ષ્યિ તદ્ દ્વયમપિ શક્રભાષિતં તતઃ શિવં સ્વયમપિ। તત્ર સેવિતુમ્ ।
જલગ્રહામયમૃદિતો જલેશ્વરઃ પુરં નિજં પુનરગમત્ સવિસ્મયઃ ॥ ૯૦॥

કસ્તૂરીહિમવાલુકાહિમપયઃશ્રીગન્ધગોરોચના-
કાશ્મીરૈરનુલેપિતઃ પશુપતિઃ પાણ્ડ્યાત્મજેનાસકૃત્ ।
કસ્તૂરીઘનસારસુન્દર ઇતિ ખ્યાતિં તદાદિ શ્રિતો
યેનાદ્યાપિ સમીહતે તનુભૃતાં તામેવ સેવાં પરામ્ ॥ ૯૧॥

ઇતિ મહાકવિશ્રીનીલકણ્ઠદીક્ષિતગ્રણીતે શિવલીલાર્ણવે ચતુર્દશઃ સર્ગઃ ।

## અથ પઞ્ચદશઃ સર્ગઃ ।

સલિલાધિપતિપ્રચોદિતઃ સરિદીશો મધુરાજિઘૃક્ષયા ।
વવૃધે વિજિતોઽપિ સન્ પુરા સમયે કસ્ય ન સમ્ભવેદ્ ભ્રમઃ ॥ ૧॥

સમભિદ્રવતા શનૈઃ શનૈઃ સલિલાનાં નિધિનાતિભીષિતાઃ ।
શરણં નૃપતિં યયુઃ પ્રજાઃ સ ચ હાલાસ્યનિકેતનં હરમ્ ॥ ૨॥

ચતુરશ્ચિકુરાન્ જટાપદાચ્ચતુરઃ સ્વાનવચિત્ય શઙ્કરઃ ।
પરિપશ્યતિ પાણ્ડ્યભૂપતૌ વિચકાર ત્વરિતં વિહાયસિ ॥ ૩॥

અપિબન્નધિગત્ય મેઘતાં સકલં તે સલિલં સરસ્વતઃ ।
પરિશુષ્ક ઇવાંસ્તૃતઃ પટઃ પ્રદરસ્થાનગતં જલાઞ્જલિમ્ ॥ ૪॥

અપિ વીક્ષ્ય તદદ્ભુતં મહદ્ વરુણો ન વ્યરમત્ પરીક્ષણાત્ ।
વિબુધેષ્વષપિ ચેદિયં દશા મતિભેદો મનુજેષુ નાદ્ભુતઃ ॥ ૫॥

પ્રહિતા વરુણેન તોયદાઃ કૃતવૈરપ્રતિયાતનેચ્છવઃ ।
પ્રલયાગમભૈરવૈ રવૈઃ કબલીચક્રુરિવાખિલં નભઃ ॥ ૬॥

સુદૃશાં કલહસ્પૃશામપિ સ્વયમાલિઙ્ગનનર્મહેતુભિઃ ।
કટુભિર્મમૃજે ઘનારવૈસ્તરુણાનામપરાધભીરુતા ॥ ૭॥

અપરાદ્ધશરં શરવ્યતઃ સકૃદાકર્ષણસન્નદોલતમ્ ।
મદનસ્ય ચિરોજ્ઝિતં ધનુઃ પરિચેતવ્યમિવાભવત્ પુનઃ ॥ ૮॥

યદુપૈક્ષિ યદર્ધદર્શિતં યદપિ પ્રાગથવાસ્તિ વિસ્મૃતમ્ ।
અનુતપ્ત ઇવાધુના વ્યધાદખિલં કર્મ તદદ્ભુતં સ્મરઃ ॥ ૯॥

વિધિરભ્રજલૈઃ પુરોઽનિલૈર્વિયતા કેતકગર્ભવર્ત્તિના ।
તટિતા નવનીપપાંસુના વ્યસૃજદ્ ધર્મહતં પુનઃ સ્મરમ્ ॥ ૧૦॥

વિધુતં પવનેન ચાતકાઃ પતિતં ચઞ્ચુપુટે કથઞ્ચન ।

ક્ષુધિતાઃ ક્ષુધિતે પુરઃ શિશૌ નવમમ્ભો ન દદુર્ન વા પપુઃ ॥ ૧૧॥

ચલિતષુ સિતચ્છદેષુ યૈઃ સરસિ સ્થાતુમચિન્તિ ષટ્પદૈઃ ।
વિરતાબ્જતયા ન તૈઃ સ્થિતં વિપદન્યવ્યસનાર્થિનાં પુરઃ ॥ ૧૨॥

કમલં ન ચકાસ્તિ કૈતકં કલહંસા નહિ સન્તિ કોકિનઃ ।
ન શશી નનુ ચાસ્તિ મન્મથઃ કિમભાવાદિહ કિં વિહીયતે ॥ ૧૩॥

કટુ ભેકગણેન ચુક્રુશે કલકેકામુખરેષુ કકિષુ ।
કવયઃ કવયન્તુ તાવતા કવિપાશઃ કિમુપૈતિ મૂકતામ્ ॥ ૧૪॥

સરસી ચિરકાલશીલનાદજદ્ભિર્ભ્રમરૈરદૃશ્યત ।
ક્ષુભિતોદ્ધૃતગર્ભકર્દમચ્છુરતેવામ્બુજિનીનિમજ્જનાન્ ॥ ૧૫॥

અવધૂય દુકૂલપલ્લવાનલકાનપ્યવમૃશ્ય વિશ્લથાન્ ।
તરુણૈરિવ મેઘમારુતૈસ્તરુણીનાં મમૃજે રતિશ્રમઃ ॥ ૧૬॥

ચિરસમ્ભૃતચાતકોદરજ્વલનોજ્જાસનલબ્ધજન્માભિઃ ।
વિતતૈરિવ ધૂમમણ્ડલૈર્વિયદાપૂરિતમમ્બુદૈર્નવૈઃ ॥ ૧૭॥

નિબિડે ચરમાઙ્ગમણ્ડલે નિપતન્તી જલદસ્ય ચન્દ્રિકા ।
સ્થગિતા ચિરમક્ષરત્ ક્ષિતૌ કણશઃ કિં કરકોપલાત્મના ॥ ૧૮॥

અતિથેરપિ ભાગ્યતો ભવત્યભિવૃદ્ધિર્ભવને કુડુમ્બિનામ્ ।
કલહંસકુલે વિનિર્ગતે કથમાસન્ કમલાકરશ્રિયઃ ॥ ૧૯॥

વિરમત્કમલોત્પલં સરો વ્યરુચત્ પુષ્પિતકૈતકૈસ્તટૈઃ ।
ગજવાજિસમાકુલં બહિર્ભવનં રાજ્ઞ ઇવાન્તતોઽધનમ્ ॥ ૨૦॥

કમલૈર્વિરતં કલાનિધિઃ કલહંસાશ્ચ ન ગોચરે દૃશામ્ ।
શનિરાસ્ત કકારમસ્તકે સમયે તત્ર કલાપિનં વિના ॥ ૨૧॥

મહિષા જહૃષુર્મદાગમે મહિષૈસ્તુલ્યધિયશ્ચ કર્ષકાઃ ।
અભવન્તુ ન હંસગૃહ્ય ઇત્યયશોનૈલ્યમિવાવહદ્ ઘનઃ ॥ ૨૨॥

બભુરુલ્લસિતાસ્તટિલ્લતા જગદન્ધકરણીષુ રાત્રિષુ ।
પથિ ચારયતોઽભિસારિકાઃ પ્રસવેષોઃ કરદીપિકા ઇવ ॥ ૨૩॥

પરિલુપ્તરવીન્દુતારકે સમયે સન્તમસાવૃતે સદા ।
દ્યુનિશોરુપદેશદેશિકા યુવતીનાં ગૃહચક્રવાકિકાઃ ॥ ૨૪॥

સ્તનિતે સ્તનિતે પયોમુચાં કલકેકામુખરાઃ કલાપિનીઃ ।
અભિલક્ષ્ય ભૃશં લલજ્જિરે રભસાલિઙ્ગિતવલ્લભાઃ સ્ત્રિયઃ ॥ ૨૫॥

સ્થગિતાર્કકરૈઃ પયોધરૈઃ પરિલુપ્તપ્રસવાસુ વલ્લિષુ ।
પવનાપહૃતાઃ પયઃકણા મદનસ્યાસ્ત્રપદેઽભિષેચિતાઃ ॥ ૨૬॥

નવતોયનિપાતહર્ષિતાં નગરીં તામવલોક્ય કુપ્યતઃ ।
અથ તે વરુણસ્ય શાસનાદતિમાત્રં વવૃષુઃ પયોમુચઃ ॥ ૨૭॥

પરમાં સખિતાં પ્રચેતસઃ પ્રતિપેદેઽગ્નિસખઃ સમીરણઃ ।
સમયાનુગુણૈવ શત્રુતા સખિતા વા ત્રિદિવૌકસામપિ ॥ ૨૮॥

પરિપાટિતકાનનદ્રુમાઃ પરિકૃષ્ટેભગવાશ્વમાનવાઃ ।
સરિતઃ પરિતો જજૃમ્ભિરે વિકટાવર્ત્તતરઙ્ગસઙ્કુલાઃ ॥ ૨૯॥

ગણશઃ પશુપક્ષિમાનવાન્ ગણશો ગ્રામપુરાશ્રમાલયાન્ ।
પવમાનસખાઃ પયોમુચઃ પણબન્ધાદિવ પર્યપાતયન્ ॥ ૩૦॥

ન દિશો વિદિશો ન પાદપા ન સમુદ્રાઃ સરિતો ન પર્વતાઃ ।
ન દિવા ન નિશા ન ચાન્તતો જગદપ્યૈક્ષત મધ્યમં તદા ॥ ૩૧॥

અથ પાણ્ડ્યસુતે સમં જનૈઃ શરણં જગ્મુષિ ચન્દ્રશેખરઃ ।
સ્વકપર્દભવૈઃ પયોધરૈઃ સ્થગયામાસ સ વર્ષતો ઘનાન્ ॥ ૩૨॥

પટમણ્ડપવદ્વ્યવસ્થિતાઃ પરિતસ્તે મધુરાં પયોમુચઃ ।
રુરુધુર્ભુવિ વારિસમ્પ્લવં જગૃહુશ્ચોપરિ નિષ્પતત્ પયઃ ॥ ૩૩॥

પટગર્ભગતા ઇવ પ્રજાઃ કિયદપ્યશ્રુતવર્ષનિસ્વનાઃ ।
વ્યજનૈરુપવીજ્ય લેભિરે નગરસ્થા મરુતં કથઞ્ચન ॥ ૩૪॥

અપિ યત્ પ્રલયેષુ વર્ષિતું સમરક્ષન્ સલિલં વલાહકાઃ ।
અભિવૃષ્ય તદપ્યશેષતો ગૃહધૂમા ઇવ ખે ચકાશિરે ॥ ૩૫॥

પ્રથમં પતિતૈઃ પયોભરૈઃ પરમમ્ભોધિરપૂરિ શોષિતઃ ।
ચરમં પતિતં તુ તત્પયો જગૃહુઃ શૈવકપર્દવારિદાઃ ॥ ૩૬॥

જલદા જલદૈર્નિરાકૃતાઃ પ્રતિયાન્તઃ પરિતો યથાગતમ્ ।
વરુણેન ન સમ્બભાષિરે વરુણસ્તૈરપિ લજ્જયા મિથઃ ॥ ૩૭॥

પરિતો વિનિવેશિતાન્ ઘનાન્ પ્રતિસંહૃત્ય નિજાન્ મહેશ્વરઃ ।
પરિદર્શયતિ સ્મ નાગરૈઃ પ્રકૃતિસ્થં નિખિલં મહીતલમ્ ॥ ૩૮॥

ચતસૃષ્વપિ દિક્ષુ કૂટવજ્જલદાન્ ન્યસ્ય રરક્ષ યત્ પુરીમ્ ।
તદુપક્રમમભ્યયોજયત્ સ ચતુષ્કૂટસમાખ્યયાપિ તામ્ ॥ ૩૯॥

અતિમાનુષદેવદાનવં વરુણો વીક્ષ્ય તદદ્ભુતદ્વયમ્ ।
મઘવોદિતમીશવૈભવં મનસામન્યત દિક્પ્રદર્શનમ્ ॥ ૪૦॥

સ સમેત્ય સુવર્ણપદ્મિનીસલિલસ્નાનગલજ્જલગ્રહઃ ।
કનકામ્બુરુહૈસ્તદુદ્ભવૈઃ કલયામાસ મહેશ્વરાર્ચનમ્ ॥ ૪૧॥

સ્તુતિભિર્બહુભિઃ પ્રસાદયન્ સ મહેશં શફરેક્ષણામપિ ।
કૃતપાણ્ડ્યનૃપાલસૌહૃદઃ કૃતકૃત્યઃ સ્વપુરં પુનર્યયૌ ॥ ૪૨॥

અથ જાત્વભિષેકપાણ્ડ્યભૂરમણે શાસતિ રાજ્યમૂર્જિતમ્ ।
સમદૃશ્યત સિદ્ધવેષભૃત્ સહ શિષ્યૈર્મધુરાપુરે હરઃ ॥ ૪૩॥

જપદામકરો જટાધરઃ કલયન્ કાઞ્ચનવેત્રમુજ્જ્વલમ્ ।
વિચચાર યુવાતિસુન્દરો ભસિતાલેપનપાણ્ડરચ્છવિઃ ॥ ૪૪॥

કરુણૈકમયઃ કલાનિધિઃ સુલભઃ સુન્દરમૂર્તિરુજ્જ્વલઃ ।
અવલોકિત એવ દેહિનામહરદ્ વાઙ્મનસે સ તાપસઃ ॥ ૪૫॥

બહુશઃ કુણિમૂકલોહેલા બધિરક્લીબજડાન્ધપઙ્ગવઃ ।
જટિલેન કૃતાર્થિતા જનાશ્ચરણામ્ભોજરજોઽનુષઙ્ગતઃ ॥ ૪૬॥

ચરણોદકસેવયા હરન્નપિ વન્ધ્યત્વમનેકધા સ્થિતમ્ ।
અવસન્નતરં હરશ્ચિરાદનુજગ્રાહ કુલં કુડુમ્બિનામ્ ॥ ૪૭॥

જરતસ્તરુણાન્ પ્રકલ્પયન્ યુવભાવં યુવસુ સ્થિરં દિશન્ ।
અપિ વર્ષગણાનુવર્તિનીઃ શમયામાસ રુજઃ સ ભસ્મના ॥ ૪૮॥

ભસિતં રસનાસુ નિક્ષિપન્ કવયામાસ જડાનનેકધા ।
વિતતાર પરાં વિરક્તતાં વિષયાસઙ્ગમલીમસાત્મનામ્ ॥ ૪૯॥

અપિ દુર્લભભૈક્ષ્યજીવનાનકરોદાઢ્યતરાન્ ગિરૈવ સઃ ।
ઉદજીવયદુક્ષણાદપામુરગક્ષ્વેલહતાનપિ ક્ષણાત્ ॥ ૫૦॥

પતિવલ્લભતાં મૃગીદૃશાં પ્રમદાસુ પ્રિયતાં વિલાસિનામ્ ।
વ્યતરદ્ ભિષજાં ચ મૂલિકા વિવિધપ્રત્યયકારિણીર્હરઃ ॥ ૫૧॥

ઘુટિકાંશુકખડ્ગપાદુકારસલેપાઞ્જનમુખ્યસિદ્ધયઃ ।

તમનુસ્મરતાં શરીરિણાં સ્વત એવ પ્રચકાશિરે તદા ॥ ૫૨॥

ગ્રહભૂતપિશાચયક્ષિણીગણકૂશ્માણ્ડવિનાયકાદયઃ ।
અભિદુદ્રુવુરાદિસિદ્ધ ઇત્યભિધાનાક્ષરકીર્તનાન્નૃણામ્ ॥ ૫૩॥

સ જગાદ દૃશોરગોચરઃ કથયન્નેવ કથાસ્તિરોદધે ।
સ્થવિરમ્તરુણોऽથ મુણ્ડિતો જટિલશ્ચૈષ જનૈરદૃશ્યત ॥ ૫૪॥

સમદર્શયદુન્નતાન્ ગિરીન્ સવિધે વારિનિધીન્ વનાનિ ચ ।
સ્તુવતાં હસતાં પ્રધાવતાં મિષતામેવ તદુન્મમાર્જ સઃ ॥ ૫૫॥

કિયદિત્યભિદધ્મહેऽદ્ભુતં કિમિતીદં ચરિતં સ્તુવીમ વા ।
વયમપ્યુપદર્શયેમ તદ્યદિ હિ સ્યામ જગચ્છરીરિણઃ ॥ ૫૬॥

ઇતિ કેલિકલાકુતૂહલી વિજહારૈષ યથા યથા પુરે ।
અશૃણોદખિલં તથા તથા પ્રકૃતિભ્યો નૃપતિઃ પદે પદે ॥ ૫૭॥

સ કદાચન સુન્દરેશિતુર્વિતતે ધામ્નિ વિમાનપશ્ચિમે ।
ઉપવિષ્ટમમું યદૃચ્છયા નૃપતિઃ પ્રેક્ષત સેવિતું ગતઃ ॥ ૫૮॥

દૃશમસ્ય તૃણીકૃતામરાં ગિરમજ્ઞાતપરાનુવર્તનામ્ ।
સ્થિતમીપ્સિતગન્ધદુર્વિધં પરિપશ્યન્ નૃપતિર્વિસિષ્મિયે ॥ ૫૯॥

અતિવાઙ્મનસૈર્મહોભરૈરપિ તત્ત્વં પરમસ્ય સૂચિતમ્ ।
અધિગન્તુમનાઃ સ્વયં મનાગનુયુઙ્ક્તે સ્મ સ ગોત્રનામની ॥ ૬૦॥

શ્રવણે દધદક્ષમાલિકાં શિથિલીકૃત્ય સ પદ્મમાસનમ્ ।
અમૃતસ્નપિતૈરિવાક્ષરૈરિદમાહ સ્મ નૃપં તપોધનઃ ॥ ૬૧॥

ન કુલં ન ગૃહં ન બાન્ધવા નચ વર્ણાશ્રમયન્ત્રણાપિ નઃ ।
અવધૂતપદે નિષેદુષામભિધા સિદ્ધ ઇતિ સ્ફુટૈવ તે ॥ ૬૨॥

ચતુરુત્તરષષ્ટિભેદતઃ પ્રથિતા યા ભુવને કલા ઇતિ ।
યદિ તાસુ કુતૂહલી ભવાનભિસમ્પશ્યતુ સિદ્ધિમદ્ભુતામ્ ॥ ૬૩॥

ઇતિ વાદિનિ યોગિનાં વરે પુનરૂચે નૃપતિઃ કુતૂહલી ।
ઉપદીકૃતમિક્ષુમાયતં કમનીયં કલયન્ કરેણ તમ્ ॥ ૬૪॥

અયમસ્તિ વિમાનધારકો દ્વિરદો યઃ કિલ દાર્ષદઃ પુરઃ ।
ઇમમિક્ષુમસૌ ગિલત્વિતિ સ્મયમાનઃ સ તદન્વમન્યત ॥ ૬૫॥

સ તતઃ પુરતઃ શિલાગજઃ સ્તનિતસ્નિગ્ધગભીરબૃંહિતઃ ।
નરપાલકરાગ્રવર્ત્તિનં નવમિક્ષુ વિચકર્ષ શુણ્ડયા ॥ ૬૬॥

કબલીકૃતકોમલેક્ષુણા કરિણા તત્ર વિમાનવર્ત્તિના ।
જગૃહે નૃપકણ્ઠમાલિકામણિહારોઽપિ મૃણાલકોમલઃ ॥ ૬૭॥

ચકિતાઃ સ્તિમિતાઃ પલાયિતા રુષિતાશ્ચાનુચરા મહીપતેઃ ।
ઉપલદ્વિરદસ્ય ચેષ્ટિતાન્યુપલભ્ય ક્ષુભિતાઃ પ્રચુક્રુશુઃ ॥ ૬૮॥

ન નિકર્ષચિકર્ષિયા કૃતં ન પરીચિક્ષિષયા ન ગર્વતઃ ।
કુતુકેન તુ વૃત્તમેતદિત્યસકૃત્ તં પ્રણમન્નસાન્ત્વયત્ ॥ ૬૯॥

નમતે ધરણીભૃતે વરં તનયં વંશકરં પ્રસાદયન્ ।
સ્મયમાનમુખામ્બુજો હરો મિષતસ્તસ્ય પુરસ્તિરોદધે ॥ ૭૦॥

અથ વિક્રમપાણ્ડ્યભૂપતિસ્તનયોઽભૂદભિષેકપાણ્ડ્યતઃ ।
ઉદિતોદિતમુદ્વહન્ કુલં કુલદાસઃ કુસુમાયુધદ્વિષઃ ॥ ૭૧॥

સ પિતુઃ પરલોકમેયુષશ્ચરમાજ્ઞાં શિરસોપધારયન્ ।
અનુપાધિમનન્યગામિનીમચલાં ભક્તિમધત્ત શઙ્કરે ॥ ૭૨॥

શિવનામપરઃ શિવાશ્રયઃ શિવવિન્યસ્તભરઃ શિવાશ્રમી ।
જગદાકલયન્ શિવાત્મકં જનનાથો બુભુજે વસુન્ધરામ્ ॥ ૭૩॥

શશિનીવ સમસ્તવલ્લભે નૃપતૌ ભૂતપતેઃ પ્રણમ્રરિ ।
પિતરીવ સુતા મહીભુજો બિભરામાસુરવિપ્લુતાં મતિમ્ ॥ ૭૪॥

કુલશેખરપાણ્ડ્યસપ્તમં નૃપતિં તં કિલ ચોલપાર્થિવઃ ।
ન મમર્ષ શરદ્વિનિર્મલં શશિનં ચોર ઇવ સ્વદોષતઃ ॥ ૭૫॥

અતિવર્તિતુમેનમક્ષમઃ સ વરાકઃ સમરે ભુજોષ્મણા ।
ક્ષપણૈઃ ક્રતુમાભિચારિક કલયામાસ પયઃસ્વિનીતટે ॥ ૭૬॥

તત ઉચ્ચલિતો દુરધ્વરાદ્ દ્વિરદઃ કોઽપિ ગિરીન્દ્રભીષણઃ ।
સમયા મધુરામુપાદ્રવત્ કલયન્ મુદ્ગરમાયસં કરે ॥ ૭૭॥

તમુદન્તમયં વિચારયન્ શરણં પ્રાપ શશાઙ્કશેખરમ્ ।
સ ચ તત્ર કિરાતરૂપભૃત્ પરિચક્રામ નિજાલયાદ્ બહિઃ ॥ ૭૮॥

વનપલ્લવભઙ્ગશેખરં વરગુઞ્જાફલપુઞ્જભૂષણમ્ ।
અધિરોપિતકાર્મુકં જના દદૃશુર્દિવ્યમમું વનેચરમ્ ॥ ૭૯॥

ઉપલભ્ય ગજં તમુદ્ધતં પથિ ગવ્યૂતિયુગે વ્યવસ્થિતમ્ ।
નરસિંહમયોજયચ્છરે નરસિંહસ્ય મુદે વનેચરઃ ॥ ૮૦॥

ત્રિપુરેષુ ગતેષુ લક્ષ્યતાં હસિતેનાસ્મિ પુરાપ્યપોદિતઃ ।
ઇતિ સત્વરમીશકાર્મુકાદુદયાસીદ્ દનુજાન્તકઃ શરઃ ॥ ૮૧॥

સ હસન્નચલેન ધન્વના વિશિખેન સ્વયમચ્યુતેન ચ ।
જગદેકધનુર્ધરઃ ક્ષણાદભિનત્ સિન્ધુરમાભિચારિકમ્ ॥ ૮૨॥

નરકેસરિણાસ્ત્રરૂપિણા શમિતે હસ્તિનિ શૈલતાં ગતે ।
તમનુ પ્રહિતાસ્તથાગતા ન સમૈક્ષ્યન્ત યથા તથા ગતાઃ ॥ ૮૩॥

સુગતાન્ સુગતાત્મનેષુણા સ વિજિગ્યે ચતુરો વનેચરઃ ।
અહિરેવ હિ વેત્ત્યહેઃ પદં કથમન્યેન ઘટેત તજ્જયઃ ॥ ૮૪॥

વિદિતઃ કિલ સર્વદેહિનાં વિજયઃ પઞ્ચમુખેન હસ્તિનઃ ।
ગુણગૃહ્યતયા તદપ્યસૌ મુમુદે વિક્રમપાણ્ડ્યપાર્થિવઃ ॥ ૮૫॥

અનુગૃહ્ય દયાર્દ્રયા દૃશા પ્રણતં ભૂતપતિઃ પ્રજેશ્વરમ્ ।
તનયં ચ તદન્વયોચિતં વરમસ્મૈ વિતરંસ્તિરોદધે ॥ ૮૬॥

અજનિષ્ટ વિભોરનુગ્રહાત્ તનયસ્તસ્ય ચ રાજશેખરઃ ।
યદુપાહિતભૂભરો ગુરુઃ પ્રતિપેદે પદમૈશ્વરં પરમ્ ॥ ૮૭॥

સપ્તમો મલયધ્વજસ્ય સ સપ્તસપ્તિસમદ્યુતિ-
  ર્બિભ્રદઙ્ગદનિર્વિશેષમશેષમેવ મહીતલમ્ ।
આરરાધ સભાજનૈરતિમાનુષૈર્મધુરેશ્વરં
  રઞ્જયન્ જનતાઃ સુતાનિવ રાજશેખરપાર્થિવઃ ॥ ૮૮॥

ઇતિ મહાકવિશ્રીનીલકણ્ઠદીક્ષિતપ્રણીતે શિવલીલાર્ણવે પઞ્ચદશઃ સર્ગઃ ।

## અથ ષોડશઃ સર્ગઃ ।

અથ ક્ષિતિં બિભ્રતિ રાજશેખરે દ્વિજો વિરૂપાક્ષ ઇતિ પ્રથાં ગતઃ ।
ચિરાય શમ્ભું તપસા પ્રસાદયન્નવાપ ગૌરીત્યભિવિશ્રુતાં સુતામ્ ॥ ૧॥

સ કન્યયા જાત્વપિ પઞ્ચવર્ષયા સમેત્ય તાતસ્તપસેઽભિયાચિતઃ ।
અદેયમપ્યેવમપત્યસૌહૃદાદદિક્ષદેકાક્ષરમમ્બિકામનુમ્ ॥ ૨॥

ભવપ્રવાહપ્રતિપન્નવાસનાપ્રબન્ધયોગેન કુમારિકાપિ સા ।
અસાધયન્મન્ત્રમશેષસિદ્ધિદં જગન્નિદાનં જપયજ્ઞનિષ્ઠયા ॥ ૩॥

ગુરૌ વસન્તં કૃતભૈક્ષવૃત્તિકં કદાચિદેકં ગૃહમાગતં વટુમ્ ।
અવેક્ષ્ય તસ્મૈ ગુરુરાત્મજામદાદચિન્તયિત્વા કુલશીલબન્ધુતાઃ ॥ ૪॥

દુરાગમાભ્યાસવિલુપ્તસત્પથે મહેશ્વરદ્વેષમલીમસાત્મનિ ।
દધીચિશાપોપહતે દ્વિજાન્વયે પ્રસૂતમેનં બુબુધે તતસ્તુ સઃ ॥ ૫॥

અલઙ્ઘનીયં શિવશાસનં સુરૈરપિ સ્વયમ્ભૂવિબુધેશ્વરાદિભિઃ ।
સ ચિન્તયન્ સ્વોચિતદાનસત્કૃતાં સહોપયન્ત્રા પ્રજિઘાય કન્યકામ્ ॥ ૬॥

અથ સ્નુષામાત્મભુવા સ્વયં હૃતામવેક્ષ્ય ફાલે ભાસતેન લાઞ્છિતામ્ ।
શિવદ્વિષો તચ્છ્વશુરૌ જ્વલદ્રુષૌ નિવેશયામાસતુરાલયે પૃથક્ ॥ ૭॥

શિવાર્ચનધ્યાનકથાવિવર્જિતે શ્મશાનતુલ્યે સદને તુ તત્ર સા ।
અમઙ્ગલે સત્યપિ સર્વમઙ્ગલામનુસ્મરન્તી દિવસાનિ ચિક્ષિપે ॥ ૮॥

તતઃ સદારે શ્વશુરે બહિર્ગતે કદાચિદેનાં સદને નિષેદુષીમ્ ।
પ્રહર્ષયન્ પ્રાદુરભૂદ્ દ્વિજાત્મના વિભૂતિરુદ્રાક્ષવિભૂષિતો હરઃ ॥ ૯॥

તમાતિથેયીભિરસૌ સભાજયન્ત્યુપાસ્ત યાવજ્જરઠં દ્વિજર્ષભમ્ ।
વિવેશ તાવચ્છ્શુરસ્તમાલયં સ ચ દ્વિજોઽદૃશ્યત સુન્દરો યુવા ॥ ૧૦॥

તતઃ શિવાનુસ્મરણૈકસાધનાં સ વેપમાનામભિલક્ષ્ય તાં હરઃ ।
સ્તનન્ધયોઽદૃશ્યત તત્સમીપતઃ સ્વરેણ તસ્યાઃ શ્વશુરાવમર્ષયન્ ॥ ૧૧॥

તતસ્તુ પૃષ્ટા પ્રતિવશિનીસુતં તમાલપન્તી શ્વશુરેણ કુપ્યતા ।
બહિર્નિરસ્તા શિશુનામુના સમં નિનાય પર્યશ્રુમુખી નિશામસૌ ॥ ૧૨॥

ભવસ્ય તં પશ્ચિમવક્ત્રરૂપિણં શિશુ સ્મરન્તીં હૃદિ વિપ્રકન્યકામ્ ।
નિનાય કલ્યે નિજમાસ્પદં શિવો વૃષેણ વિસ્માપિતવિષ્ટપત્રયઃ ॥ ૧૩॥

સ્તનન્ધયં દેવમુપાસ્ય સા જહૌ સ્તનન્ધયત્વં ભવસઙ્ઘસઞ્ચિતમ્ ।
ક્રમેત શમ્ભાવવિતર્ક્યવૈભવે ક્વ તત્ક્રતુન્યાયવિદુક્તિપદ્ધતિઃ ॥ ૧૪॥

મનું કિલં ઘક્ષરમાચચક્ષિરે પ્રભું પ્રજાસર્ગવિધૌ પુરાવિદઃ ।
અયં તુ સૃષ્ટિસ્થિતિસંહૃતિક્ષમો મનું યમેકાક્ષરમારરાધ સા ॥ ૧૫॥

કદાપિ દેવઃ કરિકાલચોલતો નિશમ્ય નૃત્તાનભિયુક્તતાં નિજામ્ ।
બભૂવ સદ્યો નટસૂત્રપારગઃ કિમાદિશૈલૂષકુલે તદદ્ભુતમ્ ॥ ૧૬॥

શિવે પ્રસક્તે સતિ શૈવરાત્રકે મહાવ્રતે મન્દિરમૈશમાશ્રિતઃ ।
પ્રસન્નમભ્યર્ચનયા હરં પુનઃ પ્રસાદયિષ્યન્ પ્રણનર્ત્ત પાર્થિવઃ ॥ ૧૭॥

ઉદઞ્ચિતાકુઞ્ચિતસવ્યપાદિકાચિરાનુવૃત્તિશ્રમખિન્નમાનસઃ ।
શ્રમં તમીશેઽપિ સમં વ્યચિન્તયત્ સ હિ સ્વયં પશ્યતિ શમ્ભુમાત્મવત્ ॥ ૧૮॥

નિધાય સવ્યં નિભૃતં પદં ક્ષિતાવુદઞ્ચયન્ દક્ષિણમઙ્ઘ્રિમુચ્ચકૈઃ ।
નટન્નુદસ્વ શ્રમમિત્યનુક્ષણં નટેશ્વરં પ્રાર્થયતે સ્મ પાર્થિવઃ ॥ ૧૯॥

અદર્શિતસ્પન્દમથેષદપ્યમું નટેશબિમ્બં કલયન્ નરેશ્વરઃ ।
કૃપાણકૃત્તેન નિજેન મૌલિના સ દેવમારાધયિતું સમૈહત ॥ ૨૦॥

ન કિઞ્ચિદાનન્દમયં સ વેદ તં ન વા કિમર્ચાસ્વનપાયિનીં સ્થિતિમ્ ।
તથાપિ તસ્યાભવદીદૃશી મતિસ્તથા હિ ભક્તિસ્તપસાપિ દુર્લભા ॥ ૨૧॥

અવેત્ય દુર્ભેદમમુષ્ય નિશ્ચયં તથા સ દેવઃ પ્રસસાદ નર્ત્તિતુમ્ ।
ન દુર્લભા તસ્ય કદાપિ વશ્યતા સુદુર્લભા તુ સ્થિરશીલતૈવ નઃ ॥ ૨૨॥

અનન્યથાત્વવ્રતમાત્મકર્મણામપિ ત્યજન્ દૂરત એવ શઙ્કરઃ ।
યથા સ મેને હૃદિ રાજશેખરસ્તથા વિપર્યસ્ય નનર્ત્ત તત્ક્ષણમ્ ॥ ૨૩॥

નિધાય સવ્યે નિખિલં ભરં તનોઃ પદે યદાસ્ત પ્રકૃતિસ્તુ તસ્ય સા ।
પ્રપઞ્ચસર્ગસ્થિતિભઙ્ગભારમપ્યયં તુ તત્રૈવ નિવેશ્ય નિર્વૃતઃ ॥ ૨૪॥

તદદ્ભુતં તાણ્ડવમૈન્દુશેખરં પ્રસાદતસ્તસ્ય સિષેવિરે જનાઃ ।
ગણેશ્વરાસ્તે વિષયે મહીપતેર્વસન્તિ યે શઙ્કરભક્તિશાલિનઃ ॥ ૨૫॥

બબન્ધ ભાક્તં સ્વકૃતે કૃતે નૃપો વિશિષ્ય તસ્મિન્ વિપરીતતાણ્ડવે ।
તદાદિ તદ્વંશભુવોઽપિ પાર્થિવાસ્તમેવ દેવં શરણં પ્રપેદિરે ॥ ૨૬॥

પ્રમાર્ષ્ટુમાગઃ શતશઃ સમર્પયન્ પતિઃ પ્રજાનાં મણિભૂષણાનિ સઃ ।
સુતં કુલોત્તુઙ્ગ ઇતિ શ્રુતં તતો વરેણ લેભે નચિરેણ શૂલિનઃ ॥ ૨૭॥

ગતે ધરિત્રીભૃતિ રાજશેખરે ગતિં સમાખ્યાવિધયૈવ સૂચિતામ્ ।
કુલોચિતોત્તુઙ્ગગુણાકરશ્ચિરાદ્ દધૌ કુલોત્તુઙ્ગમહીપતિઃ ક્ષિતિમ્ ॥ ૨૮॥

ગુણેન શીલેન કુલેન ચોન્નતં તમીક્ષમાણાઃ ક્ષિતિપાસ્તતસ્તતઃ ।
ઉપાહરન્ સ્વસ્વકુમારિકાઃ સ્વતસ્તતોઽયુતં તસ્ય બભૂવુરઙ્ગનાઃ ॥ ૨૯॥

સ તાસુ લેભે સકલાસુ પાર્થિવઃ સમાનરૂપાન્વયશીલવૃત્તિષુ ।

કુલોચિતૌદાર્યવિવેકશાલિનાં કુમારકાણામયુતાનિ ષટ્ તતઃ ॥ ૩૦॥

અજાયતાનન્તગુણાખ્યયા શ્રુતરસ્તનૂભવાનાં પ્રથમો ધરાપતેઃ ।
તદાશ્રિતાસ્તચ્ચરણાર્પિતાસવઃ પરેઽપિ તત્તુલ્યગુણા વિજજ્ઞિરે ॥ ૩૧॥

યદીદૃશી દારસમૃદ્ધિરીદૃશી કુલાભિવૃદ્ધિશ્ચ બભૂવ ભૂપતેઃ ।
ઇદં હિ લીલાયિતમિન્દુશેખરપ્રસાદલેશપ્રતિલમ્ભસમ્પદઃ ॥ ૩૨॥

સ વીરભદ્રઃ સ્વશરીરસમ્ભવૈઃ સ્વતુલ્યતેજોનિધિભિર્ગણૈરિવ ।
સમં કુલોત્તુઙ્ગમહીપતિઃ સુતૈઃ શશાંસ સર્વાઙ્ઘ્રિવશાસનદ્વિષઃ ॥ ૩૩॥

અથ દ્વિજઃ કશ્ચન બાલપુત્રયા સમં ગૃહિણ્યા મધુરાં સમાસદત્ ।
તલે વટસ્યાસ્ત વિશાલશીતલે ક્વચિત્ કઠોરાતપતાપતાપિતઃ ॥ ૩૪॥

અસઞ્ચરત્પાન્થમનાલપદ્વિજં સરોજકોશોદરલીનષટ્પદમ્ ।
પ્રતપ્તહેમપ્રતિમં સમસ્તમપ્યભૃદહર્મધ્યગતે જગદ્ રવૌ ॥ ૩૫॥

જ્વલદ્ વિનાપિ જ્વલનેન ભૂતલે મદાન્ધભદ્રેભનખમ્પચં રજઃ ।
અવેક્ષમાણૈર્નયનૈઃ શરીરિણામતિપ્રતેપે દહનાહતૈરિવ ॥ ૩૬॥

સ ગેહિનીં બાહુલતોપધાયિના કુચાગ્રવિન્યસ્તમુખેન સૂનુના ।
તલે શયાનાં તૃપયાદિતાં તરોરવેક્ષ્ય હર્તું સલિલં યયૌ બહિઃ ॥ ૩૭॥

સ કિઞ્ચિદાસાદ્ય સરોઽતિનિર્મલં હરન્ જલં પદ્મદલેન શીતલમ્ ।
દદર્શ વિદ્ધાં દયિતાં મહેષુણા રુદન્તમસ્યાઃ શિશુમપ્યુરસ્સ્થલે ॥ ૩૮॥

પ્રિયાવિયોગવ્યસનાભિમૂર્ચ્છિતઃ સ યાવદન્વિષ્યતિ તત્ર કારણમ્ ।
દદર્શ તાવન્મૃગયાવિહારિણં ધનુર્ધરં લુબ્ધકમેકમન્તિકે ॥ ૩૯॥

અનેન નૂનં દયિતા મમાહતેત્યવેત્ય કેશેષુ પરામૃશન્નમુમ્ ।
ઉપેત્ય રાજ્ઞઃ પ્રતિહારમુચ્ચકૈર્દ્વિજઃ પ્રચુક્રોશ વિષાદવિહ્વલઃ ॥ ૪૦॥

તતઃ કુલોત્તુઙ્ગનૃપસ્તદદ્ભુતં નિશમ્ય ખિન્નઃ પૃથગન્વયુઙ્ક્ત તૌ ।
ન નિશ્ચિકાયૈકમધાભિયોક્તરિ દ્વિજે કિરાતે ચ દૃઢં મૃષોત્તરે ॥ ૪૧॥

ન તત્ત્વમત્ર વ્યવસાતુમીશ્મહે વિના પ્રસાદાદ્ ગિરિજાપતેરિતિ ।
નિરુધ્ય લુબ્ધં શમયન્ દ્વિજં ગિરા નૃપઃ પ્રપેદે શરણં પિનાકિનમ્ ॥ ૪૨॥

દ્વિજદ્વિતીયો નગરાદ્ બહિશ્ચરન્ નિશિ ત્વમસ્યામુપલપ્સ્યસેઽખિલમ્ ।
ઇતીરિતો ભૂપતિરિન્દુમૌલિના સ વૈશ્યવીથ્યામચરત્ ક્વચિદ્બહિઃ ॥ ૪૩॥

તતઃ ક્વચિત્ સંવદતોર્દ્વયોર્મિથઃ કથાં સ શુશ્રાવ કૃતાન્તદૂતયોઃ ।
નિનીષતોર્વૈશ્યગૃહે વરં ક્ષણાત્ પ્રવૃત્તવૈવાહિકમઙ્ગલાવધૌ ॥ ૪૪॥

શરવ્યમુદ્દિશ્ય શકુન્તમેકકં પુરા પુલિન્દેન ચિરાર્પિતઃ શરઃ ।
વટદ્રુલગઃ પવનાહતઃ પતન્ યથાવધીદ્ વિપ્રવધૂમતર્કિતમ્ ॥ ૪૫॥

તથાદ્ય વૈવાહિકતૂર્યનિસ્વનૈઃ પરિભ્રમન્ત્યાત્ર ગવા નિપાતિતમ્ ।
વરં સમાદાય કરગ્રહાવધૌ પુનર્નિવર્ત્તેવહિ તત્ક્ષણાદિતિ ॥ ૪૬॥

સુવિસ્મિતસ્તેન સહ દ્વિજન્મના સ્વસંશયચ્છેદકરીં ગિરં તયોઃ ।
નિશમ્ય સંવાદકૃતે નૃપઃ ક્ષણં પ્રતીક્ષ્ય તસ્થૌ વરપાતનક્ષણમ્ ॥ ૪૭॥

તથૈવ વૃત્તેઽત્ર કૃતાન્તચેષ્ટિતે ધનૈઃ પ્રભૃતૈઃ પરિતોષ્ય સ દ્વિજમ્ ।
વિસૃજ્ય ચ વ્યાધમનુગ્રહં વિભોરશેષમાવેદયતિ સ્મ મન્ત્રિષુ ॥ ૪૮॥

વિધુઃ કલઙ્કી વિયતિ ભ્રમન્નસૌ કલઙ્કશઙ્કાપિ ન શઙ્કરાશ્રિતે ।
અતો ન તે સ્યાદપવાદભીરિતિ પ્રશંસિતઃ પાણ્ડ્યનૃપઃ સ મન્ત્રિભિઃ ॥ ૪૯॥

નિવેશિતોઽનન્તગુણોઽથ મન્ત્રિભિઃ પદે પિતુઃ શાઙ્કરમેયુષઃ પદમ્ ।
સ રત્નકેયૂરવદાવહદ્ ભુજે ચતુસ્સમુદ્રીપરિવેષ્ટિતાં ભુવમ્ ॥ ૫૦॥

દ્વિજાધમઃ કશ્ચિદવન્તિષુ સ્થિતઃ સ્વમાતૃસક્તસ્તદમર્ષિણં ગુરુમ્ ।
નિહત્ય હૃત્વા નિખિલં ચ તદ્ધનં નિશિ પ્રતસ્થે સહ માતૃપાશયા ॥ ૫૧॥

તમધ્વનિ વ્યાધભટા મદોદ્ભટાઃ પ્રહૃત્ય સર્વસ્વમથાપહૃત્ય ચ ।
અપિ સ્ત્રિયં તામવરુધ્ય સુન્દરીમહાસિષુસ્તં તનુમાત્રશેષિતમ્ ॥ ૫૨॥

કદન્નભિક્ષાધિગમાવ્યવસ્થયા કૃશો રુજાર્ત્તઃ કૃપણો દિગમ્બરઃ ।
પરિભ્રમન્ દિક્ષુ કદાચિદાનશે સ ભાગ્યયોગેન કદમ્બકાનનમ્ ॥ ૫૩॥

અયત્નમાચ્છાદનમન્નમપ્યસૌ પ્રવિષ્ટમાત્રો નગરીમવિન્દત ।
અનુગ્રહાન્મીનદૃશોઽધુનાપિ યન્ન તત્ર કશ્ચિત્ ક્ષુધિતો ન દુઃખિતઃ ॥ ૫૪॥

સ સઞ્ચરઞ્ જાતુ કિરાતદમ્પતી વિલાસિનૌ વિશ્વવિલક્ષણશ્રિયૌ ।
દદર્શ દિષ્ટ્યા નિશિ નતત્પરૌ મહેશધામપ્રતિહારસીમનિ ॥ ૫૫॥

સ તત્ર વિસ્રમ્ભમવાપ્ય સઁલ્લપન્ ન્યવેદયત્ સ્વં નિખિલં વિચેષ્ટિતમ્ ।
તતઃ કિરાતીવચનાનુવર્તિના કિરાતયૂનેત્થમબોધિ નિષ્કૃતિમ્ ॥ ૫૬॥

ન કર્મયોગૈર્ન તપશ્શતેન વા વિનેતુમંહસ્તવ વિપ્ર! પાર્યતે ।
દુરુત્તરં દુષ્કૃતમપ્યમું શિવં પ્રપદ્ય વર્ષૈસ્ત્રિભિરુત્તરિષ્યસિ ॥ ૫૭॥

ઇતીરયિત્વૈવ તિરોહિતં ક્ષણાદવેક્ષ્ય તદ્ દ્વન્દ્વમપાસ્તસંશયઃ ।
અવાલલમ્બે દૃઢમમ્બિકાસખં સ વિપ્રબન્ધુઃ શરણં શરીરિણામ્ ॥ ૫૮॥

જપાર્ચનધ્યાનનતિપ્રદિક્ષિણસ્તવૈઃ સ તિસ્રઃ શરદો નિરન્તરમ્ ।
પ્રસાદ્ય દેવં પ્રમથૈઃ પુરોકસાં સમક્ષમાનીયત શાઙ્કરં પુરમ્ ॥ ૫૯॥

વિશન્ પુરીમેવ વિધૂતપાતકઃ સકૃત્ પ્રણમ્યૈવ શિવં ગણોઽભવત્ ।
પરન્તુ વૈદેશિક એષ વત્સરાન્ પ્રતારિતસ્ત્રીનિતિ પૌરવાગભૂત્ ॥ ૬૦॥

અનુસ્મરન્ સ્વં ચરિતં વિસિષ્મિયે સ નીયમાનઃ પ્રમથૈઃ શિવાન્તિકમ્ ।
વિમૃષ્ટમર્મા તુ શિવે ન્યવેશયત્ તતસ્ત્રિવર્ષાર્ચનયાધમર્ણતામ્ ॥ ૬૧॥

અથાઙ્ગ ઇત્યસ્ત્રવિદાં પુરોગમો ગુરુર્ભટાનાં ખુરલીષુ વિશ્રુતઃ ।
બહૂન્ સમધ્યાપયદસ્ત્રસંહિતાં પ્રયોગસંહારરહસ્યકોવિદઃ ॥ ૬૨॥

બભૂવ શિષ્યેષ્વમિતેષુ સિદ્ધ ઇત્યભિખ્યયા કશ્ચન તસ્ય વલ્લભઃ ।
તમસ્ત્રશસ્ત્રેષુ વિશિષ્ય પુત્રવદ્ ગુરુર્વ્યનૈષીદવિદન્ દુરાશયમ્ ॥ ૬૩॥

સ દુર્મતિઃ સ્વં ગુરુમપ્રકાશયન્ પ્રકાશયન્ સ્વાં પટુતાં તદાહિતામ્ ।
અપિ સ્વશિષ્યા ઇતિ શસ્ત્રકોવિદાન્ ભટાન્ સતીર્થ્યાન્ પ્રલપંશ્ચચાર સઃ ॥ ૬૪॥

કદાચિદઙ્ગસ્ય સદા સદાશિવપ્રણામહેતોર્વસતઃ શિવાલયે ।
ઉપેત્ય ગેહં યુવતિં ચ તત્પ્રિયાં રહો જિઘૃક્ષન્નનયાવધીરિતઃ ॥ ૬૫॥

તમઙ્ગરૂપં પરિગૃહ્ય જાતુચિદ્ દુરાશયં દ્વન્દ્વરણે નિબર્હિતુમ્ ।
પુરાદ્ બહિઃ પશ્યતિ પૌરમણ્ડલે કૃપાણપાણિર્યુયુધેઽમુના હરઃ ॥ ૬૬॥

સ વઞ્ચયન્ વેગમમુષ્ય લીલયા કદાપિ મર્મ સ્વકમપ્રદર્શયન્ ।
અપક્રમાભિક્રમસમ્પ્લુતોપ્લુતૈર્વિચિત્રમીશો વ્યચરદ્ રણાઙ્ગણે ॥ ૬૭॥

અવસ્થિતઃ સ્થાણુવદગ્રતો રિપોર્નિપાતયન્નિશ્ચલમાયુધં ક્ષિતૌ ।
અપિ પ્રહારાઞ્છતશોઽસ્ય નિસ્સૃતાનવઞ્ચયત્ કિઞ્ચિદિવાઙ્ગકુઞ્ચનૈઃ ॥ ૬૮॥

હસન્નવજ્ઞામસૃણૈર્વિલોચનૈરવેક્ષમાણસ્તૃણવત્ તમુદ્ભટમ્ ।
કિમપ્યભિક્રમ્ય ચકાર હુઙ્કૃતૈઃ કૃપાણમુષ્ટિં શિથિલં સ વૈરિણઃ ॥ ૬૯॥

ઉદસ્યતીવાસિમધો નિપાતયત્યધો દધાતીવ નિહન્તિ મૂર્ધનિ ।
પ્રમત્તવત્ તિષ્ઠતિ નાભિગમ્યતે પરેણ તસ્યૈવમવર્ત્તતાહવઃ ॥ ૭૦॥

અસિં વિધુન્વન્ ભ્રમયન્નુદઞ્ચયન્ નિપાતયન્નિશ્ચલમાવહન્ પુનઃ ।

કરોઽસ્ય દુર્યોધમનોભયઙ્કરો નિમેષમપ્યૈક્ષત નૈકચેષ્ટિતઃ ॥ ૭૧॥

અવિક્ષતઃ ક્વાપ્યસિધેનુધારયા વિભિદ્ય તસ્યોદરમાહરન્ શિરઃ ।
પ્રકાશયન્નઙ્ગજયં દિશાં મુખે તિરોદધે તદ્વપુરિન્દુશેખરઃ ॥ ૭૨॥

અહો જિગાયાઙ્ગ ઇતિ પ્રશંસતાં તતો જનાનામવકર્ણયન્ ગિરઃ ।
વિસિષ્મિયેઽઙ્ગઃ શિવસન્નિધૌ વસન્નબુદ્ધતત્સઙ્ગરસઙ્ગથઃ સ્વયમ્ ॥ ૭૩॥

વિચિત્રમેતત્ કિલ વૃત્તમીશિતુઃ પ્રવૃત્તમઙ્ગે પરભક્તિશાલિનિ ।
ઇતિ સ્તુવન્તો મધુરૌકસઃ શિવાદનન્યમૈક્ષન્ત તમસ્ત્રકોવિદમ્ ॥ ૭૪॥

કિમેતદઙ્ગેન શિવે નિવેદિતં કિમન્તતો વેત્તિ સ તં વ્યતિક્રમમ્ ।
અહો દયાલુત્વમનઙ્ગહન્તુરિત્યભૂચ્ચલાનામપિ નિશ્ચલં મનઃ ॥ ૭૫॥

તતઃ સ કાલેન શશાઙ્કશેખરઃ સદારમેનં પ્રમથેષ્વયોજયત્ ।
તરન્તિ નાદ્યાપિ તપોધના દ્વિજાઃ ક ઈશ્વરાણામવધારયેન્મનઃ ॥ ૭૬॥

તદાદિ ભૂયશ્શિવભક્તિગૌરવે વિજૃમ્ભમાણે વિષયે મહીભુજઃ ।
તથાગતાઃ કેઽપ્યભિચર્ય પન્નગં ન્યયુઞ્જતોદ્દામવિષામિભીષણમ્ ॥ ૭૭॥

તમદ્રિકૂટપ્રતિમં મહોરગં સમાપતન્તં નૃપતિર્વિચારયન્ ।
પુરાદ્વિનિર્ગત્ય પુરાહિતં સ્મરન્ શરં શરાસે સમધત્ત દારુણમ્ ॥ ૭૮॥

મહેશભૂષાન્વયયોગશઙ્કિતઃ ક્ષણં વિનિશ્ચિત્ય સ માયિકં તતઃ ।
અતાડયત્ પન્નગપાશમાશુગૈઃ સ ચાવમત્ તદ્વ્યથયા વિષાનલમ્ ॥ ૭૯॥

હાલાહલેનેવ પુરા વિનિર્યતા વિષેણ તેન જ્વલતાભિતાપિતાઃ ।
જનાઃ ક્ષિતીશેન સમં સમાયયુઃ શરણ્યમીશં શરણં સમાકુલાઃ ॥ ૮૦॥

કૃતસ્મિતો નીપવનેશ્વરસ્તતઃ કિયત્તદસ્તીતિ ગિરા પ્રહર્ષયન્ ।
ઉપેત્ય લિઙ્ગાદુરગાન્તિકં ગતઃ સમન્તતઃ પ્રૈક્ષત શાન્તયા દૃશા ॥ ૮૧॥

તતઃ પુરૈવોન્મથિતે ફણાધરે ધરાધરત્વં પ્રતિપદ્ય તસ્થુષિ ।
વિષાગ્નિતપ્તાન્ મનુજાન્ દ્રુમાનપિ વ્યધત્ત દેવઃ કરુણામૃતાપ્લુતાન્ ॥ ૮૨॥

તથા ગતે ભોગિનિ ગાં સુદુર્જયાં તથાગતાઃ કાઞ્ચિદથાભિચારિકીમ્ ।
અકલ્પયઞ્જેતુમિમાં સમાદિશદ્ દયાનિધિર્વાહવૃષં વૃષધ્વજઃ ॥ ૮૩॥

સ તુઙ્ગશ ૃઙ્ગવ્યતિષઙ્ગનિર્દલદ્ઘનાઘનસ્રસ્તઘનામ્બુવૃષ્ટિભિઃ ।
ખુરક્ષતક્ષોણિરજઃ શમં નયન્ મહાવૃષઃ પ્રાસ્થિત તજ્જિગીષયા ॥ ૮૪॥

પદૈઃ સ યદ્ ધ્યાનતપોધ્વરાંહતિપ્રભેદભિન્નૈર્વિદદાર મેદિનીમ્ ।
રજોભિરુદ્ધૂલિતસર્વવિગ્રહા બભૂવુરેતત્પ્રભવૈર્મહર્ષયઃ ॥ ૮૫॥

વૃષસ્તદુદ્ધૂય વિષાણયોર્યુગં પ્રસહ્ય તસ્યા હૃદયં બિભેદ ગોઃ ।
જરદ્ગવીનાં હૃદયં વિવિચ્યતે યદન્તરાશ્ચર્યગવાક્ષ વર્ત્મના ॥ ૮૬॥

સ તાં પતન્તીમવનીધરાત્મના સમીક્ષ્ય શૈલઃ સ્વયમપ્યભૂદ્ વૃષઃ ।
ઉદગ્રશ‍ૃઙ્ગઃ પુરમુત્તરેણ યો વિરાજતેઽદ્યાપિ વૃષાચલાખ્યયા ॥ ૮૭॥

તતઃ કુમારં કુલભૂષણાભિધં તપોભિરાસાદ્ય કુલાહવિક્રમમ્ ।
તદર્પિતાશેષધુરો ધરાપતિઃ પદં પ્રપદે પરમૈન્દુશેખરમ્ ॥ ૮૮॥

ગામ્ભીર્યેણ નિષઙ્ગતાં વિશિખતાં ધર્મદ્રુહાં નિગ્રહા-
    દુશ્છાયેણ શરાસતાં કટકતામુચ્ચાવચૈર્વાઙ્મુખૈઃ ।
વિશ્વેષામનુરઞ્જનૈરનુપમૈરુત્તંસતામપ્યસૌ
    બિભ્રાણઃ કુલભૂષણઃ કુલપતિં દેવઃ સિષેવે શિવમ્ ॥ ૮૯॥

ઇતિ મહાકવિશ્રીનીલકણ્ઠદીક્ષિતપ્રણીતેષોડશઃ સર્ગઃ ।

## અથ સપ્તદશઃ સર્ગઃ ।

કુલભૂષણસ્તદનુ ભૂમિપતિઃ કુલદૈવતસ્ય મધુરાધિપતેઃ
ચરણં સદા પરિચરન્નશિષચ્ચતુરર્ણવીવલયિતામવનિમ્ ॥ ૧॥

અજનિષ્ટ સુન્દર ઇતિ પ્રથિતો નૃપતેરમુષ્ય પૃતનાધિપતિઃ ।
અતનિષ્ટ ભક્તિમયમષ્ટવિધામપિ સુન્દરેશપદપઙ્કજયોઃ ॥ ૨॥

અભિષેણનાય કૃતસન્નહને શબરેશ્વરે બલિનિ ચેદિપતૌ ।
ભટસઙ્ગ્રહાય સ બહુ દ્રવિણં પ્રદદૌ ચમૂપતિવશે નૃપતિઃ ॥ ૩॥

સ શિવે નિવેદ્ય શબરેન્દ્રજયે પ્રતિભૂર્ભવાનવનિભર્તુરિતિ ।
અવિચિન્ત્ય કિઞ્ચિદપિ પર્યચરદ્દ્રવિણૈસ્તુ તૈર્દ્રવિણનાથસખમ્ ॥ ૪॥

અતિનૂત્નમાતનુત ધામ વિભોઃ સ સુધાર્પણસ્ફુટિતસઙ્ઘટનૈઃ ।
રથમૂર્જિતં ક્ષિતિરથસ્ય હયાન્ કરિણશ્ચ કાઞ્ચનમયાનકરોત્ ॥ ૫॥

બલમાનયેયમિતિ મન્ત્રિવરાન્ બહુધા તુ સોઽતિસમધત્ત ગિરા ।
કુલભૂષણાય પરિપૃષ્ટવતે કથયામ્બભૂવ પૃતનાં મિલિતામ્ ॥ ૬॥

સચિવોદિતશ્રવણજાતરુષં નૃપમિઙ્ગિતૈસ્સમવબુદ્ધ્ય તતઃ ।

બહિરાનિનાય સ મહીરમણં બલદર્શનાય સહ તૈઃ પિશુનૈઃ ॥ ૭॥

સમયે શશાઙ્કશકલાભરણઃ સહિતો ગણૈર્મનુજરૂપધરૈઃ ।
સ્વયમાજગામ પૃતનારજસા સ્થગયન્ દિશશ્ચ વિદિશશ્ચ પુરઃ ॥ ૮॥

રથવાજિસિન્ધુરપદાતિભિદાપ્રવિભક્તમપ્યુપસમેત્ય મિથઃ ।
ચલિતં બલં નૃપતિના દદૃશે ચતુરમ્બુરાશિસમવાય ઇવ ॥ ૯॥

અસિચર્મચાપશરકુન્તગદાપરિઘત્રિશૂલનલિકાદિકરામ્ ।
અતિભીષણાકૃતિમદૃષ્ટચરીં પરિપશ્યતિ સ્મ સ પદાતિચમૂમ્ ॥ ૧૦॥

પ્રલયાન્તઘોરપવનાભિહતપ્રચલદ્ધરાધરકુલપ્રતિમમ્ ।
પ્રસમીક્ષ્ય તં મદગજપ્રકરં પરિદુદ્રુવુર્નરપતેઃ કરિણઃ ॥ ૧૧॥

કરભોષ્ટ્રપુઙ્ગવકરીન્દ્રધૃતૈર્વિવિધાયુધોપકરણૈશ્ચ રથૈઃ ।
વિવિધધ્વજૈર્ધુરિ વિભોશ્ચલિતા રથિકાઃ શિલાદતનયપ્રમુખાઃ ॥ ૧૨॥

કુરુવિન્દકજ્જલકુસુમ્ભનિશાશરકાણ્ડવાસવશરાસરુચઃ ।
મસૃણોન્નતાંસલમહાહનવસ્તુરગાઃ પ્રચેલુરથ તસ્ય પુરઃ ॥ ૧૩॥

સુરવાહિનીલહરિશુભ્રપટીપરિવીતમૌલિરસિચર્મધરઃ ।
પરિનયંસ્તુરગમિન્દુધરો નિરગાદનાદિરપિ સાદિવપુઃ ॥ ૧૪॥

અસકૃદ્વિરિઞ્ચમુખમન્દુરિકાકુતુકાદિવોત્પતિતુમભ્રપથે ।
ત્વરમાણમાગમતુરઙ્ગવરં શમયન્નિગાલકરઘટ્ટનયા ॥ ૧૫॥

હયમુત્પતન્તમિષુવ દ્રભસાદવરુદ્ધ્ય સવ્યમપસવ્યમપિ ।
ભ્રમયન્નયન્નલવમૂરુયુગદ્રઢિમૈકદેશહતદુર્વિનયમ્ ॥ ૧૬॥

અભિગચ્છતિ ક્ષિતિભૃતિ સ્વયમપ્યભિગમ્ય મૂર્ત્ત ઇવ વીરરસઃ ।
અવધૂય ખડ્ગમવરુદ્ધ્ય હયં પ્રણનામ તં પ્રણતમેષ પુરઃ ॥ ૧૭॥

અવિતર્ક્યવૈભવમદૃષ્ટચરં તમવેક્ષ્ય તામપિ ચમૂં મહતીમ્ ।
તદુદારરૂપહૃતવાઙ્મનસઃ ક્ષણમાસ્ત પાણ્ડ્યનૃપતિસ્સ્તિમિતઃ ॥ ૧૮॥

વચનૈરમું પ્રકટિતપ્રણયૈર્વસનૈર્વિભૂષણગણૈશ્ચ નૃપઃ ।
પરિતોષયન્ પ્રતિમુહુઃ પ્રણમન્ પરિષસ્વજે દૃઢમભીક્ષ્ણમપિ ॥ ૧૯॥

મશકં વિજેતુમનુચિન્તયતા મદસિન્ધુરોઽયમુપલબ્ધ ઇતિ ।
કથયન્ નૃપશ્ચરમુખાદશ◌ૃણોન્મૃગયાસુ સિંહનિહતં વિમતમ્ ॥ ૨૦॥

અથ પાર્થિવઃ પ્રમુદિતસ્તમસાવનુમન્યતે સ્મ શિબિરાય યદા ।
સ તિરોદધે સતુરગઃ સબલો ગિરિશસ્તદૈવ ધુરિ ભૂમિભુજઃ ॥ ૨૧॥

તદવેત્ય કેલિષુ કુતૂહલિનો મધુરેશ્વરસ્ય મહિમાયમિતિ ।
પિશુનાન્ નિગૃહ્ય પૃતનાધિપતિં બહુમન્યતે સ્મ બહુધા નૃપતિઃ ॥ ૨૨॥

નિખિલં પુરા નિજધનં ગિરિશે વ્યયિતં યથા કિલ ચમૂપતિના ।
સકલં તથા વ્યયિતુમેવ નૃપશ્ચકમે તદાદિ મધુરાધિપતૌ ॥ ૨૩॥

ગજવાજિગોમહિષધાન્યધનક્ષિતિભૃત્યમિત્રસુતદારમુખમ્ ।
સકલં શિવાય ન મમેતિ વદન્ ક્રતુનારરાધ મહતાથ શિવમ્ ॥ ૨૪॥

અવલોક્ય રિક્તમથ કોશગૃહં નૃપતેર્દયાનિધિરનઙ્ગરિપુઃ ।
ધનમક્ષયં વિતરતિ સ્મ તથા સ યથા ન પારયતિ તદ્ વ્યયિતુમ્ ॥ ૨૫॥

ધનમક્ષયં ધનપતેર્દિશતો વિગતા શિવસ્ય નહિ ભિક્ષુકતા ।
કુલભૂષણેઽથ તુ તદર્પયતઃ સદનં સુવર્ણમણિચિત્રમભૂત્ ॥ ૨૬॥

અથ કન્યકાઃ કિલ કુલેષુ વિશામતિસુન્દરેણ વપુષા શતશઃ ।
અલભન્ત જન્મ મધુરાનગરે સમયેન શઙ્કરકથાનિરતાઃ ॥ ૨૭॥

પરપુંસિ દારુવનચારાઇણ યાઃ પરમં બબન્ધુરભિલાષભિમાઃ ।
મુનિસુભ્રુવો હિ પતિશાપવશાદભજન્ વિશાં પુનરપત્યદશામ્ ॥ ૨૮॥

અથ તાસુ તત્ર કલિતાવતરે તરુણિમ્નિ વૈશ્યતનયાસુ શનૈઃ ।
મનસિ સ્મરસ્મરજિતૌ યુગપત્ સુહૃદાવિવ પ્રવિશતઃ સ્મ તદા ॥ ૨૯॥

અથ વૈશ્યવીથિષુ વણિક્તરુણો વિમલામ્બરો વિવિધભૂષણભૃત્ ।
અતિસુન્દરો વલયવિક્રયિણામવલમ્બ્ય રૂપમચરદ્ ગિરિશઃ ॥ ૩૦॥

વિતથેષુ પુષ્પવિશિખેષુ શિવે વલયાયુધાનિ બહુધા કલયન્ ।
અયમાલિ! સઞ્ચરતિ પઞ્ચશરો ન મૃષેતિ તત્ર જગદુઃ સુદૃશઃ ॥ ૩૧॥

વણિજસ્તતો વલયવિક્રયિણો ભવતિ સ્મ વૈશ્યસુદૃશાં ચ તદા ।
ઇતરેતરાશયચમત્કરણી સરસા વચઃપ્રતિવચસ્સરણિઃ ॥ ૩૨॥

વિતરન્તુ પક્વમિહ તાલફલં યદિ વાપિ જમ્ભલફલં વિપુલમ્ ।
વલયાનિમાન્ દધતુ વામદૃશઃ કનકેન કિં મમ ગિરૌ વસતઃ ॥ ૩૩॥

ક્વ નુ કાઞ્ચિદેશમપહાય ગતિર્મમ વઃ કદાચિદિતિ મત્સવિધે ।
અધરેદ્યુરુક્તમધુના તુ કથં વસતિં નિજામભિદધાસિ ગિરૌ ॥ ૩૪॥

અતનુજ્વરાદભિહતોઽસ્મિ ચિરાત્ તૃષિતોઽસ્મિ કાપિ યદિ બિમ્બફલૈઃ ।
તરુણી ભિષજ્યતિ મમાર્ત્તિમિમાં પથિકસ્ય મે ભવતિ સા શરણમ્ ॥ ૩૫॥

ઉચિતોપયોગવિરહાદફલં વિતરામિ તાવદિહ બિમ્બફલમ્ ।
મદનાશ્રવસ્ય પરિતશ્ચરતો ભવતઃ કથં ભવતુ વિજ્વરતા ॥ ૩૬॥

સુદૃઢાસ્તવૈવ કરયોરુચિતા ઇતિ યે ત્વયા સુઘટિતા વલયાઃ ।
ત્વયિ નિર્ગતે સપદિ તૈર્ગલિતં વચનં કથં નુ તવ વિશ્વસિમઃ ॥ ૩૭॥

વલયાન્ પ્રદાય કરિદન્તમયાન્ ન મણિર્ન કાઞ્ચનમયાચિ મયા ।
અપિ કાઞ્ચિકાર્થનમભૂદ્ વિફલં ત્વયિ મે પ્રતિશ્રુતમપીહ કથમ્ ॥ ૩૮॥

મમ દેહિ વિદ્રુમમયાન્ વલયાન્ મમ દેહિ વિદ્રુમમણિં પ્રથમમ્ ।
મમ દેહિ દન્તવલયાન્ વિમલાંસ્તવ તન્વિ! વેદ્મિ ન હિ દન્તપદમ્ ॥ ૩૯॥

ઇતિ સઁલ્લપન્ સરસમિન્દુધરો વિચરન્ ગૃહેષુ વિવિધેષુ વિશામ્ ।
કરપલ્લવવ્યતિકરેણ તદા સફલીચકાર જનનં સુદૃશામ્ ॥ ૪૦॥

અથ તા મુનીન્દ્રદયિતા ન ચિરાત્ તનયોપલમ્ભમુદિતાઃ શતશઃ ।
પરિમૃષ્ટશાપકલુષાઃ પ્રમથૈર્ગિરિશો નિનાય કલધૌતગિરિમ્ ॥ ૪૧॥

સ કદાચિદાસ્ત વટમૂલતલે સનકાદિભિઃ શમધનૈર્નિયતૈઃ ।
અણિમાદિસિદ્ધિકૃતમદ્રિસુતાચરણાર્ચનોપનિષદં કથયન્ ॥ ૪૨॥

ઉપદેશમેનમતિભક્તિવશાદુપશ‍ૃણ્વતાં શમવતાં સવિધે ।
અપિ યક્ષિણીરનવધાનપરાઃ કુપિતઃ શશાપ કુમુમાસ્ત્રહરઃ ॥ ૪૩॥

ક્વચિદત્ર પાણ્ડ્યવિષયે વિપિને વિજને તલે વટતરોર્મહતઃ ।
ઉપલત્વમેત્ય વસતેતિ તતઃ પ્રસસાદ તાભિરસકૃત્ પ્રણતઃ ॥ ૪૪॥

સ સમાઃ સહસ્રમતિલઙ્ઘ્ય તતઃ પરિગૃહ્ય દેશિકતનું ગિરિશઃ ।
અણિમાદિસિદ્ધિમનુગૃહ્ય પુનર્નયતિ સ્મ યક્ષવનિતાસ્ત્રિદિવમ્ ॥ ૪૫॥

કુલભૂષણોઽપિ ધરણીરમણઃ શફરેક્ષણાપહચરાર્ચનયા ।
અથ રાજપૂર્વપદમિન્દ્રમસૌ લભતે મ્મ શિક્ષિતનયં તનયમ્ ॥ ૪૬॥

અપિ રાજસિંહ ઇતિ કશ્ચિદભૂદનુજોઽસ્ય દુર્વિષયલુપ્તમતિઃ ।
સમનન્તરં પિતુરયં સહજં સુતવદ્ રરક્ષ તમપિ ક્ષિતિપઃ ॥ ૪૭॥

સમયેઽત્ર ચોલનૃપતિઃ પ્રથિતઃ કુલશત્રુરસ્ય કિલ પાણ્ડ્યવિભોઃ ।

મધુરેશદર્શનકુતૂહલિના મનસાન્વતપ્યત તપાંસિ ચરન્ ॥ ૪૮॥

સ્વપને કદાચિદથ ચોલનૃપં પ્રતિબોધ્ય ગૂઢમુપયાતમિમમ્ ।
વિઘટય્ય ગોપુરકવાટયુગં નિજમાનિનાય નિશિ ધામ શિવઃ ॥ ૪૯॥

સ નિમજ્જ્ય હેમનલિનીસલિલે પ્રણિપત્ય મીનનયનાગિરિશૌ ।
તદનુગ્રહેણ નગરાચ્ચ બહિર્નિરગાત્ તદૈવ નિશિ ચોલનૃપઃ ॥ ૫૦॥

સ પુનશ્ચ ગોપુરકવાટયુગં ઘટયઞ્છિવો વૃષભમુદ્રિકયા ।
પરિચિહ્નયન્ મનસિ પાણ્ડ્યવિભોરતનિષ્ટ સંશયમભેદ્યતરમ્ ॥ ૫૧॥

સ પરેદ્યુરાપ્તસચિવૈર્વિમૃશન્નપિ કિઞ્ચિદધ્યવસસો ન યદા ।
નૃપતિસ્તદા નિખિલમોહહરં શરણં યયૌ શશિકલાભરણમ્ ॥ ૫૨॥

અપદાનમેતદધિગત્ય નૃપઃ સકલં ગિરા ગગનસમ્ભવયા ।
સખિતામિયેષ ગુણગૃહ્યતયા સ તદૈવ ચોલધરણીપતિના ॥ ૫૩॥

અથ રાજસિંહનૃપતિર્નૃપતેરનુજો વિગૃહ્ય કિયદપ્યપદે ।
ઉપયમ્ય ચોલનૃપતેસ્તનયામપિ તેન સખ્યમકરોત્ સુદૃઢમ્ ॥ ૫૪॥

અથ તૌ સમેત્ય મધુરાનગરીમભિજગ્મતુર્બહુચમૂસહિતૌ ।
દદૃશે નિદાઘસમયોઽપિ તદા પરિશોષયન્ સલિલશબ્દમપિ ॥ ૫૫॥

અપિ શુષ્યતિ ત્રિદિવસિન્ધુજલે તૃષયા હતેષુ તુરગેષુ ભૃશમ્ ।
ગતિમાન્દ્યતો ગગનસીમ્નિ રવર્દિવસેષુ દૈર્ઘ્યમજનિષ્ટ તદા ॥ ૫૬॥

તપને જગત્ તપતિ નિષ્કરુણં સમયે સમસ્તમયશો નિહિતમ્ ।
સચિવઃ ખલઃ શિથિલયન્ પ્રકૃતીર્નૃપતિં કિલાપદિ નિમજ્જયતિ ॥ ૫૭॥

બિતતેષુ વિશ્વજયિનઃ કુસુમેષ્વતનોઃ શિરીષમવશિષ્ટમિદમ્ ।
તદપિ પ્રણશ્યતુ કિમસ્ય ગતં પ્રભવોઽપિ કિં પરમુખાદરિણઃ ॥ ૫૮॥

કુચકુમ્ભમેવ મદનઃ સુદૃશામવલમ્બ્ય પૂર્વમજયદ્ ભુવનમ્ ।
અધુનાપિ ચેત્ સ કુશલી તદલં કિમનેન ધર્મહતકેન શુના ॥ ૫૯॥

અવિચારિતારિસમમિત્રકથે સમયે જગત્ તપતિ દુર્લલિતે ।
મદનસ્તદાશુગહતાશ્ચ સમં શરણં યયુઃ સ્તનગિરિં સુદૃશામ્ ॥ ૬૦॥

મદને પ્રવર્ત્તયતિ વારયતિ શ્રમવારિશીકરકિરે સમયે ।
અલભન્ત કામિષુ ગતાગતિકામસકૃચ્ચરા ઇવ દૃશઃ સુદૃશામ્ ॥ ૬૧॥

અનવેક્ષ્ય નાથમિયમમ્બુજિની શિશિરે યદાસ્ત વિદિતં કિલ તત્ ।
પરયા શ્રિયા જ્વલતિ તત્ર રવૌ કથમદ્ય જીવનકથાપિ ગતા ॥ ૬૨॥

વિકચેષુ સૂરકિરણોષ્મભિયા મુકુલીકૃતેષુ ચ નિવાતતયા ।
કમલોદરેષુ શયિતું ભ્રમરો ન શશાક તપ્તમધુસેવનતઃ ॥ ૬૩॥

અપિ નારિકેલસલિલેક્ષુરસૈરજહત્ તૃષો રવિકરક્વથિતૈઃ ।
અપિબન્નહઃપરિણતૌ સુદૃશામધરં પ્રિયાઃ પ્રણયશીતલિતમ્ ॥ ૬૪॥

કરિણોઽપિ કર્ણવલયાનસકૃચ્ચલયામ્બભૂવુરનિલાય મુધા ।
વવૃતે ન ફૂત્કૃતિષુ વામદૃશાં વ્યજનેઽપિ લુપ્ત ઇવ ગન્ધવહઃ ॥ ૬૫॥

અનવગ્રહૈરપરદિક્પવનૈઃ સમુદસ્યમાનમપદિશ્ય રજઃ ।
સલિલાશયા મરુમરીચિષુ કિં ધરણી દિગન્તમગમત્ તૃષિતા ॥ ૬૬॥

અતિચણ્ડપશ્ચિમસમીરહૃતૈરભિતોઽપિ તિગ્મમહસઃ કિરણૈઃ ।
અનુષઞ્જિતા ઇવ વનાવલયો દવસઙ્ગતા દદૃશિરે શતશઃ ॥ ૬૭॥

સરસીષુ પલ્વલદશા દદૃશે ભુવિ પલ્વલેષ્વપિ ચ શાડ્વલતા ।
અપિ શાડ્વલેષુ ચિરજાઙ્ગલતા પરતો વયં ન વદિતું પ્રભવઃ ॥ ૬૮॥

પવનેન સંવલિત એવ શિખી પરિજૃમ્ભતે ન પરથેત્યયશઃ ।
પરિમાર્ષ્ટુમેવ પવને વિરમત્યદહદ્ વનં વનમહો દહનઃ ॥ ૬૯॥

ક્વથિતં જલં ક્ષિતિતલં જ્વલિતં મરુતશ્ચ મુર્મુરકિરઃ પરિતઃ ।
ગગનં ચ દુર્વિષહમર્કકરૈરિતિ પર્યણંસ્ત જગદગ્નિમયમ્ ॥ ૭૦॥

અપનીય કઞ્ચુકમહર્વિરમે મરુદાશયા રહસિ મુગ્ધવધૂઃ ।
સમવસ્થિતાઃ સમુપલભ્ય હઠાત્ પરિરેભિરે સુકૃતિનસ્તરુણાઃ ॥ ૭૧॥

રજનીમુખાહૃતમૃણાલલતાદલયૈઃ શશાઙ્કકિરણસ્નપિતૈઃ ।
ઉષસિ સ્વયં પ્રિયતમોપહૃતૈઃ સરસીષ્વવર્તયત ચક્રગણઃ ॥ ૭૨॥

ઇયતાપિ તાવદિદમાપતિતં પ્રલયં તરેમ પયસેતિ દૃઢમ્ ।
અવગત્ય યત્ર શફરૈરુષિતં લુલિતં સરસ્તદપદે મહિષૈઃ ॥ ૭૩॥

અવગાહ્ય પદ્મમકરન્દઝરીષ્વહિમદ્યુતાવનુદિતે ભ્રમરાઃ ।
અજપન્નુપાંશુ કૃતઝઙ્કરણા મદનાપમૃત્યુહરમન્ત્રમિવ ॥ ૭૪॥

ધૃતમલ્લિકાકુસુમહારલતા, ઘનસારચન્દનરસાર્દ્રકુચાઃ ।
વનિતા દુકૂલવસનાભરણાસ્તરુણાનુપાસત દિનાપગમે ॥ ૭૫॥

કટકં પ્રવિષ્ટવતિ ચણ્ડકરે કટકં તદવ્યથત ચોળપતેઃ ।
વવૃધે તુ પાણ્ડ્યનૃપતેઃ સમયે મહસાં નિવેરિવ મહઃ પરુષમ્ ॥ ૭૯ ॥

અથ સુન્દરેશમભિવન્દ્ય નૃપઃ કલયન્ પ્રસાદબલમસ્ય બલમ્ ।
નિરગાદ્યથોપનતસૈન્યવૃતો નગરાદરાતિવિજયાય તદા ॥ ૭૭ ॥

ચિરસમ્પ્રરૂઢદૃઢમત્સરયોરજનિષ્ટ જન્યમથ તત્ર તયોઃ ।
અપિ વિસ્મયાય હૃદિ યદ્ દ્યુસદામપિ નારદસ્ય યદલમ્મતયે ॥ ૭૮ ॥

અસિકુન્તશૂલપરશુચ્છુરિકાપરિઘાભિઘાતવિગલદ્રુધિરમ્ ।
અવિચારિતસ્વપરસૈન્યમભૂત્ પ્રથનં તદસ્થિરજયાપજયમ્ ॥ ૭૯ ॥

સમરે ભુજાભુજિ કચાકચિ ચ પ્રહરદ્વયં ચલતિ તદ્બલયોઃ ।
તદવેક્ષિતું ગગનમધ્યતલં રવિરધ્યરોહદતિતુઙ્ગમિવ ॥ ૮૦ ॥

મધુમાસપુષ્પિતપલાશવનપ્રતિમં તુરઙ્ગખુરધૂલિવૃતમ્ ।
તદુદન્યયા પરુષયાભિહતં બલયોર્દ્વયં સમમભૂદ્ વિરતમ્ ॥ ૮૧ ॥

પરિપૂરિતાં શિશિરકુમ્ભશતૈર્વિપુલાં પ્રપાં ક્વચન પાણ્ડ્યબલે ।
અધિરુહ્ય મૌલિસરિદમ્બુભરૈસ્તૃષિતાનતર્પયત ભૂતપતિઃ ॥ ૮૨ ॥

કરુણામૃતેન મધુરાધિપતેર્મધુરૈશ્ચ મૌલિતટિનીસલિલૈઃ ।
પરિપોષિતાઃ સપદિ પાણ્ડ્યભટાઃ પુનરાહવાય મતિમાદધિરે ॥ ૮૩ ॥

અથ સિંહનાદમુખરા યુગપન્નૃપતેર્ભટાઃ પરિનિપત્ય રણે ।
સહ રાજસિંહધરણીપતિના જગૃહુઃ કરે સપદિ ચોલનૃપમ્ ॥ ૮૪ ॥

જયં સમાસાદ્ય નિવર્તમાનઃ પ્રપાં પુનઃ ક્વાપ્યનવેક્ષમાણઃ ।
રાજેન્દ્રપાણ્ડ્યો મધુરેશ્વરસ્ય લીલાયિતં તત્ કલયામ્બભૂવ ॥ ૮૫ ॥

સખ્યં પ્રદાય મધુરેશ્વરભક્તિયોગાત્ સત્કૃત્ય ચોલનૃપતિં વિસસર્જ પાણ્ડ્યઃ ।
તં રાજસિંહમપિ દુર્મદમુન્મદિષ્ણું ભ્રાતેતિ જાતકરુણો બિભરામ્બભૂવ ॥ ૮૬ ॥

અમ્ભોભિઃ કેવલૈરપ્યવનિપતિચમૂં તર્પયન્ જાતુ તસ્માં
ખ્યાતિં ધત્તે યદીશઃ કિયદિવ ન યશો નિત્યમન્નપ્રદાયાઃ ।
દેવ્યા મીનેક્ષણાયા ઇતિ નગરજુષામદ્ભુતાન્ ભક્તિવાદાન્
શ‍ૃણ્વન્ રાજેન્દ્રપાણ્ડ્યઃ સકલમપિ મહીચક્રમેકઃ શશાસ ॥ ૮૭ ॥

તતો રાજેશપાણ્ડ્યોઽભૂદ્રાજગમ્ભીર ઇત્યતઃ ।

પુરુહૂતજિદપ્યસ્માદસ્માદાસીત્ કુલધ્વજઃ ॥ ૮૮॥

સુન્દરેશપ્રસાદેન સુન્દરેશાઙ્ઘ્રિશેખરઃ ।
તતો જજ્ઞે યતો જજ્ઞે તારેન્દુવિમલં યશઃ ॥ ૮૯॥

ઇતિ મહાકવિશ્રીનીલકણ્ઠદીક્ષિતપ્રણીતે શિવલીલાર્ણવે સપ્તદશઃ સર્ગઃ ।

## અથ અષ્ટાદશઃ સર્ગઃ ।

સ હયાન્ સહસ્રમયુતં ભટોત્તમાન્ કરિણઃ શતં દશ મહારથાનપિ ।
પરિગૃહ્ય સૈન્યમુચિતં વ્યયં ચરન્નવશિષ્ટમન્યદખિલં શિવે દદૌ ॥ ૧॥

અથ ધામ્નિ પુષ્પવનનામ્નિ ધૂર્જટેરવિદૂરવર્તિનિ કદમ્બકાનનાત્ ।
અજનિષ્ટ કાપિ કિલ હેમનાયિકેત્યભિવિશ્રુતા જગતિ રુન્દ્રકન્યકા ॥ ૨॥

શિવભક્તપૂજનપરા શિવવ્રતા શિવબિમ્બમેકમખિલોત્સવોચિતમ્ ।
પરિકલ્પ્ય સિક્થકમયં પ્રચક્રમે પરિશુદ્ધતામ્રકણસઞ્ચયાય સા ॥ ૩॥

અથ નાચિરાદનુપલબ્ધસાધના દધતી તમેવ સુદૃઢં મનોરથમ્ ।
મધુરેશમેવ ધૃતસિદ્ધવિગ્રહં મદિરેક્ષણાલભત ભાગ્યતોઽતિથિમ્ ॥ ૪॥

પ્રણિપત્ય તં પરિચરન્ત્યનેકધા રસસિદ્ધિદર્શનપરેણ તેન સા ।
અનુકમ્પિતા સકલમાયસં ગૃહે ભસિતેન તસ્ય નયતિ સ્મ હેમતામ્ ॥ ૫॥

કૃતવિસ્મયાથ ગિરિશે તિરોહિતે પરિકલ્પ્ય તાં પ્રતિકૃતિં હિરણ્મયીમ્ ।
અવલમ્બ્ય ગણ્ડતલમઙ્ગુલીમુખૈઃ પરિચુમ્બતિ સ્મ ગણિકાતિસુન્દરમ્ ॥ ૬॥

અધુનાપિ તન્નખપદં યદીક્ષ્યતે વિમલે કપોલફલકે મહેશિતુઃ ।
શ્રમવારિલેશવતિ તત્ર સઙ્ગતં શકલં વિધોરિવ જટાપરિચ્યુતમ્ ॥ ૭॥

અપિ યન્મહાક્રતુભિરાપ્તદક્ષિણૈરપિ વા ત્રયીપરિચયૈરહર્નિશમ્ ।
અનવાપ્યમસ્તિ પદમૈન્દુશેખરં તદવાપ સા તદનુકમ્પિતા તતઃ ॥ ૮॥

ગજવાજિયોધરથયૂથભીષણાં પરિગૃહ્ય ચોલનૃપતૌ પતાકિનીમ્ ।
અભિગચ્છતિ સ્વયમનન્યસાધનઃ શિવમારરાધ શિવપાદશેખરઃ ॥ ૯॥

તમુવાચ વાગથ નભસ્સમુદ્ભવા ન બિભીહિ તસ્ય મહતી ચમૂરિતિ ।
અભિષેણય ત્વમરિમલ્પસૈનિકો વિજયસ્તવૈવ ભવિતેતિ પાર્થિવમ્ ॥ ૧૦॥

અથ પાણ્ડ્યમલ્પબલમભ્યયાત્ બલી સરિતં સમુદ્ર ઇવ ચોલપાર્થિવઃ ।
નૃપતિશ્ચ નિશ્ચલમતિર્વ્યવસ્થિતઃ કલયન્ પુરઃ કનકશૈલકાર્મુકમ્ ॥ ૧૧॥

અથ યુદ્ધમુદ્ધતમવર્ધત ક્ષણાદ્ દૃઢરૂઢગૂઢતરવૈરયોસ્તયોઃ ।
અસિપાતપાટિતપતન્મતઙ્ગજસ્રવદસ્રસિન્ધુહૃતસૈન્ધવવ્રજમ્ ॥ ૧૨॥

નિશિતેષુ તત્ર નિપતત્સુ સાયકેષ્વભિતો ભયાદતિવિદૂરવર્તિનઃ ।
નિહતાન્ હયદ્વિપભટાન્ નિનીષવો મુહુરાહ્વયન્ યમભટાઃ પ્રસાન્ત્વનૈઃ ॥ ૧૩॥

વપુરાનિલં ન પિશિતાશનક્ષમં યદિ પાર્થિવં શરશતૈર્વિભેત્સ્યતે ।
ઇદમુત્તરેમ કથમર્થકૃચ્છ્રમિત્યવલન્ત દૂરમભિતઃ પિશાચિકાઃ ॥ ૧૪॥

પ્રથમં હતા યુધિ દિવં સમુદ્ગતાઃ પુનરર્ધવર્ત્મનિ શરૈર્નિપાતિતાઃ ।
પુનરુદ્ગતા દ્વિગુણભાગભાજિનઃ કતિચિદ્ ભટા દિવિ કૃતાઃ સુધાશનૈઃ ॥ ૧૫॥

અગૃહીતશક્તિકતયા મિથઃ કથાસ્વવબદ્ધમૌનકૃતહસ્તચેષ્ટિતાઃ ।
અમરસ્ત્રિયો રણહતાશ્ચ તદ્ભટાઃ પશુવત્ સુખં નિખિલમપ્યભુઞ્જત ॥ ૧૬॥

ધવલાતપત્રવલયાશ્ચકાશિરે રદનાશ્ચ મત્તકરિણાં નિપાતિતાઃ ।
યશસો દિગન્તમભિપૂરયિષ્યતઃ પ્રથમોદ્ગતા રણતલેઽઙ્કુરા ઇવ ॥ ૧૭॥

તુરગૈઃ સમં તુરગસાદિનો હતા દિવમુદ્યયુઃ સમધિરુહ્ય તાન્ પુનઃ ।
અતિસાહસેન દિવમભ્યુપેયુષામપિ વાહ્યવાહકદશા ન શામ્યતિ ॥ ૧૮॥

અવભિદ્ય બિમ્બમહિમદ્યુતેર્દિવં પ્રતિ ગચ્છતાં યુધિ ભટાશ્ચદન્તિનામ્ ।
ગણનામમર્ત્યગણકા વિતેનિરે ચરમાઙ્ગસીમ્નિ નિભૃતા વિવસ્વતઃ ॥ ૧૯॥

શરપઞ્જરસ્થગિતભૂનભોન્તરે સમારાઙ્ગણે ઘનતમસ્સમાવૃતે ।
અભિસારિકેવ વિજયેન્દિરા ચરન્ત્યવૃણીત તં તમવિશેષદર્શિની ॥ ૨૦॥

બલયોર્દ્વયોરપિ મદોદ્ભટા ભટા બહવસ્તથા રણમુખે નિપાતિતાઃ ।
સકલં યથાજનિ પુરં શતક્રતોર્હૃતદારમન્દિરવિમાનભૂષણમ્ ॥ ૨૧॥

હતશિષ્ટમલ્પમવલોકયન્ બલં પ્રચચાલ પાણ્ડ્યનૃપતિર્યદા પુરઃ ।
તરસાવપત્ય હયસાદિરૂપતઃ પુરતશ્ચચાલ પુરશાસનસ્તદા ॥ ૨૨॥

પરુષં રુષા પરિરટન્ કરેણ ચ ભ્રમયન્ યુધિ ત્રિશિખમુન્મિષચ્છિખમ્ ।
પ્રચલન પદાનિ કતિચિત્ પુરાહિતઃ શિથિલીચકાર નિખિલં બલં દ્વિષામ્ ॥ ૨૩॥

અપવિદ્ધકુન્તલમચિન્તિતાટવીસલિલાનલપ્રદરગર્ત્તકણ્ટકમ્ ।
અનવેક્ષિતસ્વજનમાનશે દિશો બધિરન્ધમૂકમિવ તદ્ બલં દ્વિષામ્ ॥ ૨૪॥

સહ ધાવતો નિજજનાન્ પરભ્રમાદભિગમ્ય કેચિદભયં યયાચિરે ।

અપરે ક્ષતાઃ સ્મ ઇતિ મૂર્ચ્છિતાઃ સ્વયં ક્ષતજોક્ષિતાન્ પથિ સમીક્ષ્ય ધાવતઃ ॥ ૨૫॥

અધિયુદ્ધરઙ્ગમસવસ્તૃણીકૃતાઃ શિવપાદશેખરવરૂથિનીભટૈઃ ।
ઇતિ કિં પ્રતીક્ષ્ય રુષિતાખિલં તૃણં પૃતના ચચર્વ પથિ ચોલભૂભૃતઃ ॥ ૨૬॥

અથ મુક્તકેશમપથેન વિદ્રવન્ સરસિ ક્વચિત્ સતુરગઃ સસૈનિકઃ ।
નિમમજ્જ ચોલનૃપતિર્નિમજ્જયન્નખિલં કુલં સ્વમયશઃપયોનિધૌ ॥ ૨૭॥

અતુલાનિ હેમમણિભૂષણામ્બરાણ્યુપહૃત્ય તસ્ય કટકાન્મહીપતિઃ ।
અખિલાનિ તાન્યુપદદે મહાશયો હરિણાઙ્કચૂડચરણારવિન્દયોઃ ॥ ૨૮॥

અથ ભક્તસૌમ્ય ઇતિ કશ્ચિદર્ચયન્નનિશાન્નદાનનિયમેન શઙ્કરમ્ ।
અનુવર્તયન્ વ્રતમૃણાર્ણધારયાપ્યવસીદતિ સ્મ વિધનઃ સ સર્વથા ॥ ૨૯॥

વ્રતભઙ્ગખેદવિવશં તમગ્રતઃ પતિતં જિહાસુમપિ દુર્લભાનસૂન્ ।
પ્રતિપાદ્ય તણ્ડુલનિધાનમક્ષયં પરિરક્ષતિ સ્મ મધુરેશ્વરો હરઃ ॥ ૩૦॥

અથ કશ્ચિદર્થપતિરિત્યભિખ્યયા વિદિતો વિશામધિપતિઃ પુરે વસન્ ।
અસુતો ધનાનિ ભગિનીસુતે દિશન્ દશમી જગામ તપસે વનાશ્રમમ્ ॥ ૩૧॥

અખિલં ધનં તદપહર્તુમિચ્છવો ભગિનીસુતે વિનિહિતં સનાભયઃ ।
પૃથુકં યદા તમધિકં બબાધિરે શરણં યયૌ સ મધુરેશ્વરં તદા ॥ ૩૨॥

અથ તસ્ય માતુલવપુઃ પરો ભવન્નભિજિત્ય તાન્ નૃપસમે વિરોધિનઃ ।
સહસા યદા પુરહરસ્તિરોદધે સકલૈસ્તદા સદસિ વિસ્મિતં જનૈઃ ॥ ૩૩॥

તનયં તતો વરગુણં તપોબલાચ્છિવભક્તમેત્ય શિવપાદશેખરઃ ।
અખિલં મહીવલયમર્પયન્ સુતે શફરેક્ષણાચરણયોરલીયત ॥ ૩૪॥

સ કદાચિદેત્ય મૃગયાં પરાપતન્ શયિતં ક્વચિદ્ દ્રુમતલે પથિ દ્વિજમ્ ।
નિહતં તુરઙ્ગખુરઘટ્ટનૈર્વિદન્ બિભયામ્બભૂવ જગૃહે ચ હત્યયા ॥ ૩૫॥

વસુધેશ્વરો વરગુણોઽથ દુઃખિતઃ સકલં નિનાય સચિવેષુ ભૂભરમ્ ।
જપદાનહોમવિધિભિર્જગત્પતિં સતતં યજન્નપિ ન શાન્તિમાપ સઃ ॥ ૩૧॥

અશૃણોત્ સ વાચમશરીરિણીં તતઃ કરુણાલયસ્ય હરિણાઙ્કધારિણઃ ।
મધુરાકૃતસ્ય હિ મહત્ત્વમંહસઃ સુકૃતસ્ય વા ન પથિ વર્તતે ગિરામ્ ॥ ૩૭॥

મમ લિઙ્ગમર્જુનતરોરધસ્તલે મહદસ્તિ સહ્યતનયાતટે શુભે ।
તદુપાસનેન તવ તાત! દુષ્કૃતં સકલં પ્રયાતિ વિલયં ક્ષણાદિતિ ॥ ૩૮॥

સ તથેતિ કાર્યમવધાર્ય નિસ્સરન્નપદિશ્ય ચોળનરપાલવિગ્રહમ્ ।
શિવમર્જુનેશમાભિવન્દ્ય તત્ક્ષણાદભવન્નિવૃત્તકલુષો મહીપતિઃ ॥ ૩૯ ॥

સ પુનઃ સમેત્ય નગરીમકલ્મષઃ ફણિવક્ત્રમુક્ત ઇવ પાર્વિકો વિધુઃ ।
પ્રશશાસ વાસવ ઇવ ત્રિવિષ્ટપં વસુધેશ્વરો વરગુણઃ ક્ષમાતલમ્ ॥ ૪૦ ॥

અથ ભદ્ર ઇત્યભિમતઃ ક્ષમાપતેરતિવિશ્રુતશ્ચ ભુવિ ગાયકાગ્રણીઃ ।
ઉપવીણયન્નનિશમુત્પલપ્રિયં ચિરમાસ્ત કશ્ચન કદમ્બકાનને ॥ ૪૧ ॥

અથ તં વિજેતુમપરસ્તુ ગાયકઃ પ્રથયન્ યશો વિરુદડિણ્ડિમસ્વનૈઃ ।
નૃપતિં દદર્શ સ યદા તદા શિવઃ સ્વયમેવ ભક્તમવિતું મનો દધે ॥ ૪૨ ॥

સ નિધાય મૂર્ધ્નિ શશિખણ્ડમણ્ડને સુમહાન્તમિન્ધનભરં નરાકૃતિઃ ।
દિવસાવસાનસમયાવધિ ભ્રમન્ પરિતશ્ચચાર મધુરાપુરે હરઃ ॥ ૪૩ ॥

ઇદમિન્ધનં ધનમિવાહૃતં ચિરાદતિશુષ્કમવ્રણમકણ્ટકં ગુરુ ।
ક્ષમમસ્ય મૂલ્યમુપકલ્પ્ય ગૃહ્યતામિતિ ઘોષયન્ પરિચચાર શઙ્કરઃ ॥ ૪૪ ॥

ઉપગાયતોઽસ્ય પથિ ગાનવૈભવાદુપજાતપલ્લવતયાતિકોમલમ્ ।
અપિ મસ્તકસ્થસરિદમ્ભસાર્દિતં ન તદિન્ધનં જગૃહિરે પુરૌકસઃ ॥ ૪૫ ॥

ચરતોઽસ્ય તત્ર નગરે તતસ્તતશ્ચરણાબ્જવિન્યસનભાવિતં રજઃ ।
ચતુરાનનપ્રભૃતિભિઃ સમં સુરૈઃ પ્રણિપત્ય સઞ્જગૃહિરે મહર્ષયઃ ॥ ૪૬ ॥

કરયુગ્મસઙ્ગમિતભારમન્થરં ઘટિતશ્રમામ્બુકણમસ્ય વીથિષુ ।
ક્રયવાદનાદજિતકોકિલારવં ગતમાગતં ચ ન ગતં મમાશયાત્ ॥ ૪૭ ॥

અથ કાષ્ઠભારમવરોપ્ય દુર્ભરં સ બહિર્ગૃહાદભિનવસ્ય ગાયતઃ ।
ઉપવિશ્ય વીતભરણશ્રમઃ શનૈરુપગાયતિ સ્મ મધુરં યદૃચ્છયા ॥ ૪૮ ॥

અથ ષાડવૌડવવિભેદિ સર્વમપ્યવલમ્બ્ય રાગકુલમસ્તસઙ્કરમ્ ।
સ જગાવનુલ્લિખિતતાનધોરણીમધુરં હ્રિયે હૃદિ ભિયે ચ ગાયતામ્ ॥ ૪૯ ॥

અથ વિસ્મયાદભિનવસ્ય ગાયતો ગુરુસમ્પ્રદાયમભિગમ્ય પૃચ્છતઃ ।
સ જગાદ ભદ્રસદને ગતાગતૈરદસીયગીતિગુણરીતિમાહૃતામ્ ॥ ૫૦ ॥

તદુદીરિતશ્રવણલબ્ધસાધ્વસે પ્રપલાયિતે સપદિ તત્ર ગાયકે ।
ઉપગમ્ય ભદ્રમુચિતૈર્વિભૂષણૈર્બહુમન્યતે મ્મ નૃપતિર્ધનૈરપિ ॥ ૫૧ ॥

સ દદૌ સમસ્તમપિ તન્મહેશ્વરે વિતતાર યદ્ વરગુણોઽસ્ય પાર્થિવઃ ।
અપિ સઞ્ચિતં વસુ દિશન્ શિવાશ્રમિષ્વધનો બભૂવ બહુધાર્જયન્નપિ ॥ ૫૨ ॥

કવિગાયકાભિમતકલ્પશાખિનઃ સવિધે કદાચિદથ ચેરભૂપતેઃ ।
પ્રવિતીર્ય પુત્રમપિ ભક્તમાત્મનઃ પ્રજિઘાય ભદ્રમમૃતાંશુશેખરઃ ॥ ૫૩॥

સ્વપને પુરૈવ સ ચ તત્સમાગમં પ્રતિબોધિતઃ પુરહરેણ પાર્થિવઃ ।
અભિગમ્ય ભદ્રમમિતૈર્વિભૂષણદ્રવિણામ્બરૈઃ સપદિ પર્યપૂજયત્ ॥ ૫૪॥

ઇતિ કન્દલત્યહરહર્દયારસે શફરેક્ષણાસહચરસ્ય ગાયકે ।
ભવતિ સ્મ ભક્તિરપિ તસ્ય તાવતી ચરમં શરીરમધિતસ્થુષસ્તદા ॥ ૫૫॥

ઉષસિ પ્રગે તદનુ સઙ્ગવે તતો દિનમધ્યગે દિનમણૌ નિશામુખે ।
રજનીદલે ચ નિયમાદસેવત પ્રમથાધિનાથમુપવીણયન્નયમ્ ॥ ૫૬॥

સમયેષુ ષટ્સુ નિયમેન યજ્જગૌ સ બહિર્વૃષાત્ સ્વયમનાવૃતે વસન્ ।
દ્રઢિમાનમસ્ય નિયમે પરીક્ષિતું જલદાનચોદયત વૃષ્ટયે હરઃ ॥ ૫૭॥

સ્તનિતારવૈર્બધિરતામગુર્દિશસ્તટિતાં ત્વિષા તનુભૃતાં હૃતા દૃશઃ ।
અપતન્ ક્ષિતાવશનયઃ પદે પદે તિમિરં નિરન્તરમરુદ્ધ રોદસી ॥ ૫૮॥

જગદાસ્ત બદ્ધમિવ જાતસાધ્વસં સમયે યદા સ તુ તદૈવ ગાયકઃ ।
અવગાહ્ય હેમકમલાકરે શનૈરભિગમ્ય સન્નિધિમગાયદૈશ્વરમ્ ॥ ૫૯॥

અથ મેઘરઞ્જિમહિરઞ્જિમુખ્યતન્મૃદુગાનસંવલિતરાગવૈભવાત્ ।
દ્રવતાં પ્રપન્નમિવ ભૂનભોન્તરં દદૃશે તદા જલધરૈર્નિશાત્યયે ॥ ૬૦॥

કરકોપલૈર્વિઘટિતા વિપઞ્ચિકા કરજા ન તસ્ય વશવર્ત્તિનોઽભવન્ ।
અપિ કમ્પમાનવપુરપ્રકમ્પિનીમવલમ્બ્ય ભક્તિમયમુજ્જગૌ પુનઃ ॥ ૬૧॥

ઘનકર્દમદ્રવનિમગ્નમગ્રતશ્ચરણદ્વયં ચલયિતું ચ નાશકત્ ।
સ યદા તદાસ્ય વિપુલં સમુન્નતં સ્વયમુદ્બભૂવ માણિચિત્રમાસનમ્ ॥ ૬૨॥

સ નિવિશ્ય તત્ર શિવસક્તયા દૃશા નિરવર્ત્તયન્નિયમમત્વરો યદા ।
વિરતં ઘનૈર્વિમલમમ્બરં બભૌ વિલલાસ દિક્ષુ ચ તદૈવ કૌસુદી ॥ ૬૩॥

ફલકં તદદ્ભુતમવેક્ષ્ય પાર્થિવઃ પ્રણિપત્ય ભદ્રમસકૃત્ પ્રશસ્ય ચ ।
શિવલિઙ્ગતોઽપિ શિવયોગિષુ સ્થિરાં શિવભાવનામકૃત તત્પ્રભૃત્યયમ્ ॥ ૬૪॥

અથ રાજરાજ ઇતિ દિક્ષુ વિશ્રુતં તનયં બહુશ્રુતમસાવવિન્દત ।
તપસા પ્રસાદ્ય તરુણેન્દુશેખરં મલયધ્વજાન્વયમહાનિધિં નૃપઃ ॥ ૬૫॥

અવરોપ્ય ભારમખિલં ભુવઃ સુતે લઘુરુત્પતન્ વરગુણઃ શિવાન્તિકમ્ ।

અવનીભૃતઃ પુનરન્ધાત્ ફણાધરાનિયમસ્ય ભૂભરણવાસનેદૃશી ॥ ૬૬॥

ઉદિતોદિતં વિવિધયા સપર્યયા ભજતાં સ્વમેવ ભુવિ પાણ્ડ્યભૂભુજામ્ ।
અપવર્ગમેકવિધમર્પયન્નયં મધુરેશ્વરોઽપિ મહતીં હ્રિયં દધે ॥ ૬૭॥

અથ રાજરાજ ઇતિ લબ્ધમાખ્યયા પુરભિત્સખત્વમતિશય્ય વર્ત્તિતુમ્ ।
પિતરૌ ગુરું સુહૃદમાત્મનઃ પ્રભું કુલદૈવતં ચ કુરુતે સ્મ તં નૃપઃ ॥ ૬૮॥

નિમમજ્જ તસ્ય હૃદયં નિસર્ગતઃ શફરેક્ષણાસહચરાઙ્ઘ્રિપદ્મયોઃ ।
કુલશેખરાન્વયભુવાં શિવવ્રતે કુત એષ કારણગવેષણશ્રમઃ ॥ ૬૯॥

અથ ભદ્રનામનિ ચિરાય ગાયકે શિવલોકમેયુષિ તદીયગેહિની ।
ચતુરા તતોઽપિ કિલ ગાનવિદ્યયા શિવમારરાધ સમયેષુ ષટ્સ્વપિ ॥ ૭૦॥

અવરોધગહમધિજગ્મુષી વિભોરવનીપતેર્દયિતયા કયાચન ।
કલહાયતે સ્મ નિજગાનવિદ્યયા દૃઢયા મહેશદયયા ચ જાતુ સા ॥ ૭૧॥

તદુપક્રમં ધરણિવલ્લભોઽપિ તામવમન્તુમાહિતકુતૂહલશ્ચિરાત્ ।
સ્વયમાનિનાય જલરાશિમધ્યતઃ સુદૃશં સ કાઞ્ચિદથ ગાનકોવિદામ્ ॥ ૭૨॥

જગતુસ્તતઃ સદસિ તે મહીપતેરધિકેત્યગૃહ્યત તુ તત્ર નૂતના ।
મનસાધિગમ્ય મધુરેશ્વરં શુચા ભણતિ સ્મ ભદ્રગૃહિણી પુનર્નૃપમ્ ॥ ૭૩॥

સદસિ સ્થિતા મયિ ચિરાદમર્ષિણો યદિ કિઞ્ચિદાહુરિહ કિં તતઃ ક્ષતમ્ ।
અભિગમ્ય સન્નિધિમનઙ્ગશાસિતુઃ કથયન્ત્વમી તરતમત્વમાવયોઃ ॥ ૭૪॥

વિજયેત યા ભવતુ સાત્ર ભટ્ટિની વિજિતા તુ મા ભવતુ સાત્ર કિઙ્કરા ।
ઇતિ સા યદાહ તદનિચ્છતોઽપ્યભૂદભિનન્દનીયમવનીભુજસ્તદા ॥ ૭૫॥

અથ તે સમેત્ય સવિધં મહેશિતુઃ સહ પાર્થિવેન સદસિ સ્થિતૈરપિ ।
જગતુર્ગિરા મધુરયાદિતસ્તતઃ પરિવાદિનીમુરલિકાવિપઞ્ચિભિઃ ॥ ૭૬॥

અધિકા તુ યદ્યપિ નવૈવ તત્ત્વતસ્તદપિ પ્રપન્નજનપક્ષપાતિનઃ ।
મધુરેશ્વરસ્ય કિલ માયયા વૃતા બહુધા સમસ્તુવત ભદ્રગેહિનીમ્ ॥ ૭૭॥

જયભઙ્ગયોર્વિદિતયોર્વિપર્યયાદપિ તત્ર નીપવનભર્તુરાજ્ઞયા ।
વિજિતા નવૈવ વિજિતં તુ ભદ્રયેત્યગદીદભીક્ષ્ણમવશો મહીપતિઃ ॥ ૭૮॥

અવલમ્બ્ય દાસ્યમથ સિંહલાગતા સદસિ સ્વયં પરિચચાર ભદ્રિકામ્ ।
સ ચ પાર્થિવઃ કનકભૂષણામ્બરૈર્વિવિધૈરપૂજયત વિસ્મયેન તામ્ ॥ ૭૯॥

ઇતિ રાજરાજધરણીપતેઃ ક્ષિતિં પરિરક્ષતઃ પ્રણિહિતેન ચેતસા ।
વિનયો વિવેકત ઇવાતિવિશ્રુતસ્તનયોઽભવત્ સુગુણ ઇત્યભિખ્યયા ॥ ૮૦॥

તારુણ્ય એવ વિનયાવનતં કુમારં
    તં રાજરાજનૃપતિઃ સકલાગમજ્ઞમ્ ।
પશ્યન્નખણ્ડિતપરાક્રમમભ્યષિઞ્ચત્
    સમ્પ્રાર્થિતઃ પ્રકૃતિભિઃ કિલ યૌવરાજ્યે ॥ ૮૧॥

ઇતિ મહાકવિશ્રીનીલકણ્ઠદીક્ષિતપ્રણીતે શિવલીલાર્ણવેઽષ્ટાદશઃ સર્ગઃ ।

## અથૈકોનવિંશઃ સર્ગઃ ।

તનૂભવે વહતિ તતો વસુન્ધરાં ચિરાદસૌ નૃપતિરુપેત્ય વિશ્રમમ્ ।
વનેચરૈઃ સહ મૃગયાકુતૂહલી વનંવનં વ્યચરદધિજ્યકાર્મુકઃ ॥ ૧॥

પરિભ્રમચ્છ્વગણવિકૃષ્ટશૃઙ્ખલાવલીઘનધ્વનિજનિતપ્રબોધનાઃ ।
તતસ્તતસ્તરુતલકુઞ્જપુઞ્જતો વિનિર્યયુર્વિવૃતમુખા મૃગાદનાઃ ॥ ૨॥

પુનઃ પુનઃ પરિપતતઃ શુનઃ ક્ષુધા જિઘૃક્ષવઃ ખરનખરાસ્તરક્ષવઃ ।
પ્રચક્રમુઃ કિમપિ યદા તદા શરૈર્નિરન્તરાનકૃતતરામિમાન્ નૃપઃ ॥ ૩॥

સ્તનગ્રહગ્રહિલતયા નિરુન્ધતસ્તનન્ધયન્ સપદિ વિલઙ્ઘ્ય સમ્પ્લુતા ।
મૃગી મૃગં ક્ષિતિપતિપાણિગોચરાદપાલયત્ સ્વયમભિપેતુષી પુરઃ ॥ ૪॥

સ્વસાયકાદપિ ચલલક્ષ્યપાતિનઃ સ્વયં પુરઃ પરિચલતા મહીભૃતા ।
અરુધ્યત પ્રથમમવિધ્યત ત્વથ ત્વરોચ્ચલત્તુરગખુરક્ષતા મૃગી ॥ ૫॥

સટાસુ તચ્છબરભટાવલમ્બિતઃ પ્રકમ્પિતું કિમપિ ન ચક્ષમે સ્વતઃ ।
અવૈક્ષત ભ્રુકુટિવિટઙ્કભીમયા દૃશા પુનસ્તદપિ મૃગાન્ મૃગાધિપઃ ॥ ૬॥

વૃથા નયન્ વિપિનચરાન્ શરાહતાન્ વિષાદમાવહત યમન્તરન્તકઃ ।
સ તસ્ય તે મહિષગણાન્ નિપાતયન્નપાહરદ્ વનભુવિ વાહનાર્પણાત્ ॥ ૭॥

ગણઙ્ગણં ચમરવરાહગણ્ડકાન્ વૃકાનપિ ક્ષપયતિ તત્ર પાર્થિવે ।
કિટિર્ઝટિત્યુપનિપપાત કશ્ચન ક્ષુધા જ્વલન્નચલગુહાગૃહાત્ તતઃ ॥ ૮॥

સ દંષ્ટ્રયા કુલિશનિશાતધારયા પરિક્ષિપન્ શબરભટાનિતસ્તતઃ ।
ગણં શુનામવિગણયન્ પદેપદે ધરાપતેસ્તુરગસમીપમાપતત્ ॥ ૯॥

અવસ્થિતં ધુરિ તમવેક્ષ્ય પાર્થિવઃ સ સન્દધે ધનુષિ ન યાવદાશુગમ્ ।

સ તાવદુગ્ચલિતવિષાણકોણતો વ્યદારયચ્ચરણતલે તુરઙ્ગમમ્ ॥ ૧૦॥

અવપ્લુતઃ સપદિ તુરઙ્ગમાત્ તતઃ પતિઃ ક્ષિતે રથમધિરુહ્ય તં પુરઃ ।
અવાકિરજ્જ્વલિતમુખૈઃ શિલીમુખૈર્ધરાધરં જલદ ઇવામ્બુવૃષ્ટિભિઃ ॥ ૧૧॥

સ તદ્ધનુર્વલયવિનિસ્સૃતૈઃ શરૈઃ સમાચિતઃ શલલગણૈરિવાભિતઃ ।
અચૂર્ણયન્મુખમસકૃદ્ વિઘૂર્ણયન્ સસારથિં સતુરગમમ્ય તં રથમ્ ॥ ૧૨॥

તતઃ પ્લુતઃ સપદિ રથાન્મહારથસ્તમુદ્ધતં ગિરિમિવ જઙ્ગમં કિટિમ્ ।
અનુદ્રુતં પ્રિયતમયા નૃપો રયાદપાતયત્ સ ભુવિ કૃપાણપાટિતમ્ ॥ ૧૩॥

તતઃ પ્રભૃત્યજનિ વરાહશૈલ ઇત્યભિખ્યયા ધરણિધરઃ સ વિશ્રુતઃ ।
ઉપત્યકામુપરુરુધે સ યસ્ય તાં પતન્ કિટિઃ પૃથુરિવ પાદપર્વતઃ ॥ ૧૪॥

ગતે પુરં ધરણિપતૌ સવિસ્મયે ક્ષુધાર્દિતાસ્તદનુ વરાહપોતકાઃ ।
પ્રસૂસ્તનપ્રણયકૃતાતિકૂજિતા દશાપતન્ દ્વિસમધિકાસ્તદાવશાઃ ॥ ૧૫॥

તપસ્વિનામવનકૃતે તપસ્યતાં ગિરેસ્તટે કૃતરતિરત્ર શઙ્કરઃ ।
કૃપાલયઃ કિટિપૃથુકાનપાલયત્ સ તત્પ્રસૂતનુરમિતૈઃ સ્તનામૃતૈઃ ॥ ૧૬॥

પુરા યુગે વૃષલકુમારકા હિ તે તદાશ્રિતાઃ શમધનશાપતો વપુઃ ।
સમુદ્ધૃતાઃ પુરમથનસ્તનામૃતૈઃ ક્ષણાદ્ દધુઃ કિટિવદના મનુષ્યતામ્ ॥ ૧૭॥

કલાસુ તે દધુરખિલાસુ કૌશલં વિશિષ્ય ચ ક્ષિતિપતિતન્ત્રવૈદુષીમ્ ।
ન સૂકરઃ શિવચરણે કૃતાશયઃ સ સૂકરઃ પુરભિદિ યઃ પરાઙ્મુખઃ ॥ ૧૮॥

વરાહતાભરણવિલાસવાસનાવશાદિવ શ્રુતિશતમૌલિલાલિતમ્ ।
વિમાર્ગિતું ચરણયુગં પુરાદ્વિષઃ કુતૂહલં સતતમમી વિતેનિરે ॥ ૧૯॥

અનુજ્ઞયા તદનુ કદાપિ ધૂર્જટેરવસ્થિતાનચલગુહાસુ તાન્ નૃપઃ ।
સમાનયન્ સચિવપદે ન્યવેશયદ્ વચસ્વિનો નરપતિતન્ત્રકોવિદાન્ ॥ ૨૦॥

સભાજિતા નૃપતિવરેણ સર્વથા ચિરાયુષો દ્વિસમધિકા દશાપિ તે ।
શિવાશ્રમવ્યતિકરધૂતકલ્મષાઃ શિવં યયુઃ પ્રણતશિવઙ્કરં તતઃ ॥ ૨૧॥

તતો ગતે પિતરિ પદં મહેશિતુસ્તદાત્મજઃ સુગુણનૃપાલશેખરઃ ।
અપાલયચ્ચિરમવનીં સસાગરામચઞ્ચલામકૃત ચ ભક્તિમીશ્વરે ॥ ૨૨॥

બહિર્ભ્રમન્ ક્ષુદુપશમાય સર્વદા બલીયસા કરટકુલેન તાડિતઃ ।
અચઞ્ચલં ચરણયુગં શિવસ્ય કોઽપ્યકિઞ્ચનઃ શરણયતિ સ્મ ખઞ્જનઃ ॥ ૨૩॥

વિહઙ્ગમઃ કરટભિયા શિવાલયે નિલીય સ ક્વચન વિટઙ્કસીમાનિ ।
સકૃત્ પતન્ કનકસરોજિનીપયસ્યુપોષિતઃ કતિચિદુવાસ વાસરાન્ ॥ ૨૪॥

જુહાવ કિં કિમયમયષ્ટ કિં દદૌ જજાપ કિં મલિનતનુર્વિહઙ્ગમઃ ।
તપસ્તદપ્યજનિ તદસ્ય ચેષ્ટિતં પરન્તપપ્રપદનતઃ કિમન્તતઃ ॥ ૨૫॥

સ મૃત્યુભીશમનમનૂપદેશતો બલીયસામપિ બલિનં ચકાર તમ્ ।
બલાન્યમી કિલ બલવત્સુ વિશ્રુતાઃ પ્રસાદશીકરપરમાણવોઽસ્ય યે ॥ ૨૧॥

સ સર્વમધ્યકુરુત પક્ષિમણ્ડલં પરિગ્રહાત્ પ્રમથપતેર્વિહઙ્ગમઃ ।
તદાદિ ખલ્વિદમધુનાપિ લક્ષ્યતે તદન્વયે વિહગકુલાધિકં બલમ્ ॥ ૨૭॥

તતસ્તતઃ સરસિ નિરીક્ષ્ય યાદસાં પરમ્પરપ્રતિહતિપાતકં બકઃ ।
નિવૃત્તજાત્યુચિતવિચેષ્ટિતઃ સ કોઽપ્યગાહત પ્રિયકવનં કદાચન ॥ ૨૮॥

વિગાહતે કનકસરોજિનીજલે વિલોકતે ન તુ શફરાન્ દૃશાપિ સઃ ।
બિભર્ત્તિ તુ સ્વકમુદરં બિસાઙ્કુરૈઃ પ્રદક્ષિણં ભ્રમતિ સદા ચ શૂલિનઃ ॥ ૨૯॥

ઇતિ વ્રતં દૃઢતરમેષ ધારયન્નુપાસ્ત તન્ત્રિપુરહરં યદા ચિરમ્ ।
તદા સ્વયં તરુણશશાઙ્કમૌલિના સરઃ કૃતં વિગતસરોજસઙ્કથમ્ ॥ ૩૦॥

સ વલ્ગતો નવનવનીતકોમલાન્ સમીપતઃ શફરશિશૂન્ વિલોકયન્ ।
ક્ષુધા કિલ ક્ષુભિતમના મનાગિવ પ્રચક્રમે પિશિતપરિગ્રહક્રમે ॥ ૩૧॥

સમુત્પ્લુતં વદનપુટે સ્વયં તતઃ શરારિરાદિત શફરાર્ભકં યદા ।
તદા ઝટિત્યવબુબુધે વ્રતક્ષતિં વિવેકિષુ પ્રભવતિ કિં ચિરં તમઃ ॥ ૩૨॥

પરિત્યજન્નપિ પલલં ઝટિત્યયં પ્રવર્ત્તનાત્ ક્ષણમપથે કૃતવ્યથઃ ।
અસૂનપિ વ્યયિતુમિયેષ દુસ્ત્યજાનહો સતાં પ્રકૃતિરપત્રપિષ્ણુતા ॥ ૩૩॥

સ રક્ષિતું બકમકરોદ્યથાપુરં સરસ્તદુલ્લસિતમૃણાલપલ્લવમ્ ।
તદાદિ ચાકૃત તપનીયપદ્મિનીં વિવર્જિતાં કિયદપિ યાદસાં ગણૈઃ ॥ ૩૪॥

સ ખઞ્જનઃ સ ચ બકશાબકઃ પ્રભોરનુગ્રહાત્ પરમમવાપતુઃ પદમ્ ।
દ્વિજે દ્વિજો યદિ દયતે ક્ષમં હિ તદ્ દ્વિજો હ્યયં વિબુધગણેષુ ગીયતે ॥ ૩૫॥

દિવં ગતે સુગુણનૃપે દયાનિધાવુપર્યુપર્યુપચિતસદ્ગુણોત્તરાઃ ।
તદન્વયે ધરણિભુજો મહારથાઃ પરશ્શતા ધરણિમિમામપાલયન્ ॥ ૩૬॥

યુગે યુગે કુલમુદિતોદિતં હિ તત્ પ્રવર્તિતં પ્રથમમનઙ્ગવૈરિણા ।
પ્રિયઙ્કરં પ્રિયકવનીપતેરભૂદભગ્નમાદિવસપરિક્ષયં વિધેઃ ॥ ૩૭॥

ઉપસ્થિતે યુગવિગમે પૃથગ્વિધાઃ સમુદ્ગતા દિશિ દિશિ ધૂમકેતવઃ ।
અરુદ્ધ ચ દ્યુમણિમહર્મુખે સદા કબન્ધવત્ કિમપિ નિરન્તરં તમઃ ॥ ૩૮॥

સમન્તતોઽજનિ શતવાર્ષિકઃ ક્ષિતાવવગ્રહઃ સ્વયમનવગ્રહસ્તતઃ ।
ચતુર્વિધં જનુરપિ ભૂતસંસદાં વિલુપ્યતે જગતિ નિરન્વયં યથા ॥ ૩૯॥

વિવસ્વતો વિદધતિ સપ્ત રશ્મયો જગત્સુ યે જલતુહિનાભિવર્ષણમ્ ।
સમેઽપિ તે તપનતયા પૃથક્પૃથક્ પ્રતાપને પ્રવવૃતિરે સમન્તતઃ ॥ ૪૦॥

દ્રવીકૃતૈઃ પ્રથમમથોપશોષિતૈઃ સ્થલીકૃતૈર્હિમશિખરૈઃ સમન્તતઃ ।
હિમાલયો મૃદુપલમાત્રશેષિતો વિદિદ્યુતે ભુવિ કિલ વેત્રદણ્ડવત્ ॥ ૪૧॥

પ્રતાપિતાઃ પ્રથમમબિન્ધનાગ્નિના વિશોષિતાસ્તદનુ કરૈર્વિવસ્વતામ્ ।
ઉપર્યધઃ ક્વથિતજલૌઘપાચિતૈસ્તિમિઙ્ગલૈર્જલનિધયઃ કષાયિતાઃ ॥ ૪૨॥

વિશોષિતામ્ભસિ વિધુમણ્ડલે તદા વિસૃત્વરા અપિ કિરણા વિવસ્વતઃ ।
ખરાતપા નિશિ પરિણમ્ય ચન્દ્રિકાપ્રવર્ત્તનપ્રતિહતશક્તયોઽદહન્ ॥ ૪૩॥

પરાકૃતદ્રુમતૃણગુલ્મસઙ્કુથે પયોધરસ્મૃતિવિધુરે યુગાત્યયે ।
અપિ ત્રિવૃત્કરણપથોપપાદિતં પયઃ ક્ષિતાવજનિ કથાવશેષિતમ્ ॥ ૪૪॥

ફણીશિતુર્વદનસહસ્રનિસ્સૃતા વિષાનલોદ્ગમનવિશેષભીષણાઃ ।
સમીરણાઃ સરભસતાડિતસ્ખલત્પરસ્પરા વવુરપરસ્પરાસ્તતઃ ॥ ૪૫॥

વિષાનલવ્યતિકરશોષિતાન્તરદ્રવત્સ્ફુટદ્દૃઢતરસન્ધિબન્ધનાઃ ।
શિલોચ્ચયા અપિ હિ રજશ્છટાત્મના દિશન્દિશં પવનવશેન નિન્યિરે ॥ ૪૬॥

પ્રદીપિતા ઇવ પવનેન તાડિતાઃ પ્રતિક્ષણાવસિતપુનસ્સમુદ્ગતાઃ ।
પ્રજજ્વલુઃ કથમપિ ચણ્ડરશ્મયઃ પદે પદે સ્ખલિતરથા વિયત્પથે ॥ ૪૭॥

પયઃ કિલ પ્રતિહતકલ્મષં સુધેત્યુદારહન્ત્યુદકરહસ્યકોવિદાઃ ।
પયઃકથામપિ પવનેન લુમ્પતા સુધાન્ધસોઽપ્યજહુરસૂન્ ગતાન્ધસઃ ॥ ૪૮॥

પ્રસર્પતા ધરણિતલાદસાતલં મહોષ્મણા યુગવિગમાહિમત્વિષામ્ ।
પ્રતાપિતાઃ પુનરશનાતિમાત્રયાપ્યસૂનહો જહુરહયો મહાનિલૈઃ ॥ ૪૯॥

અધસ્પદે કમઠવરાહભોગિનામવસ્થિતસ્તદનુ લલાટલોચનઃ ।
કિમેતદિત્યુપરિ દૃશં દ્વયાધિકામવાકિરદ્ દરદલિતામવજ્ઞયા ॥ ૫૦॥

તતોઽગ્નિના કમલભવાણ્ડમૂલભૂનિવિષ્ટધૂર્જટિનિટિલાક્ષિજન્મના ।

ચટચ્ચટચ્ચટદિતિ ભૂર્ભુવસ્સ્વરિત્યદહ્યત ત્રિજગદપિ પ્રસહ્ય તત્ ॥ ૫૧॥

ઉદન્વતામુદરતલેષુ શોષિતાસ્તદીરિતા લવણમયા મહાદ્રયઃ ।
સમન્તતઃ સદસિ વિધાતુરુધ્યયુર્મહોપલા ઇવ યુધિ યન્ત્રનિસ્સૃતાઃ ॥ ૫૨॥

નભસ્સ્વતામજનિ વિવસ્વતામપિ ક્ષણાદહો ભસિતદશા તદર્ચિષા ।
બલીયસામપિ બલિભિર્ભુવઃ ક્ષયઃ પરં ત્વસૌ ભવતિ કિયદ્વિલમ્બિતઃ ॥ ૫૩॥

તદર્ચિષા ગિરિશિખરસ્ફુલિઙ્ગયા જના મહઃપ્રભૃતિષુ જાતસઞ્જ્વરાઃ ।
ચિરાયુષઃ સનકસનન્દનાદયઃ પ્રદુદ્રુવુઃ પદમકુતોભયં વિધેઃ ॥ ૫૪॥

અવસ્થિતાઃ પ્રિયકવને યુગાત્યયેઽપ્યવિક્રિયા મદનજિતઃ પ્રભાવતઃ ।
વિશઙ્કટે કનકસરોજિનીતટે વિશૃઙ્ખલાઃ પ્રમથગણા વિજહ્રિરે ॥ ૫૫॥

કપર્દિનસ્તદનુ કપર્દમણ્ડલાત્ સમુદ્ગતા નભસિ ઘના ઘનાન્ધનાઃ ।
નજૃમ્ભિરે જગદખિલં હવિર્ભુજા પરિશ્રિતં પ્રશમયિતું સમન્તતઃ ॥ ૫૬॥

કણાનપાં કરિકલભાનિવ ચ્યુતાન્ પટત્પટદ્ધ્વનિમુખરાન્ પયોમુચામ્ ।
પ્રસારયન્નિવ રસનાં શિખાચ્છલાત્ પપૌ શનૈસ્સિમિસિમિતિ ક્ષયાનલઃ ॥ ૫૭॥

પયઃકણપ્રશમિતકલ્પપાવકપ્રસૃત્વરપ્રતિનવધૂમમણ્ડલૈઃ ।
સમન્તતઃ પુનરપિ સાન્દ્રતાં ગતા વલાહકા વવૃષુરપો નિરન્તરમ્ ॥ ૫૮॥

તતસ્તતો જલદકુલે તટિદ્ગણાશ્ચકાશિરે ચપલમરીચિવીચયઃ ।
વિહાય ભૂતલમિવ તદ્દિધક્ષયા વિનિસ્સૃતાઃ પ્રલયહુતાશનાર્ચિષઃ ॥ ૫૯॥

તતોઽયુતાયુતયુગયોજનોન્નતાસ્તદર્ચિષઃ સલિલનિપાતકુણ્ઠિતાઃ ।
હસીયસીમુપગમિતા દશાં તદા નિરીક્ષિતાઃ પ્રિયકવનાશ્રિતૈર્ગણૈઃ ॥ ૬૦॥

પરસ્પરં પ્રલયહુતાશમેઘયોર્ભયાનકે પ્રચલતિ સામ્પરાયિકે ।
સમાગતા ભુવિ સમયે હવિર્ભુજા સનાભયઃ કિમશનયઃ પયોમુચઃ ॥ ૬૧॥

ઉભાવપિ પ્રલયદશાનિરઙ્કુશાવુભાવપિ ત્રિપુરહરસ્ય ગાત્રજૌ ।
તથાપિ તુ વ્યજયત વારિદોઽનલં જયઃ કથં જગદુપતાપિનો ભવેત્ ॥ ૬૨॥

ભયાનકૈરશનિનિપાતનિસ્વનૈઃ પ્રતિક્ષણક્ષુભિતહૃદઃ પયોમુચામ્ ।
અપિ ક્ષપામનુભવતઃ પદે નિજે પ્રજાગરઃ પરિણમતિ સ્મ વેધસઃ ॥ ૬૩॥

અચન્દ્રમસ્તપનમપેતતારકં પ્રશાન્તપાવકમવસન્નમારુતમ્ ।
અકાલદિગ્ભુવનમસચ્છુભાશુભં તમોમયં પયસિ મમજ્જ તજ્જગત્ ॥ ૬૪॥

યદણ્ડતો બહિરબહિશ્ચ યજ્જલં તદેકતાં ગતમિવ સર્વતસ્તદા ।
અગાધમપ્રચલમપારમસ્વનં પ્રવૃદ્ધમાધ્રુવપદમારસાતલમ્ ॥ ૬૫॥

જડાજડે જગતિ ગતે રસાતલક્ષમાનભસ્સુરનરતિર્યગાત્મનિ ।
જલાસ્તરે વટદલતલ્પમાશ્રિતો જગન્નિધિર્વ્યહરત કોઽપિ બાલકઃ ॥ ૬૬॥

સમન્તતો જગતિ સમાવૃતેઽમ્ભસાપ્યમજ્જતિ પ્રિયકવને નિજાજ્ઞયા ।
સ બુદ્બુદોદર ઇવ સાર્ધમમ્બયા સમં ગણૈરપિ વિજહાર શઙ્કરઃ ॥ ૬૭॥

ચતુર્મુખે સ્વપતિ વિલુપ્તસઙ્કથે ચરાચરે વિરમતિ કાલકલ્પને ।
અનુશ્રવૈઃ પરમધિગમ્ય તુષ્ટુવુર્મહર્ષયઃ કતિચન તં મહીં ગતમ્ ॥ ૬૮॥

જલપ્લવૈર્બહિરવહિશ્ચ ધૂર્જટેર્જટાટવીહિમકરચન્દ્રિકાઙ્કુરૈઃ ।
જડીકૃતે સતિ મધુરેશ્વરાલયે જગુર્ગણા જહસુરનર્ત્તિષુઃ સુખમ્ ॥ ૬૯॥

પરિક્ષયે પ્રલયનિશસ્તતશ્ચિરાત્ પયોજભૂઃ સલિલશયસ્ય શાર્ઙ્ગિણઃ ।
નિદેશતો નિખિલમિદં જગત્ત્રયં યથાપુરં પુનરસૃજત્ પ્રયત્નતઃ ॥ ૭૦॥

પ્રકલ્પયન્ પ્રથમમહર્નિશાકરૌ પ્રણાશયન્ કબલિતવિષ્ટપં તમઃ ।
વિશોષયન્ સલિલમશેષમુત્થિતં વિનિર્મમે વિધિરમરાલયં પુનઃ ॥ ૭૧॥

તતઃ ક્ષિતૌ કથમપિ ધામ શાકરં તદેકમક્ષતમભિજાનતામુના ।
સરિદ્ગિરિસ્થલસરિદીશ્વરાદિકં સુમેધસા નિખિલમકલ્પિ વેધસા ॥ ૭૨॥

તતઃ સૃજન્ સ વિબુધમર્ત્ત્યભોગિનો નિવેશયન્ નિજનિજધામસુ સ્થિરમ્ ।
પ્રવર્ત્તયન્ સુપરિચિતેષુ કર્મસુ વ્યધત્ત તચ્છયિતમિવોત્થિતં જગત્ ॥ ૭૩॥

તતશ્ચિરાદજનિ તુ વંશશેખરો મહીપતિર્દ્રમિડકુલેષુ કશ્ચન ।
પ્રભુત્વમાવહત સ પાણ્ડ્યમણ્ડલે મહેશ્વરાર્પિતહૃદયો મહાશયઃ ॥ ૭૪॥

સ સુન્દરેશ્વરસદનૈકશપિણીં ભજન્ પુરીં ભુવિ મધુરેતિ વિશ્રુતામ્ ।
નિવેશયન્ ક્વચિદપિ કાશ્ચન પ્રજાઃ ક્વચિત્ સ્વયં ન્યવિશત કલ્પિતાલયઃ ॥ ૭૫॥

દિનેદિને મદનજિતઃ સપર્યયા સમૃદ્ધ્યા સ ધરણિવલ્લભશ્રિયા ।
યથાપુરં પુરમચિકર્ષિદુચ્છ્રિતૈઃ સમન્તતો નૃપગૃહસાલગોપુરૈઃ ॥ ૭૬॥

સ વેદિતું પુરપરિમાણમુત્યુકો જડ઼્એ જગત્યવિદિતતત્પુરસ્થિતૌ ।
દૃઢવ્રતો દ્રમિડકુલાબ્ધિચન્દ્રમાઃ સમાહિતઃ શરણયતિ સ્મ શઙ્કરમ્ ॥ ૭૭॥

કૃપાનિધિસ્તદનુ શશાઙ્કશેખરઃ કૃતાદરઃ ક્ષિતિભૃતિ વંશશેખરે ।
પ્રદર્શય સ્થલપરિમાણમિત્યશાદ્ વિભૂષણં ભુજગવરં વિનિક્ષિપન્ ॥ ૭૮॥

સ પુષ્પકાનનભુવિ વાલમર્પયન્ પ્રદક્ષિણં પરિચલિતઃ ફણીશ્વરઃ ।
શિરસ્પદં પુનરપિ તત્ર યોજયન્નદર્શયત્ પુરપરિમાણમદ્ભુતમ્ ॥ ૭૯॥

હરિત્સ્વસૌ ચતસૃષુ પુષ્પકાનનં ગુહાચલં ભુજગગિરિં વૃષાચલમ્ ।
અનુક્રમાદહિતિલકઃ પ્રદર્શયન્ દ્વિયોજનં પુરમવદત્ સમન્તતઃ ॥ ૮૦॥

તિરોહિતે પુરહરભૂષણોરગે તદાકૃતિં વરણમયં પ્રકલ્પયન્ ।
વિશઙ્કુટૈર્વિપણિપથૈઃ શિરોગૃહૈરલઙ્કૃતં પુરમકરોદ્ યથાપુરમ્ ॥ ૮૧॥

હાલાહલાસ્યપરિવેષ્ટનલબ્ધસીમં
  હાલાસ્યમિત્યભિધયા નગરં તદાસીત્ ।
ભોગાભિવેષ્ટિતતયાપિ ચ ભોગભૂમિઃ
  કૈવલ્યભૂરપિ બભૂવ મહીવિભાગે ॥ ૮૨॥

આસાદયન્નશ્વપતિં સહાયમથૈકદા વિક્રમચોલદેવઃ ।
વિચાર્ય વિસ્રબ્ધમમું નૃપાલમાયોધનાયોપજગામ સૈન્યૈઃ ॥ ૮૩॥

અતર્કિતાસન્નમરાતિસૈન્યમાકર્ણયન્ પાણ્ડ્યનૃપો વિશઙ્કઃ ।
કૃતાભ્યનુજ્ઞો મધુરેશ્વરેણ જયં કરસ્થં કલયન્ પ્રતસ્થે ॥ ૮૪॥

ધનુર્ધરેષ્વેકતમો ભવન્ હરઃ શિતૈઃ શરૌઘૈઃ શિવનામલાઞ્છિતૈઃ ।
અવાકિરત્ સૈન્યમદૃશ્યપાતિભિર્વિશ઼્ખલં વિક્રમચોલભૂપતેઃ ॥ ૮૫॥

અનુગ્રહં સ તમનવગ્રહં વિભોર્વિચિન્તયન્ ક્ષિતિભૃતિ વંશશેખરે ।
પરિત્યજન્ ગજતુરગાન્ પલાયિતો વિના। રણં કિયદપિ ચોલભૂપતિઃ ॥ ૮૬॥

પરાક્રમેણાપ્રતિમેન પાર્થિવાન્ ગિરા સુધાસારકિરા કવીનપિ ।
જયન્નયં સપ્તસમુદ્રમુદ્રિતાં બભાર પૃથ્વીં મધુરેશ્વરાર્પિતામ્ ॥ ૮૭॥

ઇતિ મહાકવિશ્રીનીલકણ્ઠદીક્ષિતપ્રણીતે શિવલીલાર્ણવ એકોનવિંશઃ સર્ગઃ ।

## અથ વિંશઃ સર્ગઃ ।

કપિલકીરમુખાઃ કવયસ્તતઃ કતિચિદાસત તામ્રનદીતટે ।
દ્રુહિણશાપવશાજનની ગિરામવતતાર પુરા હિ યદાત્મના ॥ ૧॥

અથ ચતુર્ગુણિતા વ્યધિકા દશ ત્રિદશદેશિકધિક્કરણક્ષમાઃ ।
પ્રતિ યયુર્મધુરામભિવન્દિતું પ્રમથનાથમમી કવિપુઙ્ગવાઃ ॥ ૨॥

કવિશરીરભૃતા કવયસ્તુ તે સમધિગમ્ય હરેણ પુરસ્કૃતાઃ ।
સમવગાહ્ય સુવર્ણસરોજિનીં દદૃશુરદ્રિસુતાદયિતં મહઃ ॥ ૩॥

દૃઢવિનીતધિયઃ સુધિયસ્તુ તે દ્રમિડસૂત્રરહસ્યવિવેચને ।
મૃદુસુગન્ધિવચઃકુસુમસ્રજા વિવિધયા મધુરેશમપૂજયન્ ॥ ૪॥

અકવયઃ કતિચિદ્ વિબુધાધમાઃ કુકવયશ્ચ પરે કૃતસંવિદઃ ।
કવિભિરપ્રતિમૈર્ભુવનેષુ તૈઃ કલહમાદધિરેઽથ વિતણ્ડયા ॥ ૫॥

શબ્દાર્થૌ દોષનિર્મુક્તૌ સાલઙ્કારૌ ગુણોત્તરૌ ।
કાવ્યમાતિષ્ઠમાનેભ્યઃ કવિભ્યોઽયં કૃતોઽઞ્જલિઃ ॥ ૬॥

આદ્યં હિ શબ્દદોષાણામસાધુત્વં મતં ચ વઃ ।
સ્વરમશ્રદ્દધાનાનાં સ્વરૂપે કેવ સાધુતા ॥ ૭॥

કાવ્યાર્થાદપિ કિં દુષ્ટં કામિદુશ્ચરિતોત્તરાત્ ।
અત એવ હિ કાવ્યાનામાલાપઃ સદ્ભિરુજ્ઝિતઃ ॥ ૮॥

અથાન્ય એવ કલ્પ્યન્તે ગુણદોષા નિજેચ્છયા ।
કાકદન્તાઃ પરીક્ષ્યન્તાં ગૃહ્યન્તાં ગ્રામ્યસૂક્તયઃ ॥ ૯॥

તત્ર તત્ર પુરાણેષુ તન્ત્રેષુ ચ યદિ સ્ફુટમ્ ।
કાવ્યાલાપાનુવાદોઽસ્તિ કા જિગીષા તતોઽપિ વઃ ૧૦॥

સર્વા વાચો વદન્તીતિ સપ્તતન્તૌ મહાવ્રતે ।
ગ્રામ્યોક્તયોઽપિ કિં શાસ્ત્રે ક્રત્વઙ્ગત્વેન નોદિતાઃ ॥ ૧૧॥

અયોગ્યાનાં હિ કાવ્યાનામગ્નિસેકાદિવાક્યવત્ ।
મૂકતૈવ હિ દુર્ભેદા મુહ્યન્ત્યેષુ કથં જનાઃ ॥ ૧૨॥

કથઞ્ચિદ્યદિ સાર્થક્યં કથઞ્ચિત્તૈવ દૂષણમ્ ।
સફલઃ ક્લેશ ઇતિ ચ સમ્પ્રદાયાગતો ભ્રમઃ ॥ ૧૩॥

અક્લેશેન ફલે લભ્યે ન ક્લેશો યુક્તિમર્હતિ ।
યસ્મૈ ફલાય સા ગૌણી તદેવ સ્ફુટમીર્યતામ્ ॥ ૧૪॥

અર્થાનપિ વ્યાપ્નુવતી હતસર્વનિયન્ત્રણા ।
વ્યઞ્જના શબ્દવૃત્તિશ્ચેદ્ વેશ્યા પત્ની ન કિં ભવેત્ ॥ ૧૫॥

ધૂમેન ધ્વન્યતાં વહ્નિશ્ચક્ષુષા ધ્વન્યતાં ઘટઃ ।
અર્થશ્ચેદ્ ધ્વનયેદર્થં કા પ્રમાણવ્યવસ્થિતિઃ ॥ ૧૬॥

દુઃખતોઽપિ તુ કાવ્યોક્તઃ સુખાયાર્થો ભવેદ્યદિ ।
સુખં ભવન્તઃ શ‍ૃણ્વન્તુ સ્વનિન્દાં કવિભિઃ કૃતામ્ ॥ ૧૭॥

અહો ભાવવ્યક્તેઃ પરિણતિરહો ગૂઢરસ ઇ-
ત્યલીકવ્યામીલન્નયનવિગલદ્બાષ્પસલિલૈઃ ।
ઉદઞ્ચદ્રોમાઞ્ચૈરુદરલુલિતામૈરિવ મુહુઃ
કથં વ્યામ્રા ભૂમિઃ કાવિભિરપટુજ્ઞાનપશુભિઃ ॥ ૧૮॥

ઇતિ નિગદિતમેવાભીક્ષ્ણમાવર્ત્તયદ્ભિઃ
પ્રતિકથકવચાંસિ ક્વાપ્યનાકર્ણયદ્ભિઃ ।
અપથચિરવિનીતૈર્બાલિશૈરાત્તગન્ધાઃ
શરણમભિસમીયુશ્ચન્દ્રચૂડં કવીન્દ્રાઃ ॥ ૧૯॥

નાન્ધાશ્ચક્ષુસ્સમેતા ન ચ ખલુ બધિરા આક્ષિપન્તઃ પરોક્તીઃ
નાપ્યેતે નાથ! મૂકા વિફલમવિરલં યત્ તદુચ્ચૈઃ સ્વનન્તઃ ।
તત્તત્સૈદ્ધાન્તિકોક્તીરભિદધત ઇવ ક્વાપ્યનાઘ્રાતતત્ત્વા
દૃશ્યન્તે કેચિદેતે શિવ શિવ કુધિયામેષ સર્ગોઽદ્ભુતસ્તે ॥ ૨૦॥

કાવ્યાગમજ્ઞાઃ સુખમાક્ષિપન્તુ કા તત્ર ચિન્તા ભવતઃ પ્રસાદાત્ ।
અહો વયં પ્રવ્યથિતા અમીભિઃ કાવ્યાધ્વદુષ્ટશ્વભિરેડમૂકૈઃ ॥ ૨૧॥

દન્તોલ્લેખનખક્ષતાદિદયિતવ્યાપારપારમ્પરી-
નિર્ગ્લાનાપિ હિ કામિની દિનમુખે નિસ્સીમમાનન્દતિ ।
માર્જારી નખરાઙ્કુરાખુદશનવ્યાવિધ્યમાના મના-
ગાયુર્વેદવિદોઽભિગચ્છતિ રુદત્યાસન્નમૃત્યુર્યથા ॥ ૨૨॥

તદલં તરુણેન્દુચૂડ! નઃ પરિતાપાર્ત્તિપરીક્ષયાનયા ।
પરિવર્જય પણ્ડિતાધમૈરિદમૈકાધિકરણ્યમદ્ય નઃ ॥ ૨૩॥

વિજ્ઞાપિતઃ કવિવરૈરિતિ સુન્દરેશઃ
સ્મિત્વા દદૌ ફલકમેકમદૃષ્ટપૂર્વમ્ ।
યત્રાસતે કવય એવ યથાભિલાષ-
મન્યે તુ નાઙ્ઘ્રિમપિ વિન્યસિતું ક્ષમન્તે ॥ ૨૪॥

અધ્યારૂઢાઃ પીઠમીશાદવાપ્તં દુર્દર્શં તદ્ દુર્ધિયાં દૂરતોઽપિ ।
અષ્ટાચત્વારિંશદાદ્યાઃ કવીન્દ્રાશ્ચક્રુર્ભક્તિં ભૂયસીં ચન્દ્રચૂડે ॥ ૨૫॥

વંશચૂડામણિઃ પાણ્ડ્યો વંશશેખરકસ્તતઃ ।
જઙ્ગે યત્ર ભુવં ન્યસ્ય જઙ્ગૌ સ પરમામૃતમ્ ॥ ૨૬॥

સ તુ કદાચન ચમ્પકકોરકૈઃ પરિચરન્ પ્રમથાધિપતિં મધૌ ।
અજનિ ચમ્પકપાણ્ડ્ય ઇતિ પ્રથામભિવહન્ કવિલોકશિખામણિઃ ॥ ૨૭॥

સ કામિનીરત્નસહસ્રભોગભાગ્યોન્નતશ્ચમ્પકપાણ્ડ્યદેવઃ ।
માસે મધૌ મન્મથમારરાધ નવોઢયા નર્મપરો મહિષ્યા ॥ ૨૮॥

અપારયન્તી ત્રપયા ગલન્તીં નીવીં નિયન્તું સમુપેક્ષિતું વા ।
પત્યુર્મુખં નાભિપદં ચ બાલા પર્યાયતઃ કેવલમાલુલોકે ॥ ૨૯॥

આલિઙ્ગિતું ચુમ્બિતુમન્તતસ્તં સ્પ્રષ્ટું સમાભાષિતુમીક્ષિતું વા ।
નાર્યૈ દદૌ નાવસરં કદાચિદ્ વ્રીડા સપત્નીવ નિબદ્ધવૈરા ॥ ૩૦॥

આચ્છાદ્ય બિમ્બાધરમઙ્ગુલીભિરાબદ્ધમુગ્ધાઞ્જલિના કરેણ ।
મા મેતિ મન્દાક્ષરમર્થિતં યદતઃ કિમસ્યા મધુરોઽધરોષ્ઠઃ ॥ ૩૧॥

એકત્ર વિસ્રમ્ભકથાવિઘાતઃ પક્ષોઽપરઃ શઙ્કિતુમેવ નાર્હઃ ।
કૃચ્છ્રે તદસ્મિન્નધરં કૃશાઙ્ગ્યા ગૃહ્ણાતુ વા મુઞ્ચતુ વા યુવાયમ્ ॥ ૩૨॥

દષ્ટાધરોષ્ઠા સુદૃઢં પુરૈવ પત્યુઃ પુનશ્ચુમ્બનલાલસસ્ય ।
ચાટૂસહસ્રં શપથાઞ્છતં ચ તન્વી વિશશ્વાસ ન લેશતોઽપિ ॥ ૩૩॥

આબદ્ધસમ્રાષ્ટનિષઙ્ગમન્વગાસઞ્જિતદ્વિત્રકરાઙ્ગુલિત્રમ્ ।
આમર્દિતૈકદ્વશરાસમાસીદન્યાદૃગૂષ્માયિતમઙ્ગજસ્ય ॥ ૩૪॥

વિન્યસ્ય ગાઢં ભુજયોર્ભુજૌ સા મુખં મુખે વક્ષસિ ચાપિ વક્ષઃ ।
આલિઙ્ગતિ સ્મ સ્મરબાણવર્ષાદાચ્છાદયન્તીવ તનું પ્રિયસ્ય ॥ ૩૫॥

સકૃન્નખાગ્રોલ્લસિતઃ કચૌઘઃ શ્લથાશ્લથં સંયમિતા ચ નીવી ।
સા ચાઙ્ગયષ્ટિર્મુદિતા તરુણ્યાઃ સત્યં મુનીનામપિ મોહહેતુઃ ૩૬॥

એકાકિનીં તામપહાય લજ્જા યાતા પુરા યત્ કિલ મારયુદ્ધે ।
તતોઽપરાધાદિવ તામુપેતાં પુરેવ તન્વી ન પુરશ્ચકાર ॥ ૩૭॥

સા ગન્તુમૈચ્છચ્છયિતું સ કાલ્યે સાધત્ત સંવ્યાનમયં જહાર ।
સા નીવિમામુઞ્ચદયં વ્યમુઞ્ચદ્ ભાવેઽપિ તુલ્યે વિભિદે ક્રિયાભિઃ ॥ ૩૮॥

સસર્જ તસ્યાં કિયતો વિલાસાંશ્ચક્રે કથં નામ નિશાં ત્રિયામામ્ ।
શૃઙ્ગારસારં કલયાપિ વેધાઃ કિં વેદ વેદાક્ષરજીર્ણકોશઃ ॥ ૩૯॥

અનન્યજે વર્ષતિ કામમિત્થમપવ્યવસ્થં શરમણ્ડલાનિ ।
આદિર્નિશાદિઃ સુરતસ્ય યૂનોરન્તો નિશાન્તોऽપિ ચ પર્યણંસીત્ ॥ ૪૦॥

સ જાતુ પ્રાસાદે શયનમધિગચ્છન્ ક્ષિતિપતિઃ
    સમાજઘ્રૌ ગન્ધં કુસુમકુલદુષ્પ્રાપમતુલમ્ ।
મહિષ્યાઃ પદ્મિન્યા મલયપવમાનૈરુપહૃતં
    પ્રસૂતં કેશાન્તાત્ પ્રશિથિલદૃઢગ્રન્થિશિથિલાત્ ॥ ૪૧॥

પદ્મસૌરભ્યજાતીયં પદ્મિનીકેશસમ્ભવમ્ ।
અનાઘ્રાતચરં ગન્ધમવાસાસીત્ સ તં નૃપઃ ॥ ૪૨॥

મનોગતં મે કવયત્યવેત્ય યઃ સ એતદગ્ર્યં લભતાં સુધીરિતિ ।
અલમ્બયદ્ દ્વારિ સુવર્ણમુદ્રિકાસહસ્રમાબધ્ય સ પાણ્ડ્યભૂપતિઃ ॥ ૪૩॥

ઉચ્ચાવચાભિરપિ ભઙ્ગિભિરુલ્લિખન્તો
    નાદ્રાક્ષુરમ્ય હૃદયં કવયો મહાન્તઃ ।
આસાદ્ય કશ્ચન વટુઃ પુનરાદિશૈવઃ
    પદ્યં પ્રભોરધિસભં પઠતિ સ્મ હૃદ્યમ્ ॥ ૪૪॥

તસ્મૈ કિલાર્થિતવતે મુચિરં પ્રસાદ્ય
    દારક્રિયાર્થમધનાય ધનં સમગ્રમ્ ।
પદ્યં દદૌ નૃપતિભાવનિબન્ધહૃદ્ય-
    માર્યામયં તદખિલાશયવિન્મહેશઃ ॥ ૪૫॥

જાનાસિ પુષ્પગન્ધાન ભ્રમર ! ત્વં બ્રૂહિ તત્ત્વતો મેऽદ્ય ।
દેવ્યાઃ કેશકલાપે તુલ્યો ગન્ધેન કિં ગન્ધઃ ॥ ૪૬॥

ઇતિ તાવદિમામાર્યામિન્દુકલાભરણવદનનિર્ગલિતામ્ ।
પઠતિ દ્વિજે સભાયાં પ્રભોરભૂદ્ વિસ્મયો ભૂયાન્ ॥ ૪૭॥

તદનુજ્ઞયા સ વર્ણી તત્ કનકં સદસિ યાવદાદત્તે ।
તાવત્ તદસહમાનઃ પ્રત્યવતસ્થે કવિઃ કીરઃ ॥ ૪૮॥

અપરિષ્કૃતે પ્રસૂનૈરસ્તિ કચેऽપિ કિમસૃઝ્મલે ગન્ધઃ ।
કિં ચિન્તિતમવનિભૃતા કિં દૃષ્ટં ધીમતા ભવતા ॥ ૪૯॥

ઇતિ તસ્ય દુરાક્ષેપાદપ્રતિભે બ્રહ્મચારિણિ સ્તબ્ધે ।
પ્રાદુર્ભૂયાહ હરઃ કવિવેષધરઃ પુરસ્તેષામ્ ॥ ૫૦॥

કેન કુધિયા સભાયામન્તેવાસી મમાયમાક્ષિપ્તઃ ।
પ્રકૃતિઃ સા પદ્મિન્યાઃ પઙ્કજગન્ધઃ શરીરે યઃ ॥ ૫૧॥

પાર્થિવકુસુમવિહીને ભવતિ શચીકુન્તલે કથં ગન્ધઃ ।
કઃ શઙ્કિતોઽપ્યુપાધિઃ ક્રમતે કબરીપરીમલે ગૌર્યાઃ ॥ ૫૨॥

કાર્મણમલાત્મમૂર્તિષુ ઘટતે યદિ પાર્થિવેષુ સૌરભ્યમ્ ।
કિમિવ ખલુ પદ્મિનીનામપકૃતમસૃજાં મલૈઃ કેશૈઃ ॥ ૫૩॥

ઇતિ વિજિત્ય તમુદ્ધતમુદ્ધતૈઃ કવિવરે પરિગર્જતિ ભાષિતૈઃ ।
અલભત દ્રવિણં સ વટુર્ઝટિત્યવાનિપોઽપ્યવરોધગૃહં યયૌ ॥ ૫૪॥

કવિષ્વેકીભૂય સ્વયમપિ હરઃ સઙ્ઘિષુ ચરન્
કથાઃ કુર્વન્ હૃદ્યાઃ સ્વયમપિ વસન્ સઙ્ઘફલકે ।
વૃતસ્તૈઃ સ્વામિત્વે વિવિધરચનાભિર્ભણિતિભિઃ
કદાચિદ્ ગૌરીશઃ કલહમભજત્ કીરકવિના ॥ ૫૫॥

અવિશ્રાન્તે સ કીરેઽસ્મિન્નાક્ષેપાભાસદુર્ગ્રહાત્ ।
પ્રાદર્શયત્ સ્વમાત્માનં પઞ્ચવક્રં ત્રિલોચનમ્ ॥ ૫૬॥

ભક્તોઽપિ કરિઃ પરમાદ્ભુતં તત્ પશ્યન્નપિ પ્રત્યુત દુર્બભાષે ।
મૌઢ્યાન્નિરૂઢાદપિ પામરાણાં મૌઢ્યં ચિદાભાસગતં ગરીયઃ ॥ ૫૭॥

ચતસૃષ્વપિ દિક્ષુ પશ્યતા ચતુરેણાપિ મહેશ્વર ! ત્વયા ।
કવિકર્માણ નૈક્ષિ દૂષણં કથમુદ્ભાવિતમપ્યહો મુહુઃ ॥ ૫૮॥

ભાવત્ક્યઃ કૃતયઃ શ્રુતિઃ શ્રુતિરિતિ પ્રૌઢિં પરાં પ્રાપિતા
અધ્યાહારવિપર્યયપ્રકરણોત્કર્ષાનુષઙ્ગાદિભિઃ ।
તાત્પર્યાન્તરવર્ણનેન ચ સમર્થ્યન્તે યદસ્માદૃશૈ-
સ્તજ્જાનન્ કવિતાસુ નઃ પશુપતે! દોષેક્ષિકા મા કૃથાઃ ॥ ૫૯॥

ઈશ! ત્વમસિ નનુ ધ્રુવમીશાનઃ સર્વવિદ્યાનામ્ ।
કીરકૃતે ત્વાક્ષેપે કીરવદનુભાષણં જ્યાયઃ ॥ ૬૦॥

જ્ઞાનાજ્ઞાનવ્યતિકરપરીણામમીશોઽસ્ય પશ્યન્
ભક્તાજ્ઞાનપ્રશમમકૃતં ચિન્તયિત્વા સ્વમાગઃ ।
કાલેનાસ્ય સ્મૃતિકલુષતામુદ્યિયીર્પુસ્તિરોઽભૂ-
દેતાવન્તો યદિ હિ ન ગુણાઃ કઃ સ નશ્ચન્દ્રચૂડઃ ॥ ૬૧॥

શિવાતિવાદપ્રભવેન પાપ્મના સ તાપિતો દુર્વિષહેણ દુર્મતિઃ ।
પપાત ગાઙ્ગેયપયોજિનીજલે તદેવ જાનન્નભિપજ્યભેષજમ્ ॥ ૬૨॥

નિત્યાધમર્ણસ્ય સકૃત્પ્રણત્યા નીપાટવીસન્નિહિતસ્ય ધામ્નઃ ।
કારુણ્યતઃ સઞ્જનિતાનુતાપમ્તુષ્ટાવ કીરસ્તુહિનાંશુચૂડમ્ ॥ ૬૩॥

અપિ પ્રણેતા નિગમાગમાનામાદ્યઃ કવિસ્તમ્ય તુતોષ સદ્યઃ ।
વિજ્ઞાનખદ્યોતવિજૃમ્ભિતાભિર્વાગ્ભિઃ સ લુભ્યન્ ગુણગન્ધતોઽપિ ॥ ૬૪॥

ઉત્તાર્યમાણે કનકામ્બુજિન્યાઃ કીરે કરાલમ્બસમર્પણેન ।
ઉત્તારિતં તં ભવસાગરાદપ્યૂહામ્બભૂવુર્મુનયઃ પુરાણાઃ ॥ ૬૫॥

અજ્ઞાનમસ્ય કવિતાપદસમ્પ્રરૂઢ-
  માદ્યઃ કવિઃ શમયિતું કલશોદ્ભવેન ।
ઉદ્બોધયન્ દ્રમિડસૂત્રરહસ્યસાર-
  મુચ્ચૈર્યશો જગતિ કીરકવેર્વ્યતારીત્ ॥ ૬૬॥

અધીત્ય કીરાદ્ દ્રમિડાગમાર્થમથાપરે સઙ્ઘકવિપ્રવેકાઃ ।
વૃત્તીર્વિચિત્રાઃ સ્વયમારચય્ય પસ્પર્ધિરે તે તુ પરસ્પરેણ ॥ ૬૭॥

સ્વસ્ય પ્રબન્ધોત્તમમધ્યમત્વે સંશય્ય સર્વે કૃતસંવિદસ્તે ।
સર્વજ્ઞમીશં શરણં પ્રપન્નાસ્તસ્મિન્નતિષ્ઠન્ત કૃતપ્રણામાઃ ॥ ૬૮॥

આવિર્ભૂય તતો લિઙ્ગાદાહ તાન્ મધુરેશ્વરઃ ।
તદીયેષુ પ્રબન્ધેષુ તારતમ્યવિવેચને ॥ ૬૯॥

અસ્તિ રુદ્ર ઇતિ ખ્યાતો વૈશ્યઃ સ્કન્દાંશસમ્ભવઃ ।
શાપાન્મે મૂકતાં પ્રાપ્તઃ સ વશ્છેત્સ્યતિ સંશયમ્ ॥ ૭૦॥

શ‍ૃણ્વતસ્તસ્ય યાં હર્ષાત્ સ્યન્દતે બાષ્પનિર્ઝરઃ ।
સકણ્ટકાનિ ચાઙ્ગાનિ સા વૃત્તિર્ગૃહ્યતામિતિ ॥ ૭૧॥

તદનુ તમુપગમ્ય શ્રાવયન્તઃ સ્વસૂક્તીઃ
  પૃથગુપચિતબાષ્પાઃ કણ્ટકોદ્રેદરમ્યાઃ ।
કપિલભરણકારૈઃ કલ્પિતા એવ વૃત્તીઃ
  પરિજગૃહુરથાન્યાસ્તત્યજુર્દૂરતસ્તે ॥ ૭૨॥

દિવં ગતે ચમ્પકપાણ્ડ્યદેવે તતશ્ચિરાત્ કોઽપિ તદન્વવાયે ।

રાજા કવીનામપિ પાર્થિવાનાં રાજા કુલેશો ધરણીં બભાર ॥ ૭૩॥

અથ સઙ્ઘિષુ કસ્યચિત્ કવેરવમેને સ યદા સરસ્વતીમ્ ।
મધુરાધિપતેર્મનસ્યભૂત્ પ્રતિઘો ભક્તદયાનિધેસ્તદા ॥ ૭૪॥

કદમ્બમૂલમુત્સૃજ્ય કવિભિઃ સહ શઙ્કરઃ ।
સ્થાનમુત્તરહાલાસ્યં પ્રાપ વેગવતીતટે ॥ ૭૫॥

ક્ષિતિપતિરથેશાનં જાનન્ રુષા પરિનિર્ગતં
કવિકુલમશેષ કવિભિઃ સહ શઙ્કરઃ ।
પ્રતિનવસુધાધારાસારાસ્પદૈર્વચનૈઃ સ્તુવન્
નગરમનયદ્ ભૂયઃ શ્રેયસ્કરં જગતાં હરમ્ ॥ ૭૬॥

કાલેન કેનાપિ તુ કારણેન દેવીં ક્વચિદ્ દાશકુલેઽવતીર્ણામ્ ।
પાણૌ ગ્રહીષ્યન્ પ્રમથાધિનાથસ્તીરં યયૌ દક્ષિણવારિરાશેઃ ॥ ૭૭॥

સ દાશમાશંસિતકન્યકાવરં સમેત્ય દેવો મધુરેશ્વરો યુવા ।
સુતાં યયાચે સ્વયમુદ્ગિરન્ ગિરા સ્વમદ્ભુતં વાગુરિકત્વકૌશલમ્ ॥ ૭૮॥

અદૃષ્ટચરમદ્ભુતં વપુરમુષ્ય પશ્યન્નપિ
પ્રભાવમવધારયન્નપિ તતઃ સ્ફુટં ધીવરઃ ।
પરીક્ષિતુમમું પુનર્જલધિગર્ભસઞ્ચારિણં
મયા સમુપદર્શિતં મકરમાહરેત્યાદિશત્ ॥ ૭૯॥

આસાદ્ય વૈસારિણતાં ચરન્તમમ્ભોનિધૌ નન્દિનમાત્મશાપાત્ ।
સન્દર્શિતં દાશકુલેશ્વરેણ સાનન્દમાલોકત ચન્દ્રચૂડઃ ॥ ૮૦॥

મહામાયાજાલં મહદપિ નિજં સ્વપ્રપદનાદ્
વિજિત્ય સ્વચ્છન્દં પયસિ વિહરન્તં જલનિધેઃ ।
ગ્રહીતું શૈલાદિં કિલ કરુણયા વાગુરિકયા
વિશાલં ચિક્ષેપ ત્રિપુરમથનો જાલમુદધૌ ॥ ૮૧॥

તદ્ભક્તિવાગુરાબદ્ધસ્તરુણેન્દુશિખામણિઃ ।
આક્ષિપ્ય કરુણાજાલમાચકર્ષ તમર્ણવાત્ ॥ ૮૨॥

મીનગ્રહાયાપિ કૃતપ્રવૃત્તિં મૃગાઙ્કમૌલિં વનિતાદરેણ ।
પશ્યન્નનઙ્ગો વિજયધ્વજં સ્વં પ્રાયેણ ચક્રે તદુપક્રમં તમ્ ॥ ૮૩॥

આસાદ્ય સઞ્ચરં દેહમાગમાન્વેષણોચિતમ્ ।

આલુલોકે પરં તત્ત્વમાગમાન્વિષ્ટમૈશ્વરમ્ ॥ ૮૪॥

પર્યુપાસિતપાદોઽયં પ્રકૃતિસ્થેન નન્દિના ।
કૈવર્તકન્યાં જગ્રાહ કૈરવપ્રિયશેખરઃ ॥ ૮૫॥

સમુત્સૃજન્ સ મત્સ્યતાં નનન્દ નન્દિકેશ્વરઃ
 સ ધીવરશ્ચ ભૂતલે સુધીવરત્વમાગતઃ ।
વિમાનમાગમય્ય તાં સમાગતે પુરં શિવે
 તદા તદાશયે મુદં દદાશ દાશકન્યકા ॥ ૮૬॥

ઇતિ મહાકવિશ્રીનીલકણ્ઠદીક્ષિતપ્રણીતે શિવલાલાર્ણવે વિંશઃ સર્ગઃ ।

## અથૈકવિંશઃ સર્ગઃ ।

કુલેશમારાધયતો મહેશં કુલેશપાણ્ડ્યાદભવત્ કુમારઃ ।
અન્વયર્થન્ સ્વામરિમર્દનાખ્યાં બભાર પિત્રા વિધૃતાં ભુવં યઃ ॥ ૧॥

આસ્થાનભૂષામણિરસ્ય રાજ્ઞઃ સર્વાગમજ્ઞઃ સચિવઃ સુમેધાઃ ।
આસીદ્ દ્વિજો વાતપુરીશનામા વાચસ્પતિર્વાસવસંસદીવ ॥ ૨॥

સ સઞ્જિઘૃક્ષુસ્તુરગાનુદારાન્ સર્વૈર્ધનૌઘૈરપિ પાણ્ડ્યદેવઃ ।
તમાદિશદ્ વાતપુરીશમેવ ચોલેષુ ગન્તું તટમમ્બુરાશેઃ ॥ ૩॥

લબ્ધાભ્યનુજ્ઞઃ સચિવઃ સ ગચ્છન્ દ્વિત્રૈર્દિનૈઃ પ્રેક્ષત ચોલદેશમ્ ।
સ્તોતું પ્રસક્તે વિષયાન્તરેઽપિ જાગર્ત્તિ યાસ્મિન્નુપમાનભાવઃ ॥ ૪॥

કાન્તાસહસ્રોપગતસ્ય સિન્ધોઃ કા વા રતિઃ પ્રાવૃષિ સેવયેતિ ।
સઙ્ગચ્છતે તેન નિદાઘ એવ સહ્યાત્મજા યત્ર હિ નિસ્સપત્નમ્ ॥ ૫॥

વર્ષાસ્વવજ્ઞૈવ શરદ્યુપેક્ષા દ્વેષો હિમે વાથ હિમાત્યયે વા ।
યત્રાપ્સુ રાગઃ સુરભૌ શુચૌ ચ તત્રૈવ યસ્મિન્ સરિતો વહન્તિ ॥ ૬॥

પ્રાવૃડ્વિમર્દો દિશિ પશ્ચિમાયામુત્પીડપીડા પુનરુત્તરસ્યામ્ ।
સ્વૈરોપયોગો યદિ સહ્યજાયા યત્રૈવ સૌભાગ્યમિતઃ કિમસ્ય ॥ ૭॥

પ્રત્યગ્રપૂગાભિગતેષુ યસ્મિન્ પ્રસ્નિગ્ધરમ્ભાવનમેદુરેષુ । (પ્રત્યગ્રપૂરાભિગતેષુ)
કવેરકન્યાતટકાનનેષુ કામઃ સમુન્મીલતિ ધર્મ એવ ॥ ૮॥

હવ્યાય યત્રાપતતાં સુરાણામાતિથ્યનિર્વર્ત્તનતોઽનુવેલમ્ ।
ગન્ધર્વવિદ્યાધરકિન્નરાદ્યા નિર્વિઘ્ન નિન્દન્તિ પથિ સ્થિતિં સ્વામ્ ॥ ૯॥

અધ્યેતુમધ્યાપયિતું ચ તન્ત્રાણ્યાહર્તુમર્થાનથ ચોપભોક્તુમ્ ।
સ્વર્ગાપવર્ગૌ ચ વશે વિધાતું જાત્યૈવ યસ્મિન્ દ્રમિડા નિરૂઢાઃ ॥ ૧૦॥

સ્વાદીયસી યત્ર કવેરજૈવ તતસ્તરાં કેરફલોદકાનિ ।
તતસ્તમાં ચાથ ગિરાં વિલાસાઃ પ્રસન્નગમ્ભીરપદાઃ કવીનામ્ ॥ ૧૧॥

દ્રષ્ટું ન રમ્ભાપનસામ્રકેરચ્છાયાવૃતે યત્ર હિ શક્યમર્કમ્ ।
શક્યં તુ સમ્ભાવયિતું સરોજસૌરભ્યસમ્ભારહરૈઃ સમીરૈઃ ॥ ૧૨॥

યે જાતિભેદાઃ ક્રમુકામકેરશાલીક્ષુરમ્ભાફણિવલ્લરીણામ્ ।
વ્યુત્પિત્સવસ્ત્રેષુ ચરન્તિ પાન્થા વિશ્રમ્ય વિશ્રમ્ય ચિરાય યસ્મિન્ ॥ ૧૩॥

આદાય શસ્ત્રાણ્યવગાહ્ય સિન્ધું તપાંસિ વિક્રીય ચ તન્ત્રયન્તે ।
યત્રાન્યતસ્તત્ર કલૌ યદીયા યજન્ત્યવિચ્છિન્નમધીયતે ચ ॥ ૧૪॥

સાન્યત્ર સિન્ધુર્નનુ યાત્ર કુલ્યા તેઽન્યત્ર ધન્યા ઇહ યે કદર્યાઃ ।
અભ્યસ્તવિદ્યા ઇવ યેઽત્ર કિઞ્ચિદન્યત્ર વિદ્યાગુરવસ્ત એવ ॥ ૧૫॥

ગચ્છન્નહોભિઃ કતિભિશ્ચિદસ્મિન્ સ પશ્ચિમે યોજનતઃ પયોધેઃ ।
માકન્દરમ્ભાવનસાન્દ્રમેકં માહેશ્વરં ધામ સમાલુલોકે ॥ ૧૬॥

અધ્યાસિતં પાશુપતૈર્મહદ્ભિરાલોક્ય વલ્મીકપતેઃ પદં તત્ ।
અપ્રાકૃતીં ભાગ્યવશાત્ તતોઽયમાધ્યાત્મિકીં તામપિ શુદ્ધિમૂહે ॥ ૧૭॥

આસ્થાય કારુણ્યરસૈકરૂપામાચાર્યમૂર્ત્તિં મધુરૈર્વચોભિઃ ।
પ્રબોધયન્તં શતશો મહર્ષીન્ પ્રત્યક્ષમૈક્ષિષ્ટ સ ચન્દ્રચૂડમ્ ॥ ૧૮॥

અઙ્ગૈઃ ક્ષિતાવષ્ટભિરાનમન્તં તં દૂરતો બાષ્પતરઙ્ગિતાક્ષમ્ ।
દૃષ્ટ્યા દયાશીલતયાનુગૃહ્ણન્ દેવઃ સમીપસ્થિતિમાદિદેશ ॥ ૧૯॥

ઉત્પ્રેક્ષિતસ્યોદ્ધ્રણશક્તિપાતં શુદ્ધાધ્વલિપ્સાસુભગૈર્વચોભિઃ ।
સમ્ભાવયન્ નૈષ્ઠિકદીક્ષયા તં ચન્દ્રાર્ધચૂડઃ સ્વયમન્વગૃહ્ણાત્ ॥ ૨૦॥

આરુહ્ય માહેશ્વરમાશ્રમં સઃ સઞ્છિન્નપાશઃ સચિવઃ ક્ષણેન ।
અશ્વાય નીતૈર્દ્રવિણૈર્મહેશમારાધયન્ પાર્થિવમપ્યરક્ષત્ ॥ ૨૧॥

આકારિતો દૂતમુખેન રાજ્ઞા કર્ણેજપાલાપકલઙ્કિતેન ।
અશ્વૈઃ સહૈવાગમનં સ્વકીયં શમ્ભોર્નિદેશેન સ સન્દિદેશ ॥ ૨૨॥

અશ્વાનસઙ્ખ્યાનહમાનયેયમાસીદ રાજાનમપેતશઙ્કઃ ।
ઇતિ સ્થિર વ્યાહૃતમિન્દુમૌલેર્વિશ્વસ્ય ભૂયઃ સ પુરીમવિક્ષત્ ॥ ૨૩॥

અશ્વાનમૂલ્યાનમિતાન્ સમીપમાસાદિતાનપ્યરિમર્દનાય ।
નિવેદયન્ વૃત્તમિદં સ સર્વં ન્યવેદયન્નીપવનેશ્વરેઽપિ ॥ ૨૪॥

પન્થાનમાલક્ષ્ય તુરઙ્ગમાણાં પાણ્ડ્યે પરેદ્યુઃ સ્વયમાદિનાન્તાત્ ।
ક્રુદ્ધ્યત્યુદાકુર્વત રાજભૃત્યાઃ ક્રૂરાશયા મન્ત્રિણિ લબ્ધરન્ધ્રાઃ ॥ ૨૫॥

કૃતાભ્યનુજ્ઞૈઃ કુપિતેન રાજ્ઞા ક્રૂરૈશ્ચિરદ્વેષિભિરસ્ય ભૃત્યૈઃ ।
કદર્થ્યમાનઃ કરુણં સ ભૂયો વિસૃજ્ય ધૈર્યં વિલલાપ ધીરઃ ॥ ૨૬॥

વ્યાસજ્જસે કિમધુના વિધિકેશવાદ્યૈ-
    ર્વ્યાસજ્જસે કિમથવા લલિતૈર્ભવાન્યાઃ ।
ક્રન્દન્તિ કત્યશરણા ઇહ માદૃશોઽન્યે
    કર્ણાતિથિર્ભવતુ કસ્ય તવાર્ત્તનાદઃ ॥ ૨૭॥

બદ્ધસ્ય દુષ્પરિહરૈર્મલકર્મમાયા-
    બન્ધૈસ્ત્રિભિર્મમ ચિરાદપિ દીનબન્ધો! ।
બન્ધં હરિષ્યસિ કિલેતિ ધૃતક્ષણસ્ય
    બન્ધં તુરીયમપિ હા કથમદ્ય દત્સે ॥ ૨૮॥

કર્મેતિ કાલ ઇતિ વાપદિશન્તિ યેઽન્યે
    કિં તૈરિતિ ત્રિજગતીં તૃણવદ્ વિચિન્ત્ય ।
ત્વામેવ સંશ્રિતવતોઽપિ દશા યદીયં
    ત્વં બુધ્યસે ક્વનુ ભવત્યયશો યશો વા ॥ ૨૯॥

નાહં બિભેમિ નૃપતેર્નચ તદ્ભટેભ્યઃ
    કુર્વન્તિ નામ કિમમી પરતોઽપિ મૃત્યોઃ ।
ઇત્થં કૃતાન્તવશગેઽપિ હિ મય્યુપેક્ષા
    કિં તે ભવેદિતિ વિષીદતિ કિન્તુ ચેતઃ ॥ ૩૦॥

એકં વિધેયમવલમ્બનમિત્યુપેક્ષ્ય
    નીતિં શ્રિતોઽસ્મિ ચરણૌ તવ ચન્દ્રમૌલે! ।
આતઃ કિમિત્થમિયમાપદિ મે મહત્યા-
    મન્યોન્યદત્તભરયોરનયોરુપેક્ષા ॥ ૩૧॥

કિં જ્ઞાનયોગવિભવૈઃ શિવ! કિં તપોભિઃ
    કિં કર્મભિશ્ચ હૃદયં તવ રઞ્જયેયમ્ ।

ક્રન્દલ્લુઠત્કૃપણદર્શનકૌતુકં વા
    નિર્વર્ત્ય દાસ્યપદવીં તવ નિર્વહેયમ્ ॥ ૩૨॥

પ્રારબ્ધકર્મણિ ચલત્યવિલઙ્ઘનીયે
    ભાક્તિઃ કરિષ્યતિ કિમીશપદાર્પિતેતિ ।
દુર્નિશ્ચયો હતધિયામિહ દુઃશ્રવોઽયં
    નિન્દેવ તે મનસિ મે પરિવર્તમાનઃ ॥ ૩૩॥

કિં મત્કૃતેઽવતરિતવ્યમશિક્ષિતં તે
    કિં વા ભુજાભુજિ પરૈઃ કલહાયિતવ્યમ્ ।
સઙ્કલ્પમાત્રમપિ ચેન્ન ચિકીર્ષસિ ત્વં
    શમ્ભો ! મમૈવ તુ જિતં દુરિતૈર્દુરન્તૈઃ ॥ ૩૪॥

ભક્તિર્દૃઢા યદિ મમાસ્તિ ભવેત્ કિમેવં
    કો વેદ તત્ત્વમિદમસ્તિ તુ મેઽન્તરઙ્ગે ।
લોકાસ્તુ ભક્ત ઇતિ માં જગૃહુર્યથા તે
    ત્વાં ભક્તવશ્યમવયન્તિ તથા દયેથાઃ ॥ ૩૫॥

કઃ સ્વાપરાધિષુ પરાક્રમતે ન લોકઃ
    શૃઙ્ગેણ હન્તિ નનુ ગૌરપિ દણ્ડહસ્તમ્ ।
ભક્તાપદક્ષમતયૈવ તવેશ્વરત્વં
    તાં નાશય દ્રઢય વા સમયસ્તવાયમ્ ॥ ૩૬॥

યત્ પ્રાલપં ચરણયોસ્તવ યત્તદિત્થં
    મુગ્ધો વિદગ્ધ ઇવ મુગ્ધશશાઙ્કમૌલે! ।
તત્ ક્ષમ્યતાં મમ તુ કો વચનેઽધિકારઃ
    સ્વામી પરામૃશતુ વા સ્વમુપેક્ષતાં વા ॥ ૩૭॥

ઇતિ નિશમ્ય સ વાતપુરીશિતુઃ કરુણમાલપિતં કરુણાનિધિઃ ।
તુરગલક્ષખુરક્ષતરેણુભિઃ પરિપતન્ દદૃશે વિધુશેખરઃ ॥ ૩૮॥

શિવે તુરગસાદિત્વં શ્રિતે ભક્તાનુકમ્પયા ।
શિવા સ્વયં તુરગતાં શિશ્રાય બહુધા તદા ॥ ૩૯॥

કુમુદકજ્જલકુઙ્કુમદાડિમીકુસુમહેમકુવેલસમત્વિષઃ ।
પરુષહેષિતભીષિતશાત્રવા દદૃશિરે દિશિ દિશ્યપિ સૈન્ધવાઃ ॥ ૪૦॥

સમુત્તુઙ્ગત્વઙ્ગત્તરતુરગરિઙ્ખાશતહત-

ક્ષમારેણુશ્રેણિક્ષણચુલકિતૈરમ્બુનિધિભિઃ ।
સ્થલીભૂતૈઃ સદ્યઃ સતિ ધરણિભાગે દ્વિગુણિતે
ભવિષ્યન્ કૈમુત્યાદજનિ વિશદસ્તસ્ય વિજયઃ ॥ ૪૧॥

યદિ મરુદ્ વિજિતં વિજિતં મનો યદિ મનો વિજિતં વિજિતં જગત્ ।
જિતવતાં મરુતં ચ તદર્વતાં કિમભિધેયમતસ્ત્રિજગજ્જયે ॥ ૪૨॥

ઉદાત્તેષ્વારોહન પ્રસભમનુદાત્તેષ્વવતર-
ઞ્છનૈઃ ક્રામન્નેવ સ્વરિતપથમેકશ્રુતિમપિ
સમુદ્યન્મીમાંસાદ્વયમયખલીનેકવિધૃતઃ
પુરઃ પ્રાદુર્ભૂતઃ પુરમથિતુરામ્નાયતુરગઃ ॥ ૪૩॥

તત્ર કઞ્ચિદતિચિત્રતેજસં સાદિનં પ્રપતનપ્રસાદિનમ્ ।
પશ્યતિ સ્મ બહુમાનવિસ્મયસ્મેરદૃષ્ટિરરિમર્દનો નૃપઃ ॥ ૪૪॥

વ્રીડાનુતાપવ્યથિતોઽથ પાણ્ડ્યઃ પ્રકાશયન્ વાતપુરીશમગ્રે ।
સમીપમાસેદુષિ સાદિવર્યે પ્રત્યુદ્યયૌ તેન સમં પ્રહૃષ્ટઃ ॥ ૪૫॥

કૃતપ્રણામેન કૃતપ્રણામઃ સ્તુવન્ નૃપેણ સ્તુવતા સ ભૂયઃ ।
કૃતાઃ કથાઃ કાશ્ચિદથાન્તતોઽશ્વાન્ વિક્રીય યચ્છન્નિદમાચચક્ષે ॥ ૪૬॥

આનીતમાસીદ્ ધનમશ્વહેતોરનેન યત્ તે સચિવેન રાજન્ ! ।
તત્ સર્વમાદાય તવૈવ ભૂત્યૈ મયાહૃતાઃ પશ્ય શિવાસ્તુરઙ્ગાઃ ॥ ૪૭॥

ગુલ્મેષુ કુઞ્જેષુ વનોદરેષુ કેદારકેષૂપવનેષુ ચામી ।
સ્વચ્છન્દચારા લઘુવિક્રમાશ્ચ તરન્તિ તોયેષ્વપિ દુસ્તરેષુ ॥ ૪૮॥

ન શ્વોઽયમસ્તીતિ કિલાશ્વશબ્દસ્તન્ત્રૈર્નિરુક્તો વિદિતસ્તવાપિ ।
સમ્યક્ પરીક્ષ્ય ત્વમિમં ગૃહાણ ધનં મમૈતત્ તુરગાસ્તવેમે ॥ ૪૯॥

તથેતિ તસ્ય પ્રતિનન્દ્ય વાચં તં ભૂષણૈર્હેમભિરમ્બરૈશ્ચ ।
સમ્ભાવ્ય સદ્યો વિસૃજન નૃપાલસ્તૃપ્તિં ન લેભે તુરગાન્ સ પશ્યન્ ॥ ૫૦॥

આજ્ઞાપિતા દ્રાગરિમર્દનેન પાણ્ડ્યેન ભૃત્યાઃ પરિતો ભ્રમન્તઃ ।
બબન્ધુરશ્વાનથ મન્દુરાસુ સાર્ધં વિનીતૈસ્તુરગૈઃ પુરાણૈઃ ॥ ૫૧॥

પરેદ્યુરશ્વાવસથે નિયુક્તાઃ પ્રાતઃ સમૈક્ષન્ત નૃપાલભૃત્યાઃ ।
સમન્તતોઽશ્વાન્ દશતઃ પુરાણાઞ્ શબ્દાયમાનાઞ્ શતશઃ સૃગાલાન્ ॥ ૫૨॥

આકર્ણ્ય વૃત્તં મહદદ્ભુતં તત્ પાણ્ડ્યઃ પ્રજજ્વાલ રુષા સ ભૂયઃ ।

ઇત્થં કિલેદં કૃતમિન્દ્રજાલમનેન નૂનં મયિ મન્ત્રિણેતિ ॥ ૫૩॥

દુષ્ટૈઃ સ્વતો રાજનિદેશરૂક્ષૈઃ કદર્થિતો રાજભટૈઃ સ ભૂયઃ ।
આત્માનમાત્મન્યનુસન્દધાનો ન ક્લેશલેશં ગણયામ્બભૂવ ॥ ૫૪॥

અત્રાન્તરે ભક્તમનુગ્રહીતુમાલોચ્ય કારુણ્યનિધિર્મહેશઃ ।
ભયાનકા દુર્લલિતૈસ્તરઙ્ગૈઃ પ્રાવર્ત્તયદ્ વેગવતીમકાણ્ડે ॥ ૫૫॥

સા નિષ્પતન્ત્યેવ પુરં સમસ્તં કલ્લોલજાલૈઃ કબલીચકાર ।
સંરુધ્ય યે મન્ત્રિણમભ્યહિંસન્ સમ્ભ્રમ્ય દૂરે પરિદુદ્રુવુસ્તે ॥ ૫૬॥

પૂરેણ તસ્યાઃ પુરશાસનસ્ય કારુણ્યપૂરેણ વિનિર્યતેવ ।
નિર્મોચિતો વાતપુરીશ્વરોઽપિ હાલાસ્યનાથાન્તિકમાસસાદ ॥ ૫૭॥

તાં બધ્યમાનાં શતશોઽપિ મર્ત્યૈઃ પાત્રોદરે વેગવતીમમાન્તીમ્ ।
આલક્ષ્ય બન્ધું નૃપતિઃ સ પૌરાનાબાલવૃદ્ધાઙ્ગનમાદિદેશ ॥ ૫૮॥

બધ્નત્સુ પૌરેષુ વિભજ્ય સીમામાપૂપિકી કાચિદતીવ જીર્ણા ।
નિર્બધ્યમાના નૃપતેર્ભુજિષ્યૈર્વિચિન્વતી કર્મકરં ચચાર ॥ ૫૯॥

સા પિષ્ટકાનેવ સદા પચન્તી નિવેદયન્તી મનસા મહેશે ।
તદ્વિક્રયેણાપિ ચ વર્તયન્તી દયાસ્પદં ભૂતપતેર્બભૂવ ॥ ૬૦॥

ગવેષયન્તી જરતી સમન્તાદ્ ગવેષ્યમાણં નિગમૈઃ સમસ્તૈઃ ।
ઐક્ષિષ્ટ સા કર્મકરં યુવાનમંસોપરિન્યસ્તખનિત્રમેકમ્ ॥ ૬૧॥

તામાહ વૃદ્ધામભિગમ્ય દેવઃ કિં કર્મ કુર્યાં તવ શંસ માતઃ! ।
અનાશ્રયઃ કર્મકરો જનાનામાસે ચિરાદત્ર હિ નાથકામઃ ॥ ૬૨॥

આપૂપિકી કિં ધનમર્થયિષ્યે ભક્ષ્યેણ મે કર્મકૃતો હિ ભાવ્યમ્ ।
વિક્રીય પૂર્ણાન્ વિતરત્વપૂપાન્ ક્ષામાનથામાગ્ચ્છિથિલાંશ્ચ મહ્યમ્ ॥ ૬૩॥

કિયાનયં વેગવતીનિરોધઃ કિયાનયં રાજભટાનુરોધઃ ।
પ્રતીહિ માતઃ! પચ પિષ્ટકં ત્વં વિન્યસ્ય ભારં મયિ વીતશઙ્કા ॥ ૬૪॥

આમન્ત્રણૈરેવ વિમોહયંસ્તામમ્બેતિ દેવીતિ પિતામહીતિ ।
વિસંસયન્નૂષ્મલમૂષ્મલં સ જગ્રાહ તત્ સર્વમપૂપજાતમ્ ॥ ૬૫॥

જગૌ જહાસ પ્રણનર્ત્ત ચિત્રં વવલ્ગ વલ્ગૂનિ વચાસ્યમાણીત્ ।
વ્યાસઞ્જયન્ કર્મકૃતઃ સમસ્તાન્ વિસ્રબ્ધમેકો વિજહાર દેવઃ ॥ ૬૬॥

ઇદં ખનિત્રં પિટકોઽયમેષ રાશિર્મૃદામદ્ય મયોપનીતઃ ।
પશ્યતિ રાજ્ઞો ગણકાન્ સમેતાન્ પ્રસારયંસ્તાનહસીન્નિવૃત્તાન્ ॥ ૬૭॥

ઉચ્છૃઙ્ખલૈરૂર્મિભિરુત્પતન્તીં ભૂયોઽપ્યમાન્તીં તટયોઃ સ્રવન્તીમ્ ।
ભીતા ભટા ભૂમિભુજે શશંસુઃ પાણ્ડ્યોઽપિ તાં પ્રેક્ષિતુમાજગામ ॥ ૬૮॥

આલક્ષ્ય રાજાગમમપ્રમત્તાન્ કર્માન્તિકાન્ કર્મકૃતઃ સ પશ્યન્ ।
ખનન્નિવ ક્ષ્માં મૃદમાપગાયાં ક્ષિપન્નિવાન્તઃ સ્વયમપ્યચારીત્ ॥ ૬૯॥

તતસ્તતસ્તત્ર તટીર્નિબદ્ધાઃ પરામૃશન્ પાણ્ડ્યનૃપોઽતિરુષ્ટઃ ।
અપૂરિતં ક્વાપિ સ વીક્ષ્ય નિમ્નં કેનેદમિત્થં કૃતમિત્યપૃચ્છત્ ॥ ૭૦॥

આપૂપિકીકર્મકરં યુવાનમાલક્ષયન્તો ગણકાસ્તતસ્તમ્ ।
હસ્તે ગૃહીત્વા પુરતઃ ક્ષિપન્તો વિવવ્રિરે તસ્ય વિચેષ્ટિતાનિ ॥ ૭૧॥

આપૂપિકી કાચિદતીવ જીર્ણા સેયં દૃઢં કર્મકરં ન્યયુક્ત ।
અયં નિયુક્તોઽપિ ભૃતોઽપિ સમ્યઙ્ ન સ્પન્દતે કિઞ્ચન દુર્વિનીતઃ ॥ ૭૨॥

બ્રૂતે પુરસ્તાદ્ વિનયોક્તિમેવ કિઞ્ચિન્નિવૃત્તે ગણકે તુ ભૂયઃ ।
વિડમ્બયન્ ભાષિતચેષ્ટિતૈસ્તં પાર્શ્વસ્થિતાન્ હાસયતે વિશઙ્કઃ ॥ ૭૩॥

દત્તં કિયદ્ દારુણયા જરત્યા દત્તે તુ કિઞ્ચિચ્છિથિલાનપૂપાન્ ।
અહો મમાભાગ્યમિયં કિલાસીન્નાથેતિ શેતે મુહુરાતશોકઃ ॥ ૭૪॥

કિં મેઽસ્તિ તાતો જનની કિમાસ્તે કિમાસ્પદં કિં ધનમસ્તિ કિઞ્ચિત્ ।
કિં રાજભૃત્યાઃ કૃપણેષુ કુર્યુર્યાતેતિ નોઽધઃકુરુતે કદાપિ ॥ ૭૫॥

અન્યાયવૃત્તે નૃપતાવમુષ્મિન્નાપ્લાવ્યતે કિન્નગરં ન તોયૈઃ ।
કિં તાડિતૈઃ કર્મકરૈરિહેતિ તત્ત્વં બ્રવીતીવ કદાપિ મન્દમ્ ॥ ૭૬॥

આકર્ણયન્ વૃત્તમિદં સ સર્વમન્તર્હસન્તં ચ તમીક્ષમાણઃ ।
આવર્ત્ય વેત્રેણ તમાજઘાન પાણ્ડ્યઃ ક્રુધા પ્રસ્ફુરિતાધરોષ્ઠઃ ॥ ૭૭॥

અઙ્ગં ત્રિલોકીમયમિન્દુમૌલેરભ્યાહતં તેન યદા તદૈવ ।
વક્તા ચ હન્તા ચ નિરીક્ષિતા ચ વેત્રાહતં વિશ્વમભૂત્ સમસ્તમ્ ॥ ૭૮॥

આલમ્બ્ય સંજ્ઞાં કથમપ્યથૈનમાલોકતે યાવદયં નરેન્દ્રઃ ।
તાવત્ તિરોઽભૂત્ તરુણેન્દુમૌલિઃ સા ચ સ્રવન્તી વિરરામ સદ્યઃ ॥ ૭૯॥

આલોક્ય લીલાયિતમદ્ભુતં તદાનન્દબાષ્પસ્થગિતૈર્વચોભિઃ ।
અસ્તાવિષુઃ સ્વસ્વધિયોઽનુરૂપૈઃ પૌરાઃ સપાણ્ડ્યાઃ પતિમમ્બિકાયાઃ ॥ ૮૦॥

ચૂડાબદ્ધભુજઙ્ગપુઙ્ગવશિરોવિન્યસ્તપૃથ્વીભર-
    પ્રાન્તપ્રસ્ખલિતૈઃ કણૈઃ કતિપયૈરીષત્કરે પૂરણે ।
મિથ્યારોપિતયત્નગૌરવકથાવિજ્ઞાપનાચાતુરી-
    સમ્મુહ્યજ્જરતીગૃહીતશિથિલાપૂપાય તુભ્યં નમઃ ॥ ૮૧॥

યોગક્ષેમભરઃ સમસ્તજગતાં ન્યસ્તસ્તવાઙ્ઘ્રિદ્વયે
    કુક્ષૌ ત્રીણિ જગન્તિ મૂર્ધ્નિ શશભૃદ્ગઙ્ગાકપાલસ્રજઃ ।
વોઢવ્યસ્તદુપર્યયં યદિ મૃદાં ભારોઽપિ ગૌરીપતે!
    કસ્તે મદ્ભરણે શ્રમઃ ક ઇવ મે ત્રાસસ્તદભ્યર્થને ॥ ૮૨॥

હે સન્તઃ શ ૃણુતાધુનૈવ મિલિતૈરસ્માભિરેતચ્છિને
    વાચ્યં વેત્રહતિં વિભજ્ય ન વયં ભોક્તું સમર્થા ઇતિ ।
નો ચેત્ પાદહતિઃ શિલાપ્રહરણં કોદણ્ડદણ્ડાહતિ-
    ર્ગણ્ડૂષોદકસેક ઇત્યપિ ભવેત્ સર્વં વિભાજ્યં હિ નઃ ॥ ૮૩॥

ધ્યાયન્ધ્યાયમુપાયકોટિભિરહં ત્વત્પ્રાપ્ત્યુપાયં ચિરં
    નિર્વિણ્ણો નિરચૈષમેકમધુના હાલાસ્યચૂડામણે! ।
દિષ્ટ્યા વેગવતીતટે યદિ પતેદેતદ્વપુર્મામકં
    સંરોહેદપિ જાતુ તત્તટમૃદા સાકં ત્વદીયં શિરઃ ॥ ૮૪॥

ધૂલીધૂસરિતં શશાઙ્કશકલં જમ્બાલિતા જાહ્નવી
    ભગ્નં બ્રહ્મકપાલદામ ફણિનો ભૂષોચિતાઃ ક્લેશિતાઃ ।
મૃદ્ભારોદ્વહનં કુતોઽભ્યુપગતં કો વા ગુણઃ પિષ્ટકે
    સા દુષ્ટા જરતી કિમૌષધમદાત્ તત્રેતિ ન જ્ઞાયતે ॥ ૮૫॥

પભ્યાં કિન્નિહતઃ સુતો દિનમણેર્ભગ્નાશ્ચપેટાહતૈ ।
    ર્દન્તાઃ કિં તરણેઃ કિમિત્યપહૃતં ધાતુઃ શિરઃ પઞ્ચમમ્ ।
કામં ત્વં જગદીશ્વરો ભવ તતઃ કર્માપિ કિં જીર્યતિ
    પ્રત્યક્ષં નિનુ પાણ્ડ્યવેત્રલતિકાઘાતોઽયમાસાદિતઃ ॥ ૮૬॥

દેવા દૂરતરં પ્રયાત મુનયો ગૃહ્ણીત મૌનં ક્ષણં
    માતુઃ શંસત મા ચિરં ગણવરા દેવસ્ય દૃષ્ટાં દશામ્ ।
પુષ્પૈશ્ચન્દનસમ્ભૃતૈરપિ સુરૈર્યન્મન્દમભ્યર્ચ્યતે
    તદ્ દિવ્યં વપુરૈશ્વરં વિલુલિતં પાણ્ડ્યસ્ય વેત્રાહતૈઃ ॥ ૮૭॥

અમ્બ! સ્વિદ્યતિ વક્ત્રમમ્બ! કિમપિ શ્રાન્ત્યા ગતિર્મન્થરા

માતઃ! સીદતિ શઙ્કરે પ્રહૃતવાન્ વેત્રેણ પાણ્ડ્યો વિભુઃ ।
ઇત્યાવેદયતાં મુખાદનુપદં શ્રુત્વા ગણાનાં શિવા
પ્રેમોદીર્ણપતિવ્રતપ્રશમિતક્રોધા કથં વર્ત્તતે ॥ ૮૮॥

ત્રાણે યોઽધિકૃતઃ સમસ્તજગતાં તસ્યામ્બુરાશૌ સુખં
નિદ્રાણસ્ય તથાવિધેઽપિ સમયે પ્રષ્ટૈવ નાલક્ષ્યતે ।
વિષ્ટિં કુર્વતિ તામ્યતિ શ્રમભરાદ્વેત્રાહતિસ્ત્વય્યભૂત્
કસ્યાગ્રે કથયિષ્યસીમમનયં સ્વામિન્નનાથો હ્યસિ ॥ ૮૯॥

લીલાધારિતસિન્ધુતીરસિકતાભારાન્તરાલસ્થિતો
ભૂયાસં મશકોઽપ્યહં પશુપતે! તાવચ્ચ નાર્હામિ કિમ્ ।
યત્ કીદૃગ્વિધમૈશ્વરં શિર ઇતિ પ્રષ્ટું પ્રવૃત્તે વિધા-
વીદૃક્ તાદૃગિદં તદિત્યુપદિશંસ્તસ્યાપિ ચ સ્યાં ગુરુઃ ॥ ૯૦॥

પાણ્ડ્યો દણ્ડયિતાસ્તુ પાણ્ડ્યતનયા દ્રષ્ટ્રી કથં વર્ત્તતે
કામં સા જનની મમૈવ કિમતો યુક્તં તુ વાચ્યં મયા ।
સવ્યે સ્થાપય મૂર્ધ્નિ મૃદ્ભરમમું સવ્યં વપુર્દર્શય
પ્રાપ્તે વેત્રલતાહતે ચ તદનુ દ્રક્ષ્યામિ દેવ્યાઃ સ્થિતિમ્ ॥ ૯૧॥

વોઢું પ્રવૃત્તે ત્વયિ વેગવત્યાઃ શીર્ષેણ શમ્ભો! સિકતાવિતાનમ્ ।
ભારં દ્વયોઃ પર્યવસન્નમૂહે ચિત્તે યતીનાં શિરસિ શ્રુતીનામ્ ॥ ૯૨॥

અર્ધં પૌરુષમર્ધમેવ ભવતિ સ્ત્રૈણં ચ યત્ તાવકં
સામ્રાજ્યં ગૃહકર્મ વા કિમપિ તન્નાયાતિ નિર્વ્યૂઢતામ્ ।
ત્વં રાજ્ઞી મધુરાપુરસ્ય દયિતસ્તત્રૈવ તે તાડ્યતે
ત્વં માતઃ! સ્વયમન્નદાસિ જગતાં કાન્તસ્તુ તે ભિક્ષતે ॥ ૯૩॥

આખેટધર્મમનુપાલયતાનુભૂતઃ
પાર્થપ્રહાર ઇતિ યત્ તદવૈમિ યુક્તમ્ ।
આયાસવૃત્ત્યનુગુણાં ભૃતિમપ્યવિન્દ-
ન્નઙ્ગીકરોષિ કિમપાર્થમમું પ્રહારમ્ ॥ ૯૪॥

વેત્રાહતિ વિભક્તું વિશ્વાત્મકતા પ્રદર્શિતા ભવતા ।
કરગતકબલગ્રાસે પુનરભિનીતં શિવાદ્વૈતમ્ ॥ ૯૫॥

વેત્રાહતિમતિઘોરાં વિભજ્ય યે ભુઞ્જતે જના નિયતમ્ ।
ભવતાપતાપિતેષ્વપિ તેષૂપેક્ષૈવ તે કથં લીલા ॥ ૯૬॥

આનમ્યાનમ્ય મૌલિં ત્વયિ કિરતિ મૃદં સંસતે મૂર્ધ્નિ ગઙ્ગા
બદ્ધ્વાબદ્ધ્વા કપર્દં સ્પૃશતિ ફણધરા દારુણં નિશ્વસન્તિ ।
ઔત્સુક્યાત્ તાડ્યમાને ત્વયિ જગદખિલં તાડ્યતે વેત્રયષ્ટ્યા
ભક્તસ્યૈકસ્ય રક્ષા ભવતિ પશુપતે! સર્વલોકસ્ય શિક્ષા ॥ ૯૭॥

અસ્મત્તો બહુધો ગૃહીતમધુનાપ્યસ્મદ્ભવસ્રોતસાં
સંરોધે ન કિમપ્યયં પ્રયતતે દેવઃ પ્રમાણં તતઃ ।
ઇત્યગ્રે વિનિપત્ય પાણ્ડ્યનૃપતેર્બ્રૂમો વયં ચેત્ તતઃ
કોપાત્ કોપમુપેયુષઃ ક્ષિતિપતેઃ કિં ભાવિ સમ્ભાવ્યતામ્ ॥ ૯૮॥

વોઢવ્યાનિ વહાનિ તે સુરનદીવેધઃકપાલાદિકા-
ન્યાત્માનં ચ નિવેદયામ્યથ ભવદ્ભક્ત્યામૃતેનાપ્લુતમ્ ।
ઇત્યભ્યર્થયમાનમીષદપિ મામપ્રેક્ષમાણો ભવાન્
પિષ્ટાપૂપકૃતે મૃદં વહસિ ચેદ્ દેવઃ પ્રમાણં તતઃ ॥ ૯૯॥

પ્રહૃતં પ્રહૃતમિતિ ત્વં પાણ્ડ્ય! વિષીદસિ કિમમ્બિકારમણે ।
પ્રહૃતં યદિ સાધુ કૃતં પાશુપતં ગણય સિદ્ધમસ્ત્રં તત્ ॥ ૧૦૦॥

પાણ્ડ્યેન પ્રહૃતોઽસિ વેત્રલતયા પાર્થેન ગાણ્ડીવતઃ
પાદેનાપિ કિરાતકેન વટુના કેનાપિ ચ પ્રસ્તરૈઃ ।
તત્તત્ પ્રત્યુત તેષુ તેષુ તપ ઇત્યગ્રાહિ મત્પૂજને
ત્વાગાંસ્યેવ પદે પદે ગણયસે દૈવં મમૈવંવિધમ્ ॥ ૧૦૧॥

ઇત્થં સ્તવોક્ત્યા મુખરેષુ પોરેષ્વાશ્ચર્યમગ્નેષુ ગણાઃ પુરારેઃ ।
આપૂપિકીમદ્ભુતવેષરૂપાં નિન્યુર્દિવં દિવ્યવિમાનરૂઢામ્ ॥ ૧૦૨॥

અથાવસીદન્નરિમર્દનોઽપિ પાણ્ડ્યઃ સ્વયં પાશુપતાપચારાત્ ।
પાદપ્રણામૈઃ પ્રિયભાષિતશ્ચ પ્રસાદયામાસ સ મન્ત્રિવર્યમ્ ॥ ૧૦૩॥

વૈહાયસીં ગિરમથાકલયન્ પુરારેર્ભીતસ્તદૈવ સચિવં પ્રજિઘાય પાણ્ડ્યઃ ।
વૈરાગ્યમેવ હૃદિ વાતપુરીશ્વરોઽપિ કૃત્વા ચિદમ્બરમગાહત સર્વવેદી ॥ ૧૦૪॥

ઇતિ મહાકવિશ્રીનીલકણ્ઠદીક્ષિતપ્રણીતે શિવલીલાર્ણવ એકવિંશઃ સર્ગઃ ।

## અથ દ્વાવિંશઃ સર્ગઃ ।

અથાવિરાસીદરિમર્દનસ્ય કુલે નૃપઃ કોઽપિ ગુણૈરુદારઃ ।
અપ્યુન્નતં સ્ફારતરૈર્યશોભિરાચક્ષતે યં કિલ કુબ્જપાણ્ડ્યમ્ ॥ ૧॥

સ પાણ્ડ્યવંશપ્રભવોઽપિ દેવઃ સંસર્ગદોષાચ્ચિરમાર્હતાનામ્ ।
અવાપ દીક્ષામપિ તન્મતેન દુરુત્તરો દુર્જનસમ્પ્રયોગઃ ॥ ૨॥

આશઙ્કનીયોઽપિ ન વેદવેદ્યોરાબ્રહ્મણો યત્ર કિલાન્તરાયઃ ।
તસ્મિન્ વિશુદ્ધે શિવદાસવંશે સમ્બન્ધ ઇત્યાવિરભૂત્ કુમારઃ ॥ ૩॥

તં માતૃહીનં શિશુમુલ્લલન્તં સ્તન્યેન ગૌરી બિભરામ્બભૂવ ।
યં જ્ઞાનપૂર્ણાપરનામધેયં તદાદિ લોકાઃ સમુદાહરન્તિ ॥ ૪॥

સ્કન્દાંશજઃ સ દ્વિજસાર્વભૌમસ્તારુણ્ય એવાખિલતન્ત્રવેદી ।
ત્રય્યન્તસિદ્ધાન્તદૃશા પુરારેરુત્કર્ષમુચ્ચૈર્વિશદીચકાર ॥ ૫॥

તં ભસ્મરુદ્રાક્ષષડક્ષરાણાં તત્ત્વાવબોધૈકનિધિં મહાન્તમ્ ।
આરાધ્ય કેચિત્ કલિમભ્યજૈષુઃ પચેલિમપ્રાક્તનપુણ્યયોગાત્ ॥ ૬॥

તથાગતાચાર્યકદુર્વિપાકતમોવૃતે રાજકુલે તદાનીમ્ ।
મન્ત્રી ચ રાજ્ઞો મહિષી ચ તસ્ય ભક્તિં પરામૂહતુરિન્દુચૂડે ॥ ૭॥

સમ્બન્ધનાથાઙ્ઘ્રિસરોજયોસ્તાવાબધ્ય ભક્તિં મહતીમનન્યામ્ ।
પ્રાયસ્યતાં ત્રાતુમમું પ્રદર્શ્ય મગ્નં નૃપં બાહ્યમતાન્ધકૂપે ॥ ૮॥

કદાચિદાસીદથ કુબ્જપાણ્ડ્યસ્તાપજ્વરેણ જ્વલતાભિભૂતઃ ।
યત્રાર્હતાનાં નૃપદેશિકાનાં યત્નઃ સમસ્તો વિફલીબભૂવ ॥ ૯॥

દેવી તદા દેશિકસાર્વભૌમમારોગ્યહેતોરવનીશ્વરસ્ય ।
સર્વજ્ઞમભ્યર્થનયા મહત્યા સમ્બન્ધનાથં સ્વયમાનિનાય ॥ ૧૦॥

સ જ્ઞાનપૂર્ણઃ પ્રવિશન્ દૃશા તં સમ્ભાવયામાસ રુજાભિતપ્તમ્ ।
કોટીરકોટીન્દુગલસુધાર્દ્રમન્તઃસ્મરન્ દેવમહઙ્ગ્રહેણ ॥ ૧૧॥

અત્યાશ્રમસ્થો મુનિરસ્ય રાજ્ઞો ભાગ્યેન ફાલે ભસિતં નિધાય ।
પસ્પર્શ હસ્તેન ચ તં મહેશપાદારવિન્દાર્ચનભાવિતેન ॥ ૧૨॥

સ સ્પૃષ્ટમાત્રો ભગવત્તરેણ શિવાભિમર્શેન ગુરોઃ કરેણ ।
તત્યાજ વિશ્વત્રયભેવજેન તાપજ્વરાર્તિં સહસા નરેન્દ્રઃ ॥ ૧૩॥

ઔદર્યવહ્નિજ્વલનોત્થિતાં તામાર્તિં નિવૃત્તાં મુમુદે સ પશ્યન્ ।
દેવી તુ શાન્તં વિદતી જહર્ષ ભવજ્વરજ્વાલમહાભિષઙ્ગમ્ ॥ ૧૪॥

તાપજ્વરો ભૂમિભૃતઃ શરીરાત્ તસ્યાપનીતઃ કરુણાદૃશાયમ્ ।

તથાગતાનાં દ્વિગુણસ્તદાદિ ચિન્તાત્મના ચેતસિ સઞ્જજમ્ભે ॥ ૧૫॥

અષ્ટૌ સહસ્રાણિ તથાગતાનામષ્ટાસુ શૈલેષુ કૃતાસ્પદાનામ્ ।
જાતેઽભિષઙ્ગે મધુરામવાપુર્જલ્પેન જેતું શિવદેશિકં તમ્ ॥ ૧૬॥

પારીણમેનં પદવાક્યમાને ત્ર્યન્તસિદ્ધાન્તગુરું મહાન્તમ્ ।
આસાદ્ય જલ્પાય સકૃત્ પ્રવૃત્તા આસન્ ક્ષણાદપ્રતિભા જિનેન્દ્રાઃ ॥ ૧૭॥

ઉત્સૃજ્ય સર્વાણ્યુપબૃંહણાનિ મીમાંસિતન્યાયદૃઢીકૃતાનિ ।
ઉલ્લઙ્ઘ્ય તર્કાનપિ પામરાસ્તે સમ્ભૂય તં પ્રત્યયતોઽજિગીષન્ ॥ ૧૮॥

સંસારતાપાનખિલાન્ નિહન્તું શક્નોત્યહિંસૈવ હિ શાક્યદૃષ્ટા ।
નાર્યો મહેશો ન શિવા વિભૂતિરિત્યાર્હતાઃ સ્વામલિખન્ પ્રતિજ્ઞામ્ ॥ ૧૯॥

વેદાઃ પ્રમાણં સહ કામિકાદ્યૈર્વિશ્વાધિકઃ શઙ્કર એક એવ ।
ભસ્મૈવ ધાર્યં ભુવિ મોક્ષમાણૈરિત્યાલિખત્ સ્વાં સ ગુરુઃ પ્રતિજ્ઞામ્ ॥ ૨૦॥

જૈના અથોચુર્જ્વલને ક્ષિપામો દ્વયે વયં સ્વસ્વકૃતાન્તલેખમ્ ।
દાહાદદાહાદપિ સર્વલોકાઃ પશ્યન્તુ નો ભઙ્ગજયાવિહેતિ ॥ ૨૧॥

તથેતિ સમ્બન્ધકરાર્પિતેન લેખેન જગ્લેઽપિ ન હવ્યવાહે ।
અદહ્યત દ્રાક્ પુનરાર્હતાનાં લેખઃ સહાયુર્લિપિભિસ્તુ તેષામ્ ॥ ૨૨॥

પરાજયે શૂલશિખાધિરોહં પણં વૃણાનાઃ સ્વયમેવ જૈનાઃ ।
વિચિક્ષિપુઃ સ્રોતસિ વેગવત્યાઃ પત્રં પ્રવાહાભિમુખં ચલેતિ ॥ ૨૩॥

તત્ સ્રોતસા સત્ક્ષણમેવ સિન્ધોરનીયત પ્રાગ્દિશમાસમુદ્રાત્ ।
પ્રત્યગ્દૃશા તદ્ ગુરુણાર્પિતં તુ પ્રત્યઙ્મુખં સ્રોતસિ સઞ્ચચાલ ॥ ૨૪॥

તતઃ ક્ષણાદ્ દેશિકસાર્વભૌમવિજ્ઞાનસિન્ધોરિવ વીચિઘોષઃ ।
સમન્તતઃ શઙ્કરકિઙ્કરાણાં સમુજ્જજૃમ્ભે વિજયાટ્ટહાસઃ ॥ ૨૫॥

ચાર્વાકશિષ્યા વિજિતાસ્તતસ્તે સૌત્રાન્તિકા માધ્યમિકાશ્ચ જૈનાઃ
અવીક્ષિતાન્યોન્યમુખાઃ પ્રચેલુરારોઢુકામાઃ સ્વયમેવ શૂલમ્ ॥ ૨૬॥

તે બોધ્યમાના અપિ શૈવધર્મં શૂલાધિરોહાય રુચિં બબન્ધુઃ ।
પ્રાણાન્તિકાં નિષ્કૃતિમેવ યુક્તાં પશ્યન્ સ ચૈતેષુ તથાનુમેને ॥ ૨૭॥

પાણ્ડ્યસ્તતઃ પ્રત્યયદર્શનેન સમ્બન્ધનાથં શરણં પ્રપન્નઃ ।
અશેષપાપચ્છિદુરામયાચદ્ દીક્ષાં શિવજ્ઞાનવિધાનદક્ષામ્ ॥ ૨૮॥

આચાર્યવર્યોઽપ્યધિવાસિતં પ્રાક્ છિષ્યં શુભસ્વપ્નનિરસ્તશોકમ્ ।
આરાધિતસ્ય જ્વલને પુરારેરનુજ્ઞયા સન્નિધિમાનિનાય ॥ ૨૯॥

ષડધ્વનઃ પઞ્ચ કલાશ્ચ તસ્ય સંશોધયન્ દેશિકસાર્વભૌમઃ ।
દુર્દીક્ષયા દૂષિતમપ્યયત્નાત્ સમ્ભાવયામાસ શરીરકોશમ્ ॥ ૩૦॥

શરીરમાવિશ્ય સ તસ્ય નાડીસન્ધાનમાર્ગેણ ગુરુઃ પુનાનઃ ।
જાતિં સમુદ્ધૃત્ય દયાસમુદ્રશ્ચક્રે શિવજ્ઞાનનિધાનમેનમ્ ॥ ૩૧॥

વિત્તં શરીરં હૃદયં ચ તસ્ય વિન્યસ્ય પાણ્ડ્યશ્ચરણારવિન્દે ।
અભ્યર્થયન્નર્ધશશાઙ્કચૂડં શૈવાધ્વપાન્થઃ પ્રશશાસ પૃથ્વીમ્ ॥ ૩૩॥

શિવવ્રતસ્થાઃ શિવમન્ત્રસક્તાઃ શિવાગમજ્ઞાનસુધારસજ્ઞાઃ ।
પ્રજા બભૂવુઃ સકલાસ્તદાનીં પ્રજેશ્વરે શૈવપદાધિરૂઢે ॥ ૩૩॥

અધ્યાત્મવિદ્યાભિરયં પ્રબુદ્ધાન્ મન્દાન્ વિચિત્રાભિરુપાસનાભિઃ ।
બાહ્યાર્ચનૈરેવ પરાંશ્ચ શમ્ભોર્ધીરોઽનુજગ્રાહ યથાધિકારમ્ ॥ ૩૪॥

અધીષ્વ વેદાનવધારયાર્થાનધીહિ શમ્ભું વહ ભૂતિમઙ્ગે ।
તપાંસિ તપ્યસ્વ સુરાન્ યજેતિ સર્વે જનાઃ શઙ્કરમારરાધુઃ ॥ ૩૫॥

કાલે તતો વૈશ્યકુલે બભૂવ કશ્ચિન્મહાર્થો મધુરાનગર્યામ્ ।
કરગ્રહં માતુલકન્યકાયાઃ કર્તું પ્રતસ્થે સ કદાપિ ચોલાન્ ॥ ૩૧॥

અતીતયોર્માતુલયોસ્તતસ્તામાદાતુકામઃ સ્વજનાનુમત્યા ।
વૈશ્યસ્તયા સાકમનૂઢયૈવ ભૂયઃ સ્વમાવાસમભિ પ્રતસ્થે ॥ ૩૭॥

મધ્યેપથં ક્વાપિ મહેશધામ્નિ શૈવાનિ તીર્થાન્યટતા સ દિષ્ટ્યા ।
સમ્બન્ધનાથેન સમાજગામ સઞ્જીવિતશ્ચાત્ર સ સર્પદષ્ટઃ ॥ ૩૮॥

સમ્બન્ધનાથેન તદા નિયુક્તઃ સ બાલિકોદ્વાહકૃતે કુમારઃ ।
પાણિગ્રહં સાક્ષિષુ બાન્ધવેષુ ચિકીર્ષમાણઃ સમશેત કિઞ્ચિત્ ॥ ૩૯॥

શમ્ભુઃ શમી કૂપ ઇતિ ત્રયં તત્ તત્ર સ્થિતં સાક્ષિપદે વૃણાનઃ ।
અગ્રાહયત્ પાણિમનેન સદ્યઃ સ દેશિકો માતુલકન્યકાયાઃ ॥ ૪૦॥

સ તાં સમાદાય વધૂં નવોઢાં સમ્પ્રાપ્ય ભૂયો મધુરાં વિશાલામ્ ।
આરાધયન્નાર્તશરણ્યમીશં હાલાસ્યનાથં મુમુદે ચિરેણ ॥ ૪૧॥

કાલેન તસ્યાસ્તનયા બભૂવુઃ કારુણ્યયોગેન શશાઙ્કમૌલેઃ ।
સ્તનન્ધયાંસ્તાનપથે દ્વિષત્યા સા જાતુ લેભે કલહં સપત્ન્યા ॥ ૪૨॥

વેશ્યેવ કાચિત્ ત્વમસીહ ગેહે કરગ્રહે કસ્તવ દાસિ ! સાક્ષી ।
ઇતિ પ્રવૃત્તં કલહેઽતિવાદમેષા સપત્ન્યા મમૃષે ન સાધ્વી ॥ ૪૩ ॥

સા બાષ્પમત્યૂષ્મલમુદ્વહન્તી સદ્યો વિનિર્ગત્ય ગૃહાદ્ વિષણ્ણા ।
આપન્નબન્ધોશ્ચરણં પુરારેર્હાલાસ્યનેતુઃ શરણં પ્રપેદે ॥ ૪૪ ॥

સાક્ષી ભવાનેવ કરગ્રહે મે શમ્ભો ! શમીકૂપસમીપવર્તી ।
સાક્ષ્યં ન ધત્સે યદિ મે સપત્ન્યાઃ સદ્યો વિહાસ્યામિ તનૂમિહેતિ ॥ ૪૫ ॥

હાલાસ્યનાથાન્તિકમભ્યુપેત્ય સમ્પશ્ય પાણિગ્રહસાક્ષિણો મે ।
ઇતિ ત્વમાકર્ષ બલાત્ સપત્નીમિત્યાહ તાં વ્યોમગિરા મહેશઃ ॥ ૪૬ ॥

સા પ્રેયસા બન્ધુજનૈશ્ચ સાકં તામાનયન્તી પ્રસભં સપત્નીમ્ ।
યાવચ્છિવસ્યાન્તિકમેતિ તાવત્ તત્ર સ્વયં તત્ ત્રયમાવિરાસીત્ ॥ ૪૭ ॥

ઇમે સમેતાઃ સદનં પુરારેરીશાનકોણેઽસ્ય કદાપ્યદૃષ્ટમ્ ।
અન્ધું શમીવૃક્ષમનાથબન્ધું લિઙ્ગં ચ દૃષ્ટ્વા બિભયામ્બભૂવુઃ ॥ ૪૮ ॥

ભોગાઙ્ગપૂજાવસરે પુરારેઃ સમાગતાસ્તત્ર સુરાઃ સમસ્તાઃ ।
આલોક્ય લીલાયિતમદ્ભુતં તદ્ ભક્ત્યા નતાસ્તુષ્ટુવુરિન્દુચૂડમ્ ॥ ૪૯ ॥

ક્વ તે દયા વાઙ્મનસાતિભૂમિઃ ક્વ દુર્લભો વા ત્વદવાસ્ત્યુપાયઃ ।
અહો જિતં સુન્દરનાથ! મર્ત્યૈરહો જિતં તત્ર ચ દીનદીનૈઃ ॥ ૫૦ ॥

ગુપ્તં વૃથા કોટિભિરાગમાનાં ગુપ્તં વૃથાહો ગુરુભિઃ પુરાણૈઃ ।
કોણે યદત્ર ત્વમિહાનુકમ્પાકોશાલયદ્વારમપાવૃણોષિ ॥ ૫૧ ॥

અસ્માભિરજ્ઞાનપિ તારયદ્ભિઃ કિયાન્ પ્રકર્ષો વિબુધેષુ કાર્યઃ ।
ઇતિ ત્વયા ચિન્તયતા કિમીશ! પ્રતારિતા સ્મસ્ત્રિદિવાર્પણેન ॥ ૫૨ ॥

પાણ્ડ્યપ્રિયં ત્વાં વિદતી શિવાપિ પાણ્ડ્યાત્મજાસીદ્યદિ કા કથા નઃ ।
પાણ્ડ્યેષુ જાયેમહિ ખઞ્જરીટાઃ કોયષ્ટયઃ કોલકિશોરકા વા ॥ ૫૩ ॥

લીલાસુ તે લબ્ધસરૂપભાવા ગ્રામ્યા ઇમે પાણ્ડુષુ ચન્દ્રમૌલે! ।
જિઘ્રન્તિ કેચિદ્ વિલિખન્તિ કેચિચ્ચર્વન્તિ કેચિચ્ચ વતંસમિન્દુમ્ ॥ ૫૪ ॥

ત્વં તાવદત્યન્તમૃદુઃ પ્રજાસુ ત્વત્તોઽપિ મૃદ્વી ગૃહિણી તવેયમ્ ।
અધ્યાયતૌ વા ચરતોઃ કિલૈવમાત્મૈકશેષો ભવિતા ધ્રુવં વામ્ ॥ ૫૫ ॥

કૈવલ્યદાનાય કૃતપ્રતિજ્ઞૌ કાશીપતિઃ પાણ્ડ્યપતિર્યુવાં દ્વૌ ।

શિષ્યૈકવિશ્રાન્તમમુષ્ય દાનં સાર્વત્રિકં તાવકમેવ શમ્ભો! ॥ ૫૬॥

વિશ્વસ્ય દીર્ઘાં શ્રવણાદિભઙ્ગી વીતોદ્યમાઃ સ્મશ્ચિરમીશ! મોક્ષે ।
સમ્પ્રત્યવાબુધ્યત વાક્યશેષપઞ્ચાક્ષરીયં મધુરા વિનેતિ ॥ ૫૭॥

યે યે જના યદ્યદિહાર્થયન્તે તત્તન્નિરસ્તોપધિ તેષુ તેષુ ।
મોમિત્યલોભાદનુજાનતઃ કિમોમિત્યભિખ્યૈવ તવેયમાસીત્ ॥ ૫૮॥

અન્વેષણીયં કિમનાહતે તે તત્ત્વં હતાઃ સ્મો વયમાગમૌઘૈઃ ।
વિસ્પષ્ટમત્રાહત એવ તત્ત્વં વેત્રેણ પાણ્ડ્યસ્ય યદીક્ષિતં તત્ ॥ ૫૯॥

સ્વરૂપમેતત્ તવ સુન્દરેશ! શુદ્ધા દયેત્યેવ તુ લક્ષયામઃ ।
કદમ્બમૂલન્તુ તટસ્થલક્ષ્મ કારુણ્યસિન્ધો! તવ તર્કયામઃ ॥ ૬૦॥

યદ્ધામસીમાક્રમમાત્ર એવ વૃત્રદ્રુહસ્તત્ કલુષં વિલિલ્યે ।
સકૃદ્ વિગાહ્યૈવ યદીયતીર્થે શાપં મુનેરિન્દ્રગજો મુમોચ ॥ ૬૧॥

નીપાટવીં યઃ કુલશેખરેણ નિર્માપયામાસ ચ રાજધાનીમ્ ।
પ્રાપ્તા શિવા પાણ્ડ્યકુલેઽવતારમનુજ્ઞયા યસ્ય તટાતકેતિ ॥ ૬૨॥

ઉપાયત સ્વં યુધિ જેતુકામામુપાયતસ્તામપિ લીલયા યઃ ।
પતઞ્જલેભક્તિમવેત્ય નૃત્તં પ્રાદર્શયદ્ રૂપ્યસભાન્તરે યઃ ॥ ૬૩॥

કુણ્ડોદરસ્યોદરપૂરણેઽપિ કુણ્ઠોદ્યમા યેન કૃતાન્નપૂર્ણા ।
નાલં પિપાસોપશમાય યસ્ય નદી ચ સા વેગવતી યતોઽભૂત્ ॥ ૬૪॥

સમાહૃતાઃ કાઞ્ચનમાલિકાયાઃ સ્નાનાય યેનામ્બુધયઃ સમસ્તાઃ ।
મહીપતિં યો મલયધ્વજં ચ દિવં ગતં દર્શયતિ સ્મ પત્નીમ્ ॥ ૬૫॥

મીનેક્ષણાયાં સુતમુગ્રપાણ્ડ્યમવાપ યઃ સુન્દરપાણ્ડ્યદેવઃ ।
તસ્મૈ ચ યં શક્તિધરાય વજ્રં ચણ્ડાયુધં ચક્રમપિ વ્યતારીત્ ॥ ૬૬॥

ઉદ્વેલમપ્યર્ણવમુગ્રપાણ્ડ્યો યદ્દત્તયા શોષયતિ સ્મ શક્ત્યા ।
વજ્રેણ મૌલિં બિભિદે મઘોનશ્ચણ્ડાયુધેનાપિ જઘાન મેરુમ્ ॥ ૬૭॥

આચષ્ટ યશ્ચાશયમાગમાનાં જિજ્ઞાસમાનેષુ તપોધનેષુ ।
યદ્દત્તરત્નાહિતમૌલિનૈવ પાણ્ડ્યાર્ભકો રાજપદેઽભિષિક્તઃ ॥ ૬૮॥

કપર્દજૈર્યસ્ય ઘનાઙ્ગ્નૌઘૈઃ પપે પયોધિઃ પરિજૃમ્ભમાણઃ ।
પ્રાપ્તૈશ્ચ તૈર્યઃ પટમણ્ડપત્વમવારયદ્ વૃષ્ટિમતિપ્રવૃદ્ધામ્ ॥ ૬૯॥

સિદ્ધાત્મના યો વિતતાર સર્વાઃ સિદ્ધીઃ પ્રજાનાં મધુરાનગર્યામ્ ।
યઃ સુન્દરેશાનવિમાનસક્તં શિલાગજઞ્ચાશયદિક્ષુકાણ્ડાન્ ॥ ૭૦॥

અસ્ત્રેણ તુર્યાવતરેણ શૌરર્હસ્તી હતો યેન તથાગતાનામ્ ।
શ્વશ્રૂદુરાલાપવિવાસિતાયા યઃ પ્રાદુરાસીદ્ દ્વિજકન્યકાયાઃ ॥ ૭૧॥

વ્યત્યસ્ય નૃત્તં વિદધે દયાલુઃ પાણ્ડ્યસ્ય યઃ પ્રાર્થનયા મહત્યા ।
પાન્થદ્વિજસ્ત્રીવધપાપવાદં વ્યાજેન યો વ્યાધવટોરહાર્ષીત્ ॥ ૭૨॥

સ્વમાતૃજારં પિતૃઘાતિનં ચ વિપ્રાધમં યો વિમલીચકાર ।
અઙ્ગસ્ય ભાર્યાહરમસ્ત્રશિષ્યમઙ્ગાત્મનૈવાજયદાહવે યઃ ॥ ૭૩॥

માયોરગં યઃ શમયામ્બભૂવ માયાગવીં યસ્ય પુનર્મહોક્ષઃ ।
યઃ પાણ્ડ્યસેનાન્યમનુગ્રહીતું સન્દર્શયામાસ ચમૂં નૃપાલમ્ ॥ ૭૪॥

પાણ્ડ્યાય યઃ પ્રાદિત હેમ યશ્ચ વૈશ્યાઙ્ગનાભ્યો વલમાન્ દયાર્દ્રઃ ।
અષ્ટાપિ સિદ્ધીઃ પ્રતિપાદયન્ યો યક્ષાઙ્ગનાસુ પ્રસસાદ ભૂયઃ ॥ ૭૫॥

દ્વારં સમુદ્ઘાટ્ય નિશિ સ્વયં યશ્ચોલાય સેવામદિશન્નિગૂઢમ્ ।
પાનીયદાનેન ચ પાણ્ડ્યસેનામુજ્જીવ્ય ચોલેન્દ્રમજાપયદ્ યઃ ॥ ૭૬॥

સ્વર્ણં દિશન્ સિદ્ધરસં પ્રયુજ્ય પુપોષ વેશ્યાં શિવધર્મિણીં યઃ ।
પાણ્ડ્યસ્ય યઃ સ્વૈકપરાયણસ્ય સાદી ભવન્ સાધયતિ સ્મ ચોલમ્ ॥ ૭૭॥

અક્ષય્યમપ્યક્ષતમર્પયન્ યો ભક્તાય ભક્તાર્પણમન્વગૃહ્ણાત્ ।
યેનાદૃતો। માતુલરૂપભાજા વૈશ્યો વટુર્ઝતિજનાન્ વિજિગ્યે ॥ ૭૮॥

આસ્થાય યશ્ચાર્જુનનાથલિઙ્ગં પાણ્ડ્યે મહત્ પાતકમુન્મમાર્જ ।
કાષ્ઠાનિ મૂર્ધ્ના કલયન્ ન્યધત્ત કાષ્ઠાં પરાં ગાયતિ યઃ સ્વભક્તે ॥ ૭૯॥

ભદ્રાય ભૂરિ દ્રવિણં દિદેશ પુત્રં દદૌ ચેરમહીભુજે યઃ ।
ભદ્રાય દિવ્યં ફલકં દિદેશ વૃષ્ટૌ મહત્યામપિ ગાયતે યઃ ॥ ૮૦॥

દ્વીપાન્તરીયામવમાપિ ગીત્યા ભદ્રા વિજિગ્યે યદનુગ્રહેણ ।
વારાહમાસ્થાય વપુર્દદૌ યઃ સ્તન્યામૃતં કોલકિશોરકાણામ્ ॥ ૮૧॥

પ્રાપય્ય માનુષ્યકમદ્ભુતં યઃ પાણ્ડ્યસ્ય તાન્ મન્ત્રિપદેઽભ્યષિઞ્ચત્ ।
યઃ ખઞ્જરીટં શરણં પ્રપન્નં ચક્રે બલિભ્યો બલિનં ખગેભ્યઃ ॥ ૮૨॥

જહાર કોયષ્ટિમનુગ્રહીતું યાદાંસિ યઃ કાઞ્ચનપઙ્કજિન્યાઃ ।
કલ્પાન્તલુમાં કટકાહિના યઃ સીમા વિવવ્રે મધુરાનગર્યાઃ ॥ ૮૩॥

પ્રાદ્રાવયત્ પાણ્ડ્યકૃતેઽરિસેનાં બાણૈઃ સ્વનામાક્ષરલાઞ્છિતૈર્યઃ ।
દુરાસદં દુષ્કવિભિઃ સ્ક્યં યઃ પ્રાદાદ્ વિચિત્રં ફલકં કવીનામ્ ॥ ૮૪॥

પાણ્ડ્યસ્ય ચિન્તાનુગુણં નિબધ્ય પદ્યં દદૌ યશ્ચ નિજાર્ચકાય ।
વિદ્યાવિવાદે વિહિતાતિવાદં કીરં કવિં યઃ પુનરન્વગૃહ્ણાત્ ॥ ૮૫॥

અપિ સ્વયં કુમ્ભભવેન યસ્તમબોધયદ્ દ્રામિડસૂત્રતત્ત્વમ્ ।
વ્યવેચયન્મૂકમુખેન યશ્ચ તત્તત્કૃતા દ્રામિડસૂત્રવૃત્તીઃ ॥ ૮૬॥

ભક્તે કવૌ ક્વાપિ વિમાનનેન પાણ્ડ્યાય કુપ્યન્નગરાદ્યયૌ યઃ ।
દાશો ભવન્ દાશકુલેઽવતીર્ણાં જગ્રાહ પાણૌ જગદામ્બિકાં યઃ ॥ ૮૭॥

આચાર્યમૂર્તિં પરિગૃહ્ય નમ્રમદીક્ષયદ્ વાતપુરીશ્વરં યઃ ।
અદર્શયદ્ યસ્તુરગાન્ સૃગાલાનભ્યર્થિતો વાતપુરીશ્વરેણ ॥ ૮૮॥

પ્રાવર્તયદ્ વેગવતીમથૈનં પાણ્ડ્યેન યઃ પાલયિતું નિરુદ્ધમ્ ।
વિશ્વાત્મતા યો વિશદીચકાર વેત્રાહતિં સ્વાં ભુવને વિવૃણ્વન્ ॥ ૮૯॥

સમ્બન્ધનાથસ્ય મુખાદકાર્ષીચ્છાન્તં જ્વરં પાણ્ડ્યમહીપતેર્યઃ ।
વિદ્યાવિવાદે વિજિતાનનેન યઃ શૂલમારોપયતિ સ્મ બૌદ્ધાન્ ॥ ૯૦॥

આનીય યઃ કૂપશમીમહેશાન્ વૈશ્યાવિવાહે વિવવાર સાક્ષ્યમ્ ।
લીલાસ્વનન્તાસ્વપિ યસ્ય દૃષ્ટા લીલા ચતુષ્ષષ્ટિરિયં પુરાણે ॥ ૯૧॥

આલમ્બમેકં જગતાં ત્રયાણામવ્યાજકારુણ્યસુધાનિધાનમ્ ।
તં તાદૃશં ત્વામપહાય શમ્ભો! કિં તાવદન્યૈરિહ કિમ્પચાનૈઃ ॥ ૯૨॥

ઇતિ સ્તવોક્ત્યા મુદિતઃ સુરાણામીશઃ સ વેશ્યાં સહ વલ્લભેન ।
નિર્વિષ્ટભોગામવનૌ ચિરાય નિન્યે પરં ધામ દયાર્દ્રચેતાઃ ॥ ૯૩॥

ઇત્થં સમસ્તાર્ત્તિહરઃ પ્રજાનામીશઃ કદમ્બદ્રુમમૂલધામા ।
આસ્તે ત્રિલોકીમનુકમ્પમાનઃ સાચિવ્યતો મીનવિલોચનાયાઃ ॥ ૯૪॥

શ્રોતવ્યં નિધિરસ્તિ કોઽપિ નિહિતો હાલાસ્ય ઇત્યગ્રતો
    મન્તવ્યં સ નિધિર્જગન્નિધિરિતિ ન્યાયૈરથોચ્ચાવચૈઃ ।
ધ્યાતવ્યં હૃદિ મૂલલિઙ્ગમથ ચ શ્રીસુન્દરેશાભિધં
    દ્રષ્ટવ્યં શફરેક્ષણાસહચરં તત્ત્વં તતઃ શાઙ્કરમ્ ॥ ૯૫॥

લીલાં ચતુષ્ષષ્ટિમિમાં પ્રણીતાં હાલાસ્યનેતુસ્તરુણેન્દુમૌલેઃ ।

શ્રીનીલકણ્ઠે મયિ કર્ણજાહમાનીય મીનાક્ષિ ! ચિરં દયેથાઃ ॥ ૯૬॥

કૃતિઃ સમર્પ્યા વિરસા મયેતિ કસ્યૈષ દોષઃ સ પરં ભવાન્યાઃ ।
રમ્યાં કૃતિં સા યદિ રોચયેત તથાનુગૃહ્ણાતુ નિવારિતં કૈઃ ॥ ૯૭॥

મા ભૂવન્ નવ ચ રસાઃ કવિપ્રણીતાઃ
    કાવ્યેઽસ્મિન્ પદકમલાર્પિતે પુરારેઃ ।
આસ્તે તુ ધ્રુવમખિલાભિનન્દનીયાં
    કારુણ્યામૃતરસકન્દલી જનન્યાઃ ॥ ૯૮॥

હાલાસ્યેશિતુરીશિતુર્યદિ સખે! લીલાસુ શુશ્રૂષસે
    તત્સર્વાગમગુપ્તમસ્ય યદિ વા તત્ત્વં વિજિજ્ઞાસસે ।
પારં વાથ દિદૃક્ષસે યદિ પરં કાવ્યાગમસ્રોતસાં
    તત્ કર્ણે કુરુ નીલકણ્ઠમખિનો વાચં શિવૈકાશ્રયામ્ ॥ ૯૯॥

મલયધ્વજપાણ્ડ્યકન્યકા-
    ચરણદ્વન્દ્વનિવેશિતાત્મના ।
શિવયોઃ કવિનેદમાર્પિતં
    શિવલીલાર્ણવકાવ્યમદ્ભુતમ્ ॥ ૧૦૦॥

ઇતિ શ્રીમદ્ભરદ્વાજકુલજલધિકૌસ્તુભશ્રીકણ્ઠમતપ્રતિષ્ઠાપનાચાર્ય-
ચતુરધિકશતપ્રબન્ધનિર્વાહકશ્રીમન્મહાવ્રતયાજિ-
શ્રીમદપ્પયદીક્ષિતસોદર્યાચ્ચાન્દીક્ષિત-
પૌત્રેણ નારાયણદીક્ષિતાત્મજેન ભૂમિદેવીગર્ભસમ્ભવેન મહાકવિ-
શ્રીનીલકણ્ઠદીક્ષિતેન વિરચિતે શિવલીલાર્ણવે મહાકાવ્યે દ્વાવિંશઃ સર્ગઃ ।

સમાપ્તશ્ચાયં
શિવલીલાર્ણવઃ ।
દૃષ્ટેષ્વિવાનુશ્રવિકેષુ યસ્મિન્ ધીરા વિતૃષ્ણા ઇતિ નાદ્રુતાય ।
સ્વર્ગાધિકે ધામનિ સંવસન્તઃ સ્વર્ગ્યાણિ કર્માણિ

Proofread by Rajesh Thyagarajan

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*